अथ द्वितीयाध्यायप्रारंभः

कै०वि०२

श्रीगणेशायनमः॥ ॥समर्थःपदविधिः॥ ॥विधिरितिकोयमितिभाष्यस्यनस्वरूपप्रश्नेतात्पर्यंतस्यश्रोत्रेणनिश्चितत्वात् इत्यतोभिप्रायमाह अर्थेति कोयमित्यस्यकिमर्थकोयमित्यर्थः शब्दार्थयोरभेदात् इतिभावः किंभावेति करणधिकरणसाधनस्तुअनन्वितत्वात्प्रयोजनोभावाच्चनोल्लिखितः विधीयमानत्वादिति वस्तुतसादिविधावितिशेषः इतरत्रेति कर्मसाधनेइत्यर्थः अर्थभेदाच्छब्दभेदइतिमतेप्रत्यभिज्ञानुपपत्तिः तदेदेपिशब्देकौतुकः श

श्रीगणेशायनमः॥ ॥समर्थःपदविधिः॥ ॥विधिरितिकोयंशब्दइति अर्थानिश्चयात्संदेहेसतिप्रश्नः किंभावसाधनःउतकर्मसाधनः तत्रभावसाधनेपदानांविधीयमानत्वात्कर्मणिषष्ठीउत्तरत्रशेषषष्ठी। तत्रैवसामर्थ्यभेदाच्छब्दभेदइतिदर्शनं साद्दश्यनिबंधनाचप्रत्यभिज्ञातद्दर्शनेकइतिप्रश्नोविशिष्टशब्दनिर्धारणाय येत्वर्थभेदेपिशब्दस्यैक्यमिच्छंतितन्मतेर्थभेदाच्छब्दभेदमारोप्यकइतिप्रश्नः विपूर्वादिति विधविधानइत्यस्यौणादिकेनप्रत्ययांतस्यानिष्टत्वंधिविपूर्वाद्धाञइत्युक्तं ३२
स्वरेचानयोर्भेदः इन्प्रत्ययांतस्याद्युदात्तत्वात्किप्रत्ययांतस्यांतोदात्तत्वात्तस्यैवप्रयोगदर्शनमुत्तरेहेतुः कर्मसाधनइति
एतद्भावसाधनेनिवृत्त्यर्थमुक्तं विधीयतइतिवाक्यप्रदर्शनंसुखप्रतिपत्त्यर्थं
बइत्यनुपपन्नमतआह मत्रेति औणादिकेनिति उइगुपधात्किदित्यु
नेनेतिभावः स्वरेचेति बहुलग्रहणादौणादिकस्यापिकर्मणिसंभवइतिभावः प्रयोगदर्शनमिति त्रैस्वर्येणाष्टाध्यायीपाठादिहवेदेलोकेचेतिशेषः एतद्भावेति तथासतिपूर्वपदकर्मकेविधानेइत्यर्थापत्तौसमासाद्यसंग्रहःस्यादत्तत्साद्यादेशविधौचातिप्रसंगःस्यादितिभावः॥ ॥राम॥ राम०
१
६४७

इहसत्त्रे इतरइति प्रकरणपर्यालोचनयेतिभावः समासंपदंवृत्तिमात्रोपलक्षणं समुदायेवेति सत्त्ववयवभूतपदानांकार्यः समस्तस्यावयवातिरिक्ततयाअपिस्वीकारादितिभावः विभक्त्यंतस्यपदत्वात्सुभिभक्तिविधानस्यकथंपदोद्देश्यकविधित्वमित्याशंक्याह विभक्तीति एवंहीति विहितोनांनियमस्याविधिना

किंपुनरिति कार्यविशेषस्येहानिर्देशात्प्रश्नः इतरोवक्ष्यमाणान्कार्यविशेषान्पर्यालोच्याह समासइति अनंतरस्यापिपरांगवद्भावस्यात्त्वविषयत्वादनादरात्संल्लिंगिग्रहणाच्चातिप्रसंगनिरासस्यसिद्धत्वान्मुख्यप्रयोजनत्वाभावात्पश्चान्निर्देशः कृतः। तत्रसमासशब्देनसंज्ञावोच्यतेसमुदायोवासंज्ञीविभक्तिविधानशब्देनसामान्यविहितानांविभक्तीनांकर्मणिद्वितीयेत्यादिनायोनियमःसउच्यते। एवंहिपदविधिर्भवति। अथाप्येकवाक्यताश्रयणेनविभक्तीनांविधानेतथापिपदांतरसंबंधेनपासांविभक्तीनांविधानमंतराअंतरेणयुक्तइतिनिद्रविभक्तोनेनेविशिइतितदाश्रयेणपदविधित्वमस्येवातथाचोक्तं। निरपिपदंविशिरपिपदमिति तत्रविभक्त्यवच्छिन्नत्वाद्विशिष्टविधानंकर्मसामान्यविधानेक्रियामात्रभवति। यथोक्तंसामान्यपुपेरनयवपुषिःकर्मेति॥

पक्षद्वातेतरविभक्त्यंतानांनिवृत्तिरूपस्याश्रयणेनसानिवृत्तिःपदोद्देशिकेत्यर्थः केचित्तुपदोद्देश्यकःपदत्वसंपादकोवासर्वोपिपदसंबंधित्वात्पदविधिरेवेतिवदंति ननुकिंविधीयतइतिप्रश्नेविभक्तिविधानमित्युत्तरमयुक्तं विधानस्यविधानकर्मत्वाभावादतआह तत्रविभक्त्यवेति एवंचसामान्यविहितायाभावेनान्यमइतिभावः क्रियाविशेषणत्वाच्चकर्मत्वं॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रूपद्वयमिति॰ यद्यपि सर्वमपि तत्र तथापि एतद्रूपं तया शास्त्रे व्यवहाराभावात्तन्नोक्तं॰ अन्येनेति॰ पूर्वपक्षिणा सिद्धांतिना चेत्यर्थः॰ आद्येनेति॰ पाठे किं पुनरिति संदेह कर्त्रेत्यर्थः॰ अन्यथा आधिकारपरिभाषयोर्विशेषाज्ञाने॰ फलोरव्यानेनास्यानिर्देशार्थ इत्येतत्॰ स्वरूपं॰ योगे योगे उपस्थितिरूपं॰ लिंगोपादानेनेति॰ स्वरितत्वप्रयु क्ताधिकारेण तत्र तत्र तत्तत्सदोपस्थितिः॰ अधिकारांतरं दृष्ट्वा व्याख्यानाद्वा निवृत्तिश्चेपरिभाषायास्तु लिंगवति सर्वत्रा तेषां सर्वेषामत्रोपस्थित्यर परिभाषायाना

कार्यविशेषानिर्देशादस्यपारार्थ्यमवगत्य परार्थं यद्रूपद्वयं दृष्ट्वा पृच्छति॰ किं पुनरिति॰ नन्वधिकारेस्मिन्पदविधिग्रहणमनर्थकं उत्तरेषां पदविधित्वाव्य भिचारात् तस्मात्पदविधिग्रहणात्परिभाषात्वनिश्चय मात्रस्यानुपपत्तिः एवं तर्हि युक्तायुक्तत्वविशेषप्रश्नः॥ तत्र यद्यधिकारपक्षः स्यादयुक्तत्वं तदा नकर्तव्यं पदविधिग्रहणं॰ परिभाषायां युक्तत्वे कर्तव्यं॰ अधिकारपक्षेपि विस्पष्टार्थं भविष्यति॰ कः पुनरिति॰ अन्योन्यप्रष्टा विज्ञेयः॥ अन्ये न तु नदिष्टेरपन्नेन भवि तव्यं अन्यथा किं पुनरयमधिकार इति प्रश्नो नोपपद्यते॰ अधिकारः प्रतियोगमिति॰ स्वरूपे पृष्टे फलाख्यानं तद्वारेण स्वरूपावबोधार्थं॰ अधिक्रिय माणस्य हि प्रतियोगमुपस्थाने सति तदनिर्देशः फलं संपद्यते॰ परिभाषा पुनरिति॰ लिंगोपादानेन परिभाषा क्रियमाणा यत्र यत्र तल्लिंगोपलंभः तत्र व्याप्नोतीत्यर्थः॰ प्रदेशांतरे पुपरार्थतो सामान्यादधिकारपरिभाषयोरभेदेन व्यवहारो भाष्यकारस्याधिकारो नाम त्रिप्रकार इति॰ तथा द्वयोः परिभाषयोः सावकाशयोः समुपस्थितयोरिति॰

तत्र तत्रोपस्थित्या स्वार्थोपस्थितिद्वारा व्याप्तिरिति भावः॰ इदं च षष्ठीस्थानेयोगा इति सूत्रे निरूपितं॰ तदुक्तं मेकदेशस्थितः शास्त्रमैव नेपातिदीपवत्परितो व्याप्नो तीत्यापि परिभाषाप्रचक्षते॰ प्रदेशांतरे ष्विति॰ षष्ठीस्थाने इति सूत्रे आद्ये॰ निपात एकाजनाङ् इति सूत्रे चोक्ते॰ तत्र च परार्थ सामान्यादतिदेशसंज्ञयोः परिभा षात्वेन व्यवहार इति बोध्यं॰ राम २

६४८

स्वरितगुणयुक्तमिति॰ स्वरवच्छब्दात्तदर्थे णिचिमतोर्लुकिष्ठ लोपाभावे प्रयोगवृत्तपरिभाषयाव्यवधाने आहुणेरूपमिति भावः॰ यद्वा अर्शआद्यजं तस्वरशब्दात्सिद्धमिदं रूपं॥ यावतीति॰ भाष्ये सर्वमित्यस्य लिंगवत्सर्वं शास्त्रमित्यर्थः॥ तानि सर्वाणि पदविधिशब्दोपादानेन सामान्यतः पदवि

कः पुनरत्रेति॰ कस्मिन्पक्षे यत्नस्य लाघवं भवति कस्मिन्वा गौरवमिति प्रश्नः॥ स्वरयितव्यमिति॥ स्वरितगु णयुक्तसमर्थग्रहणं पठितव्यमित्यर्थः॥ स्वरितो॥ तत्र॥ गुणः क्रियारूपेण स्वरयितव्यमिति निर्देशः यथा श्वेतो गुणः श्वेततत इति॰ पदविधिग्रहणं चात्र पक्षे न कर्तव्यमित्यर्थो युक्तं भवति॰ सर्वं न पेक्ष्यमिति॰ यावं ति पदकार्याणि तानि सर्वाण्यपेक्ष्य पदविधिशब्दोपादानेन परिभाषा कर्तव्येत्यर्थः॰ अन्यास्वपि परिभा षासु यल्लिंगमुपादीयते तल्लिंगयुक्तापेक्षा क्रियते॰ द्वैतमिति॰ द्वयोर्भावो द्विता तात्र भवं द्वैतं संशयरूपं ज्ञा नमुच्यते॰ अथवा द्वाभ्यामिति प्रकारद्वयेन विरुद्धत्वाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीत तत्र भवं द्वैतं तदेव संशयज्ञाने॰

धित्वेनापेक्ष्यानूद्यत इत्यर्थः॥ द्वयोर्भावो द्विता इति॰ कोटिद्वयेसत्त्वेव संशयोदयात् द्वित्वमवः संदेह इति भावः॰ द्विविषयनिश्चयस्यापि द्वित्वनवत्वादाह अथवेति॰ विरुद्धत्वाद्भिन्नाधारवर्तिना प्रकारद्वयेन युक्तमित्यन्वयः॰ परस्परविरुद्धधर्मद्वयवद्वस्तुद्वयमित्यर्थः॥ ॥श्री छ छ छ छ॰

कौ०वि०२ अनेकार्थस्यैकार्थत्वमेकार्थीभाव इति शब्दयुक्तिमनुसृत्य जहत्स्वार्थाजहत्स्वार्थयोस्तं दर्शयित्वा नाद्यावजहत्स्वार्थामात्रं दर्शयति। यत्रेत्यादिनानीति। उपसर्ज
नपदानीत्यर्थः। तदेव व्याख्यानयन्नाह। उपसर्जनभूतस्वार्थानीति। इतरविशेषणभूतस्वार्थोपस्थापकानीत्यर्थः। ननु पृथक्स्वार्थोपस्थापकानीति नास्त्यर्थं
एवं च तत्पुरुषादावेकपदं तावत् बहुव्रीहौ द्वन्द्वे च पदद्वयमपीति बोध्यं। जहत्स्वार्थायामाह। निवृत्तस्वार्थानिवेति। उभयत्रापि हेतुः प्रधानार्थोपादानादि
ति। आद्ये प्रधानार्थेन स्वोपस्थितिकाले एव उपसर्जनपदार्थस्य विशेषणतयोपादानादित्यर्थः। अंत्ये प्रधानेन पदेन तदर्थस्याप्युपादानादित्यर्थः। बहु
व्रीहौ तु प्रधानपदं समुदाय इति बोध्यं। एवं द्वन्द्वेपि प्रधानपदं समुदायस्तदर्थेन साहित्येन स्वविशेषणतया यथा द्यर्थस्योपादानादुपसर्जनभूतस्वार्था

एकार्थीभाव इति। यत्र परान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वा[illegible]र्थानि वा
प्रधानार्थोपादानात्स्वार्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः परस्पराकांक्षारूपा व्यपेक्षा।

नि। यद्वा विशेष्यसाहित्येनोपस्थापकतया प्रधानेन समुदायेनैव वा द्यर्थस्याप्युपादानान्निवृत्तस्वार्थानिवेति तत्राव्ययनेकार्थीभावः समाहारे तु रेत
रयोगयोरपि साहित्यविशिष्ट्यं। आद्येऽनुद्भूतावयवभेदः। अंत्ये उद्भूतावयवभेदः इत्येव तयोर्भेद इति बोध्यं। अर्थानीति। सन्निहितत्वान्निवृत्तस्वार्थानीत्येनेन
स्यान्वयि। आद्ये आह। अर्थान्तरेति। अर्थान्तरान्वितस्वार्थाभिधायीनीत्यर्थः। प्रत्येकशक्तिसहकृतसमुदायशक्त्या विशिष्टार्थप्रतिपादकानीति भावः। पदा
नीति बहुवचनं तु बहुव्रीह्याद्यभिप्रायेण। स एकार्थीभाव इति। आद्ये एकीभूतार्थानि मिलितार्थानीत्यर्थः। तत्र मिलनस्येतरसाकांक्षत्वाद्धर्मो रपिस
मर्थत्वं तत्पुरुषादौ अंत्ये पदद्वयार्थयोरेकपदार्थत्वप्राप्तिरित्यर्थः। परस्परेति। विशब्दस्य क्रियाव्यतीहारे वृत्तित्वादिति भावः॥ ॥राम राम रा राम 3

६४९

तत्रैवैकार्थीभावस्येति। तदुक्तन्यायेनं भ्रष्येत त्रैनेत्यर्थः। व्यपेक्षासहिताधिकारत्वेऽधिकारत्वप्रयुक्तदोषमाह भाष्ये ऽन्यत्र रवत्वपीति। एकार्थीभावसहिताधिका
रत्वेऽधिकारत्वप्रयुक्तो दोषस्तु मध्येपार इत्येमि वत्त्वात्ततीयाध्यायारावसं बंधो बोध्यः। एतेनाधिकारत्वसहितोभयविधसामर्थ्याश्रयणपक्षोपि निरस्तः।
उभयविधेइति। अधिकारत्वे परिभाषात्वे चेत्यर्थः। भेदो वैरूप्यलक्षणः। ननु परांगवद्भावविधानासंग्रहो दोषोत आह। तत्रेति। व्यपेक्षाऽविनाभावित्वा

समास एक इति। तत्रैवैकार्थीभावस्य सद्भावात् तत्रेति। एकार्थीभावः सामर्थ्यमधिकार इत्येकः पक्षः। व्यपेक्षा सामर्थ्यमधिकार
इति द्वितीयः। द्विविधं सामर्थ्यमधिकार इति तु तृतीयः। एवं परिभाषायामपि त्रयः पक्षा इति षट्पक्षी संभवः। एकार्थीभावः परिभाषा
कौ०३ चेति निर्णयः। अभिन्न[illegible]तरं भवतीति। उभयविधसामर्थ्याश्रयणे त्वर्थस्य भेदात्तत्र स्यभेदः स्यात् भिन्नेन सामर्थ्येन भिन्नेषु
वाक्येषूपस्थानात्। व्यपेक्षायामेव सामर्थ्यं यद्यपि सूत्रमभिन्नं भवति तथाप्येकार्थीभावे सामर्थ्यदोषाभावात्सकर्षयोगादभिन्न
तरकमिष्यते तत्र परांगवद्भावेतन्निमित्तग्रहणदोषाभावः। विभक्तिविधानेपि कारकविभक्तिषु क्रियाकारकयोर्व्यपेक्षाविना
भावित्वात् उपपदविभक्तिषु युक्तयोगग्रहणसद्भावोत्क्षिप्तयेतीया योगस्याक्षेपादेतद्दनुपस्थानेपि न दोषः। परिभाषापक्षेपि
सुब्धातुप्रभृतयः सर्वो वृत्तयः संगृहीता भवंतीति। एकार्थीभावे चेहाश्रिते न्यत्र युक्तग्रहणं च कृतमेवेति तत्रापि न दोषः॥ ॥
त्वादिति। व्यपेक्षायानियतत्वादित्यर्थः। एवं चैतदुपस्थितिं विनापि तत्र न दोषः क्रियाकारकयोरेकार्थीभावासंभवश्चेति भावः। अत्र क्रियाकारकयोरित्युक्त्या
प्रकृत्यर्थविभक्त्यर्थयोः सर्वथा व्यपेक्षाभावो दर्शितः। इदानीमेकार्थीभावसहितपरिभाषापक्षे उक्तं प्रकर्षयोगमुपपादयति। सुप्धातुप्रभृतय इति। ए
तेनाधिकारत्वे एतदसंग्रहो दोष इति ध्वनितं। अन्यत्र युक्तग्रहणमिति। तथा च तदेवात्रैकार्थीभावसामर्थ्याश्रयणे लिंगमिति भावः॥ ॥

के०वि०२ समर्थानांप्रथमाद्वित्यत्र समर्थपदस्यकृतसंधिकार्यार्थकत्वमज्ञानानआह· एषुमपिकश्चिदिति· लिंगादिति· एतल्लिंगमलत्वात्कुत्सितइति सूत्रभा
ष्योक्तन्यायादिसर्थः· कृतसंधिकार्यत्वार्थकत्वेमपितत्रतदर्थे· सोऽपितावतरंगत्वेनैवपूर्वसंधिकार्यप्रवृत्तेर्विप्रतिषेधसूत्रेभाष्येउक्तत्वात्· पंचके

समर्थानामिति· घकालतनेषु कालनाम्नइत्सलुग्विधानाल्लिंगाद्विभक्त्यंतात्तद्धितउत्पद्यते
इतिपदविधित्वादेतत्परिभाषोपस्थानाद्सामर्थ्येप्रत्ययाप्रसंगात्· कर्मएयणिति· पंच
कप्रातिपदिकार्थपक्षेप्रातिपदिकेनैवकर्मणउपादानान्नास्तिपदविभिन्नत्वं· त्रिकादिपक्षे
तुविभक्तिवाच्यत्वात्कर्मणः पदविधित्वादेतत्परिभाषोपस्थानान्नास्तिदोषः॥ ॥

ति· इदंचिंत्यं· तत्पक्षेपितदर्थद्योतकतयाविभक्तेराक्षेपकत्वात्· भाष्येएवेपष्ठ्याशयस्तेवंपदविधिशब्देनपदोद्देश्यकविधिग्रहणं· एवंचसाक्षा
त्पदोद्देश्यके समासतद्धितादावेवस्यान्नत्वत्र· अत्रहिनसाक्षादुद्देश्योधातुर्नसपदं· किंचधातोरएकर्मण्युपपदसंज्ञासितिसूत्रार्थोहान्नियोग रा म
शिष्टन्यायेनतत्रसतिप्रत्ययइतिनतदुद्देश्यकःप्रत्ययविधिःउपपदसंज्ञायास्तदुद्देश्यकत्वेपितत्रैकार्थीभावसाम्यद्धितीयाभावइति॥ ४

६५०

देवदत्तस्यकुंभंकरोतीत्यादौप्रत्ययनिवृत्तयेसमर्थग्रहणस्यावश्यकत्वात्किमुच्यतेगम्यतेतत्रसामर्थ्यमित्यतआह· यदीति· प्रयुक्तानामिदमन्वाख्या
नंलोकप्रयुक्तासाधोरेवानिवर्तकमितिनदोषइतिभावः· भाष्यउत्पन्नेहीति· हिस्त्वर्थे· यथासमासादयइति· अन्यथात्रापितद्वैयर्थ्यंस्यात् प्रयुक्तप्र

नतुचेति· यदिकुंभकारशब्दःसमर्थाभिधायीवासमर्थाभिधायीवस्यात्ततोसमर्थाभिधायिप्रयोगनिवृत्त्यर्थोयत्नःकर्तव्यः
स्यात्नत्वन्यथेतिभावः· सएवतावदिति· यथासमासादयोऽसमर्थानांमाभूवन्नित्येनमर्थमिदंवचनंक्रियतेतद्वत्रापिस
मर्थग्रहणमसामर्थ्येप्रत्ययनिवृत्त्यर्थंकर्तव्यमित्यर्थः· प्रतिविधानंतुसुज्ञानत्वाद्ग्रन्थकृतानोक्तं· यत्तुउपपदमितिमहत्याःस
ज्ञायाःकरणंप्रत्ययस्यपदाश्रयत्वेसतिसमर्थपरिभाषाव्यापारार्थमेव· अथेति· प्रधानपर्यनुयोगद्वारेणसूत्रस्यैवाक्षेपः· य
द्यप्यनेनसामर्थ्यंनविधीयते· नाहस्वतोसमर्थस्यसामर्थ्यंवचनेनकर्तुंपार्यतेतथापिपदविधौसामर्थ्योपस्थानार्थत्वादस्यस
मर्थपदस्यप्राधान्यमुच्यते· समस्येतइति· यद्यपिसमाससंज्ञामात्रंविधीयतेतथाप्यबुधबोधनायभिन्नयोःशब्दयोःसंश्लेषः
प्रक्रियायांक्रियतइतिसमस्यतइत्युक्तं·
युक्तत्वविवेकरहितानामर्थेइहेवतत्रापिकर्तव्यमित्यर्थः· महत्याःसंज्ञायाइति· संज्ञासूत्रस्यतत्रग्रहणस्यचेत्यपिध्येयं· यथाकथंचित्पदसंबं
धिविध्येसत्रग्रहणमितिभावः· नविधीयतइति· एवंचनतस्यप्रधानत्वमितिभावः· सामर्थ्योपस्थानम्· समर्थपदोपस्थानम्॥ ॥श्रीः॥

कैं०वि०२

पश्यदेवदत्त कष्टमिति क[illegible]पदार्थमाह श्रितइति नन्वसत्यपि समर्थग्रहणे एकार्थीभावाभावे ऽनर्थकत्वेन प्रातिपदिकसंज्ञाऽप्रवृत्तौ फलाभावात् समासोपि न स्यात् सत्येतु [illegible]कार्थीभावनति चरितार्थमित्यत आह असतीति सत्रे इति नन्वेकार्थीभावविषये एव समासः शिष्टैः प्रयुज्यते इति कथमेतदत आह वचनाश्रिति [illegible]क्षणमात्रशरणं प्रति सूत्रारंभ इति भावः ननु फलाभावोत आह वचनादिति कृत्तद्धितेति वचनादित्यर्थः कार्यसंबंधिनमिति विष्णुमित्रादयो बा[illegible]संबंधिनः नाप्युपादानविकलइति उपादानेन कृतौ विकल इत्यर्थः तिष्ठत्विति तिष्ठत्वेकुशलया न प्रयोजनं मुश

पश्येति असतिस[illegible]द्वितीयांतमात्रेश्रितादिभिः समस्येताविरोधात् एकार्थीभावाभावेपि वचनात्समाससंज्ञा स्यात् अर्थमेकस्यापि समासस्य वचन[illegible]प्रातिपदिकसंज्ञा स्यात् विध्यर्थत्वसंभवे च समासग्रहणस्य नियमार्थत्वानुपपादत्वादेकस्य प्रातिपदिकसंज्ञानिषेधः कर्तव्य एव स्यात् [illegible]कार्थीभावाभावेपि चोत्तरः पदार्थस्य बाह्यसंबंधिनं प्रतियोग्यत्वाहानादिभिः क्रमः स्युरेव खंडोधावतीति तृतीयांतार्थकृतत्वमत्रास्तीति समासः स्यात्॥ ॥

तेन कृतः खंडो धावतीत्यर्थः [illegible]कुलयेति सह्योगे तृतीयेत्यपि कश्चित् हे विष्णुमित्र त्वं शंकुलयाकिं कुरु ष्यसि उपलेन प[illegible]णेन कृतः खंड इत्यादृतीयार्थः नन्वत्र खंडस्य प्रकृततृतीयांतार्थकृतत्वं नास्तीत्यत आह तृतीयांतार्थेति तच्छब्देन तृतीयांतमात्रं परामृश्यते त[illegible] खंडनस्य करणसाध्यत्वावश्यंभावादवश्यप्रसक्तेवेति भावः प्रत्यासत्तिर्नाश्रीयत इत्यभिप्रायः वक्ष्ये इत्यस्य समीपे धारीति क्रियाप्रत्युपादाना[illegible]य इदं त्वाद्देवदत्तो वस्त्ररक्ष्य इति मार्गे संभावितमपि वृकमयेत्युक्तामंद्रक्षणार्थत्वेन गच्छेति का कार्थः॥ ॥ ७

राम ५

६५१

अस्ये चात्रेति सर्वेषां कार[illegible]णां साक्षात्परंपरया वा क्रियायामन्वयादिति भावः नाप्येतदिह कस्मान्नेति समास इति शेषः महाकष्टं श्रित इति एतदिह केयदेवं वास्मतदा समासेन म[illegible]हाकष्टश्रित इति भवतीत्यर्थः तदा न भवितव्यमिति समासेनेति शेषः ननु पदिसामर्थ्यमस्त्येवास्तु समासः को दोष इत्यत आह यद्यत्रेति तदा मह[illegible]कष्टेति महदिति पृथक्पदं महाकष्टं श्रित इति एतद्दिह केसमासे यएवाहीनेद्वितीयेत्यनेन पूर्वपदप्रकृतिस्वरे कृका

महत्कष्टमिति [illegible]सेवात्र श्रयणक्रियया सामर्थ्यमिति प्रश्नः यद्यत्र कष्टश्रितशब्दयोः समासः स्यात्तदा महत्कष्टश्रित इति स्यात् अथा[illegible]त्रयाणां पदानां समासः स्यात्तथापुनरपदो वर्धीयमानमात्मे मध्यमपदे न स्यात् अथापित्रयाणां समासे कृते सन्महा[illegible]तिहयोः समासः पश्चान्महाकष्टश्रितो महाकष्टश्रित इत्यत्राहीनेद्वितीयेति स्वरो भवति स एव समासस्येत्यनेन तथा[illegible] महारण्यातीत इत्यत्र स्वरो भिद्यते महारण्यमतीत इति द्विपदे समासे कृते थाथादिस्वरः त्रिपदे तु समासे कृते सन्म ह[illegible]तिहयोस्तत्पुरुषे सति महारण्यशब्दः समासे स्वरेणांतोदात्तः स्यात् यथा पूर्वशालाप्रियेशालाशब्द उदात्तः॥

राकार उदात्तः त्रिपदसमासे [illegible]यांतरतत्पुरुषे तस्य समासांतोदात्तत्वेपि स एवेत्यर्थः समासस्येत्यनेनेति अवांतरतत्पुरुषनिमित्तकेनेत्यर्थः थाथादिस्वर इति क्तप्रत्ययाकाव उद[illegible] इत्यर्थः तेनांतोदात्तविधानात् यथेति तत्रापि त्रिपदे बहुव्रीहौ अवांतरतत्पुरुषे तद्धितार्थेत्यनेनजाते सति शिष्टत्वाद्वांतरतत्पुरुषप्रयुक्तः स्वर इत्यर्थः॥

Dr. BHAU DAJI MEMORIAL

कै०वि०२

परंतु महान्देवदत्तः प्रियोयस्येति त्रिपदबहुव्रीहौ महादेवदत्तप्रियइत्यस्याभावाय महद्देवदत्तप्रियइत्यस्य सिद्धये त्रिपदसमासेऽवांतरपदयोः सम
हदिति समासप्रवृत्तिर्बहुलग्रहणादिति महत्कष्टश्रितइत्यत्रैकपद्येनैकस्वरः स्यात्तच्च नेष्यत इति भाष्याभिप्रायः• विशेषणविशेष्यणस्येत्रिपदेस
मासेवांतरपदयोरप्रवृत्तिस्तत्रशेषेवदतीत्यस्यं च भगतानापूर्वनिपातनियमार्थानां च तत्राप्रवृत्तिरुक्तप्रायेवेत्याहुः॥ ॥परस्परसंबंधाभावादिति•

अन्येत्वाहुः त्रयाणां समासे कृते प्रधानार्थाभिधायित्वान्महत्कष्टयोः परस्परसंबंधाभावा
त्पूज्यमानत्वे विशेषणविशेष्यत्वे च नास्तीति समासो न स्यात्• ततश्चावांतरसमासो न स्यात्• अत्र हीनेप्सूती
यतिमहत्कष्टस्य प्रकृतिस्वरः प्रसज्येत• न चाभवतीति• यथा भार्याराज्ञः पुरुषो देवदत्तस्येत्यत्रा
त्वंतमसमासो नैवमिहेति भावः• भवति पदेति• श्रितमनपेक्षमाणयोः परस्परापेक्षायां महत्क
ष्टयोः समासे ततः श्रितशब्देन समासः॥

पृथगेकार्थीभावादित्यर्थः• पूज्यमानत्वमिति• कष्टेन महत्त्वस्यान्वयाभावादितिभावः• विशेषणविशेष्यत्वंचेति• अन्येनैकार्थीभावादेव परस्परंत
त्वाभावदत्यर्थः• समासो न स्यादिति• अवांतरतत्पुरुषो न स्यादित्यर्थः• स्वरश्च प्रसज्येतेति• सौवरीण सप्तमीनां तदंतसप्तमीत्वादहीनवाचिक्तौ तोत्तरपदां राम
तस्य समासस्य स्वविधिद्धितीयांते पूर्वपदप्रकृतित्वस्याधीदितिभावः• अत्रारुचिबीजं तु त्रयाणामेकार्थीभावे द्वयोरपि सोस्त्येव पृथगेकार्थीभावाभावेपि न क्षतिरिति• ६

६५२

सामान्येति• अन्यथैकपदस्य समासाभावेन एकवचननिर्देशोसंगतः स्यादितिभावः• तत्फलं दर्शयति• पदद्वयात्सकस्येति• सुबिस्तनेन सुबंतसमुदा
याग्रहणे हेतुमाह• संख्यापाइति• अनियतसंख्यावच्छिन्नस्य संज्ञित्वेऽव्यवस्थापत्तेस्तद्विशेषाकांक्षायामुपात्तसंख्यैव विवक्षितेत्याशयेनेद

कस्यकस्मादिति• सामान्यनिर्देशः पदद्वयात्सकस्य पदत्रयात्सकस्य वा समुदायस्य प्रदर्शनार्थः• बहू
नांकस्मान्न भवतीति• द्वयोरपि श्रितोपक्षयात् [illegible]कर्मत्वेश्रितेन सामर्थ्यं द्वयोरप्यस्ति। कष्टस्येव वा
कर्मत्वे तद्द्वारेण महतोपि श्रितेन सामर्थ्यमस्तीति भावः• सुप्सुपेति वक्तेत इति• संख्याया विवक्षितत्वा
देकस्यैव सुबंतस्यैकेनैव सुबंतेन समासस्ततो बहूनां न भवतीत्यर्थः• यथा पशुना यजेतेत्यत्रैकस्य
यज्ञे उपादानाभावस्तथेहापि• ननु च भो इति• यथा ब्राह्मणो न हंतव्य इति सर्वस्य ब्राह्मणस्य हननप्रतिषेध
स्तथेहापि बहूनां समासेन भाव्यमिति भावः

ष्टांतमाह• यथा पशुनेति• आक्षेप्तोत्र वर्तमानस्य शास्त्रस्यापि तदाश्रयबहुव्यक्तिषु युगपत्प्रवृत्तिर्न दृष्टेत्याशंक्याह• यथा ब्राह्मण इति॥ ॥

कै०वि०२ एकैकस्यामिति। तस्यामेवेत्यर्थः। प्रत्ययाभिधाने इति। ज्ञानव्यवहारे इत्यर्थः। तथा सुबंतसमुदायस्येति। प्रत्ययग्रहणपरिभाषया तस्मात्सुबंतत्वात्सुबं
तसमुदायस्याविवक्षितैकत्वसुप्पदेन वक्तुं शक्यत्वादिति भावः। चिकीर्षित्वं विधेयत्वे। सचिस्कीर्ष्यस्येत्यपाठः। लक्षणाद्यर्थाभावात्सकृटो प्राप्तेः स

आकृताविति। एकस्यां व्यक्तौ जातिनिमित्तप्रत्ययाभिधानसद्भावात् तत्र यथा प्रा
तिपदिकसमुदायस्य प्रातिपदिकत्वात् तनो विभक्तौ गामनुत्पन्नित्यथा सुबंतसमु
दायस्याश्रितेन समासाभावः। प्रत्ययस्य सुबंतसमुदायस्य च संचिस्कीर्ष्यस्य प्र कौ २
धानत्वाद्गुणत्वाच्च प्रातिपदिकस्यावयवमात्रस्य सुबंतयोराधारगताया एकत्वसंख्या
याविवक्षणात्॥

सोनुपयोगाच्चेति बोध्यं। गुणत्वाच्च प्रातिपदिकस्येति। प्रधानगता संख्या विवक्ष्यते इति ग्रंथास्तु आर्षे प्राधान्यमादाय बोध्याः। आधारगता राम
याइति। जात्याधारद्रव्यगता संख्या विवक्ष्यते इत्यर्थः॥ ॥ ॥ ७

६५३

नन्वेवं ब्राह्मणेन हंतव्य इत्यत्रापि जात्याश्रयसंख्याया अविवक्षा स्यात्तस्यापि गुणत्वात् अत आह। ब्राह्मणसमुदायस्येति। शास्त्रार्थीति क्रांत एवेति। न्या
येनैवं शास्त्रार्थी जातेकस्यातिक्रम इति चिंत्यं॥ ॥परे तु सुप्सुपेति वर्त्तते इति भाष्यस्याकृतिसुप्रत्येकं समाप्यते इति वक्ष्यमाण आशयः। इतरस्तु एकत्व
विवक्षयैव सुबंतस्यैव सुबंतेन समास इत्यर्कमिति मत्वाशंकते। ननु च भो इति। आकृताविति प्रवृत्तिनिमित्ताश्रयसर्वव्यक्तावित्यर्थः। अन्यथा व्यक्तिवा
देपि वानिगमनाविरहाद्रूपसामान्येन सर्वत्र कार्यप्रवृत्तेस्तदुक्तिरसंगता स्यादेवं चैकत्वविवक्षा कर्तुमशक्येति भावः। सिद्धांती स्वाशयं प्रकाशयति। आ
कृताविति। शब्दप्रवृत्तिनिमित्तं त्वित्यर्थः तदेवाह। यावत्सत्तत्समाप्यते प्रातिपदिकादितीति। एतत्सद प्रवृत्तिनिमित्तं प्रातिपदिकत्वादीत्यर्थः। द्वयोश्चेति पद
द्वयप्रवृत्तिनिमित्तप्रत्येकद्वयोरित्यर्थः। अयं भावः। यथा स्वांगत्वजनपदत्वादेः प्रत्येकं समाप्त्या स्वांगसमुदायजनपदसमुदाययोर्न स्वांगजनपदग्रहणे

ब्राह्मणसमुदायस्य तु हननेन शास्त्रार्थोऽतिक्रांत एवं भवतीति ब्राह्मणो न हंतव्य इत्यादौ निषेधे संख्या न विवक्ष्यते॥ ॥श्रीरामश्रीराम

नग्रहणं तथा प्रकृतेपि। न च स्वांगादित्याद्यवयवैकत्वविवक्षया तदर्थलाभः तत्रैकत्वस्य वाचकप्रत्ययप्रकृत्यर्थे स्वांगत्वाचकशब्दान्वितत्वेपि स्वांगानन्वि
तत्वेनैकस्वांगवाचकादित्यर्थलाभात् एकोयं स्वांगवाचकः शब्द इत्येतावतएव तैतो लाभात्। एवं चोद्देश्यगतौ संख्याविवक्षितैवेति मीमांसकसिद्धांते
विरोधोपि न। किंच प्रातिपदिकसमुदायात्तद्धितशंकायां तत्समाधानपरे मतुप्सूत्रस्थभाष्ये। नवै यटो कप्रकारोन्याय्यः। तत्र ऽ प्रातिपदिकादित्यस्य
समस्तत्वेन समासे संख्यापाभावेनैकत्वस्याभानात् स्वसमानाविनत्यर्थकत्वं तु समाहारान्वयीति बोध्यं। न चैतत्स्वपि स्वधिकरणेरनेकैः समासा
द्विचारणोर्थसा। स्त्रीभ्योढगित्यादेः स्त्रीप्रत्ययांतसमुदायाद्योपत्तेस्तत्रापि सत्वात्। यथा च तत्र न हुवचनसत्वेप्येकैकस्त्रीप्रत्ययांतादेव प्रत्ययस्तथान्य
त्रापीत्याहुः॥

प्रधानार्थाभिधायिनेति॰ प्रधानार्थविशेषणीभूतस्वार्थोपस्थापकेनेत्यर्थः॰ प्राधान्यं॰ स्वार्थमात्रोपस्थापकत्वं॰ कथमेकार्थीभावश्चेति॰ कथमन्यविशेषणत्वेनैवोपस्थितिरित्यर्थः॰ इतरविशेषणत्वेनोपस्थितस्य स्वविशेषणेनाकांक्षाभाव इति भावः॰ प्रधानस्य सापेक्षत्वेपि वृत्तावुपपत्तिमाह॰ प्राधान्यादेवेति॰ नन्वेवं राजपुरुषो भार्याया इत्यपि स्यादत आह॰ सामान्येत्यादि॰ उपात्तविशेषणविजातीयविशेषणयोगः प्रधानस्यम

सापेक्षमसमर्थं भवतीति॰ न्यायो येन वृत्तावुपसर्जनभूतपदेन प्रधानार्थाभिधायिना भाव्यं स्वविशेषणापेक्षायां च तस्य प्राधान्यमिति कथमेकस्यैकदा प्राधान्यमेकार्थीभावश्च स्यात्॰ इतरेस्तु वचनमेतदिति मत्वा चोदयति॰ यदि सापेक्षमिति॰ भवतीचेति॰ प्राधान्यादेवानेकेनोपकारकेणोपकार्यत्वाविरोधात्सामान्याप्रयोग इति लिंगदर्शनाच्च॰ समुदायापेक्षेति॰ गुरुकुलादिना समुपजनितेव्यतिरेके देवदत्तस्येति षष्ठी॥ अवयवद्वारकश्च देवदत्तस्य समुदायेन संबंध इति सामर्थ्यादवयवमपि विशेषस्य शति॰ तदुक्तं॰ समुदायेन संबंधो येषां गुरुकुलादिना॰ संस्पृश्यावयवांस्ते तु युज्यंते तद्वता सहेति॰

वतीति ज्ञाप्यत इति भावः॰ यद्यपि समासे विशिष्ट एवान्वय इति प्रधानस्य न सापेक्षत्वं तथापि दर्शनीयत्वाद्यन्वये पुरुषत्वमेव विशेष्यतावच्छेदकं न राजसंबंधोपीत्याशयेन तथोक्तिरिति बोध्यं॰ भाष्ये सर्वे गुरुकुलमिति॰ गुरुसंबंधविशिष्टं कुलं सर्वमपेक्ष्यते न तु तदवयवो गुरुरित्यर्थः॰ तदाह॰ गुरुकुलादिनेति॰ नन्वेवं गुरोर्देवदत्तसंबंधित्वं न लभ्येतेत्यत आह॰ सामर्थ्यादवयवमपीति॰ येषामर्थानां गुरुकुलादिरूपसमुदाये न संबंधस्तेप्यर्थाअवयवांस्तस्य स्पृश्य संबध्यंत इत्यतो युज्यंत इति नात्रपेक्षावयवानां तत्संबंधालाभ इत्यर्थः॥ ॥ राम ८

६५४

किमः प्रश्नं तापेक्षत्वमुपपादयति॰ केषां शालीनामिति॰ न तु शालीनां कीदृश ओदन इत्यर्थ इति भावः॰ कलमोत्थः शालयः॰ आपणीयानां मध्ये सक्काढकमित्यर्थो नेत्याह॰ आपणीयानां सक्तूनामिति॰ उक्तार्थेउपपत्तिमाह॰ अनेकत्वादिति॰ एकत्वेपि तस्याह॰ तदवयवायवानां वेति॰ सामीप्यादेरपीति॰ सामीप्यादिनिरूपितसंबंधस्यापीत्यर्थः॰ अवयवद्वारकसंबंधस्येनात्र भाव मित्यत्रानियामकाभावादिति भावः॰ भाष्ये नवासमुदायापेक्षेति॰ एवं

किमोदन इति॰ केषां शालीनां किं कलमानां अथ रक्तशालीनां मन्येषां वोदन इति प्रश्नः॰ सक्काढकमिति॰ आपणीयानां सक्तूनां आढकमित्यर्थः॰ कुतोमवानिति॰ कस्मात्स्थानात्पाटलिपुत्रादेर्वागत इत्यर्थः॰ अनेकत्वात्पाटलिपुत्रस्य तदवयवानां वा प्रश्नः॰ अत्रैरोपधेतो प्राच्यामिति तद्धितवृत्तिर्न प्राप्नोति॰ इह चापीति॰ समुदाय संबंधे सति सामीप्यादेरपि प्राप्ति पतितप्रसंग इत्यर्थः॰ नैषेति॰ गुर्वपेक्षात्र षष्ठी संबंधिशब्दत्वाच्चात्र स्वार्थवदपेक्षायां वृत्तावप्यहानादिवत्येव वृत्तिः॰ उक्तं च॰ संबंधिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते स्वार्थवत्सा व्यपेक्षास्य वृत्तावपि न हीयत इति॥

न्याप्रधानस्यापि सापेक्षत्वे वृत्तिदर्शनात्सापेक्षमसमर्थमितिवक्तुमशक्यमिति भावः॰ गमकत्वादत्र वृत्तिरिति वक्ष्यमाणाशयमाह॰ संबंधिशब्दत्वादिति॰ नित्यसापेक्षविषये आकांक्षायाः अंशतः स्वाभाविकत्वाद्विषयाभावान्नासामर्थ्यमिति भावः॰ प्रयुज्यत इति॰ समस्तत्वेनेत्यर्थः॰ स्वार्थवदिति॰ स्वार्थ इवस्वार्थवत्स्वार्थशब्दो नावप्रधानः स्वार्थमात्रोपस्थापकवाक्यपदकृतादशायामिव वृत्तावपीत्यर्थः॰ किमोदन इत्यादयस्तु सामर्थ्ये [illegible]

कै०वि०२

सापेक्षमसमर्थमित्यस्य वा। चनिकत्वे दूषणांतरमाह· भाष्येऽन्यत्र खल्वपीति· अन्यथाशङ्कैपदोक्तन्यायस्यएकार्थीभावविषयत्वात् इत्युक्तौ
रित्यत आवश्यपेक्षारूपसामर्थ्यस्यैव यद्वा दे संगतिः स्पष्टैव· तत्ध्वनयन्नाह· वाचनिके हीति· सएवेति· मदीयं चोद्यं दुष्परिहरमित्याहेतिभावः·
भाष्यकारो न्यायं दर्शयति· अगमकत्वादित्यादिना· क्रियाविशेषणं वेति· महद्यथा भवति तथा करोतीत्यर्थ इतिभावः· न कष्टविशेषणमिति॥

अन्यत्रेति· ततो नवक्तव्यं सापेक्षमसमर्थं भवतीति· वाचनिके ह्यसामर्थ्यं यथा सर्पिःकालकमिति षत्वेन भवति समाना
धिकरणमसमर्थवदिति वचनात्· एवं ब्राह्मणस्य सर्पिष्करोतीत्यत्रापि न स्यात् सएवाह· वृत्तिस्तर्हि कस्मादिति· सवि
शेषणानामिति· वृत्तिर्नेति वचनात् षत्वादिभवत्येव· पूर्वोक्तानुसारेणायमपि न्याय एवोक्तः· न वक्तव्यमिति· न्याय
सिद्धत्वात्· इह समासार्थेनेति· वाक्येनाभिधाने प्राप्ते समासः· आरभ्यमाणोस्तु समानार्थ एव न्याय्यः· महत्कष्टश्रित
इति यः कष्टश्रितः स महत्कर्म करोतीत्यादि प्रतीयते क्रियाविशेषणं वा महत्त्वं प्रतीयेत न तु कष्टविशेषणम्॥ ॥

तस्य पदार्थैकदेशत्वादितिभावः· नच्चैवं कष्टंश्रित इत्यस्यापि विग्रहत्वं न स्यात्· तत्र समाससमानाकारायाएवोपस्थितेः· एतेन वृत्तिवि
ग्रहयोः समानविषयता· [illegible] संगच्छते· विशेषणसमभिव्याहारे तु मदन्वयाय कष्टादेर्विशेषणत्वानाक्रांतविशेष्यतयोपस्थितिरावश्य
कीतितयोः समानार्थत्वभंगः इदमेव पदार्थः पदार्थेनेतिसूत्रे मूलमितिदिक्॥ ॥ [illegible] राम ९

६५५

एतस्माद्धेतोर्ब्रूमइत्यादि· अगमकत्वादित्येतस्माद्धेतोः सापेक्षमसमर्थमित्यादि ब्रूमः न तु संभावितापशब्दस्य साधुत्वनिवृत्तये तद्वाच
निकं ब्रूमइत्यर्थः· तत्ध्वनयन्नाह· यत्र गमकइत्यादिना· एतदेवाभिप्रेत्य व्याचष्टे· लोके इत्यादिना· अगमकत्वादेव तदर्थे शिष्टैर्लोकेरप्रयु
क्तत्वात्समासो न भवतीतिभावः· एवं च गमकत्वादेव किमोदनः शालीनामित्यादेरुपपत्तिः केयटाद्युक्तसंबंधिशब्दत्वादियुक्त्या देवदत्तस्य

नब्रूमइति· लोके प्रयुज्यमानस्य साधुत्वमसाधुत्वं च विचार्यते गोगाव्यादिशब्दवत् महत्कष्टश्रितइत्येतद्वाक्यार्थेनैव प्रयुज्य
ते प्रयुक्तानां चेदमन्वाख्यानं अतो नात्र समासो भविष्यतीत्यर्थः· नन्वेवं समासोगमकइति· गाव्यादिवदसाधुरपि गमकत्वा
भिमतो लोके प्रयुज्यते· तस्यासति समर्थग्रहणे साधुत्वं प्राप्तं तन्निवृत्त्यर्थमेतदित्यर्थः· किंचिदकुर्वाणं माषमहरमाणं
गाधानुदंतत्वं ष्टमित्येतेष्वर्थेषु एतेन समासाः· असूर्यंपश्यानीति· सूर्यकर्मिका या दृशिक्रिया नञः संबंधो न तु सूर्यस्य मा
सत्त्रयेत्वसामर्थ्यं· अपुनर्गेयाइति· पुनर्नगेयाइति गानेन नञः संबंधो न तु पुनःशब्दार्थेन· अश्राद्धभोजीति· भुजिना नञः संबंधो न श्रा
द्धेनश्राद्धभोजनेन निषेधात्॥ ॥

गुरुकुलमित्यादेः साधुत्वे उपपादितेपि किमोदनइत्यादेः साधुत्वं नोपपादितं स्यादतो भाष्योक्तमेव साधु· ग
मकश्चेत्तन्निवृत्तिरशक्येत्यत आह· गमकत्वाभिमतश्चेदिति तत्राह तु लोके प्रयोगः· अतोसौ गमकत्वेनेष्ट इत्यर्थः· परं त्वसाधुरितिभावः· असा
मर्थ्यत्वमुपपादयति· किंचिदकुर्वाणमिति· न सूर्यस्यपारतन्त्र्येति· सूर्यपदार्थघटकधात्वर्थेनेत्यर्थः· कर्मणि न प्रत्ययतीत्यसपदस्यर्थो नेतिभावः·
सूर्यशब्दस्य रूढत्वेपि सूर्यमिति च मितितेनान्वयाभावादसामर्थ्यमित्यपि बोध्यं॥ ॥

के०कि०२ नियमार्थं भविष्यतीति· एवं चाकिंचित्कुर्वाणेमिश्रादयः प्रयोगाः प्रागुक्ता असाधव इति भावः· असूर्यंपश्यादीनां प्रागुक्तानां बहूनां साधुत्वस्येष्टत्वा देकवचनमनुपपन्नमत आह· अभेदमिति· एतस्यैवेति भाष्यस्य प्रागुक्तस्यैवार्थ इति भावः· क्रियायामुभयोरिति· इदं चिंत्यं· कृतः सर्वनाम्नि के

अनपुंसकस्येति· प्रसज्यप्रतिषेधपक्षेऽयमसमर्थसमासः असमर्थतत्समासानां केषांचित्साधुत्वज्ञापयोनानपुंसकस्येति प्रस ज्यप्रतिषेधः आश्रीयते पर्युदासेपि तत्र न कश्चिद्दोषः तदेवं समर्थग्रहणे क्रियमाणे विध्यर्थमेते तेषां वचनं कर्तव्यं तदेवा क्रियमा णे नियमार्थं भविष्यतीत्यर्थः· एतस्यैवेति· अभेदमाश्रित्यैकवचनं कृतं· एतेषां बहुत्वाद्बहुवचनप्रसंगः असमर्थसमासेपि क्रियायामुभयोः सन्निपातादेकार्थीभावः तद्वारकोस्त्येव अयक्रियमाणेपीति· अबुधेबोधनार्थं क्रियमाणे अभ्युपगम्यमा नेइत्यर्थः· किं समर्थेनामेति· यद्यपि पूर्वमेकार्थीभावो वा सामर्थ्यमित्याद्युक्तं तथाप्येतादृश्यारस्यानं तस्य एतत्सिद्धेन तुरुर्वव्यवहारः

येत्यादौ समासापत्तेः असामर्थ्येपि ज्ञापकात्क्वचित्समास इत्येव भाष्याल्लाभे नास्योपयोगाभावाच्च· प्रातिपदिकसंज्ञाप्रसर्पेलक्षणटयोरिति अनपुं सकस्येति च ज्ञापकादिति भाष्याशयः· अनुधेति· सर्वत्रगमकत्वागमकत्वे लक्षणे कचक्षुष्यैर्दूर्ज्ञेय इति भावः· कृतेपि क्वचित्स्वरे पोएप्रदेशगाम्यगे मकत्वादिनेव प्रयोगानिनी हदृतिबोध्यं· एतत्सिद्धे नेति· अत्रत्य वार्तिककारीयसिद्धिं विचारमुपादाय पूर्वभाष्यकेनाप्यवहृतमिति भावः·

पृथगर्थाइति· अर्थेषु पृथक्कृत्वं भिन्नभिन्नोपस्थितिविषयत्वं· आचष्टे· उपस्थापयति· राजशब्दोपि पुरुषार्थमेवेति· पुरुषार्थान्वितमेव स्वार्थमुपस्था पयतीत्यर्थः· जहत्स्वा र्थायामप्याह· अथवेति· अनपवार्थान्वितइति· पूर्वपदरूपानयनार्थसदृशान्वितइत्यर्थः· तदुक्तमन्यएवेति समुदायार्थः समुदायशक्तिगम्यः क्वचित्तु अवयवार्थानन्वित इति पाठः· तदास्य पक्षमेवान्यएवेत्यस्य विवरणमिदं· द्वंद्व बहुव्रीह्योरेकार्थीभावस्तु सत्रापक्रमे दर्शितः एकार्थत्वमविभागापन्नार्थत्वमपृथगुपस्थितिविषयार्थकत्वं तदाह· पांसूदकवदिति· यथा मिलितपांसूदकेन्यतराविषयकत्वेनान्य

पृथगर्थानामिति· एकार्थीभावं तावत्सामर्थ्यं दर्शयति· परस्तात्तु व्यपेक्षालक्षणं दर्शयिष्यति· पृथगर्थाये षां पदानां तानि पृथगर्थानि पदानि· वाक्ये हि राज्ञः पुरुषइत्यत्र राजशब्दो राजार्थमेवाचष्टे पुरुषशब्दोपि पुरुषार्थमेव· वृत्तौ तु राजपुरुषइत्यत्र राजशब्दोपि पुरुषा र्थमेवाचष्टइति द्वयोरेकार्थीभावइति· अथवान्यएवायमयथार्थान्वितः समुदायार्थः प्रादुर्भवतीति तद्रूपेक्षयैकार्थीभावउच्यते पांसूदकव द्यविभागापन्नत्वात्· यद्यपि शब्दांतरमेव वृत्तिरवयवावर्णवदनर्थकस्तथापि सादृश्यात्तत्वाध्यवसायपदानामाश्रित्य पृथगर्थानामेकार्थीभाव

तरस्यतथाप्रकृतेप्यन्यतमाविषयकोपस्थितिविषयत्वेनान्यतमस्येत्यर्थः· तथा पांसूदकमिलने पिंडारव्यंद्रव्यांतरमेवैकभावमापन्नं तयोः तदवय वत्वव्यवहारश्चतद्वदत्रापीति भावः· एवं चापृथगुपस्थितिविषयत्वमेकार्थीभावइति फलितं· गौणमेकार्थत्वं समासघटकपदानां बोधयितुं द्विर्निर्दिष्टः पदानामसमेत्वाद्यथा नत्सत्ताव्यवहारो गौणस्तथा तेषामेकार्थत्वव्यवहारोपीति बोध्यं· तदाह· यद्यपीति· सादृश्यादिति· यद्यप्येतत्स २ र्वं वाक्यमपरवंडमेव तथापि रेखागवयस्थानीयेन शास्त्रनिष्पन्नेन सखंडेन सादृश्यं बोध्यं·

राम १०

६५६

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्यस्मारकम्

कैं०वि०२ एकार्थीभावइत्यनेनसमर्थवचनमित्यस्यसामानाधिकरण्यानुपपत्तेराह·कर्मणीति·बाहुलकादितिशेषः·सामान्येचनपुंसकंतदध्वनितंभाष्ये समर्थमित्युच्यतेइति·वाक्यसमासयोर्विशिष्टपुरुषस्यैकस्यैवावगतेविशेषाभावमाशंक्याह·राज्ञइति·अनियतसंबंध्यपेक्षयेतिच्छेदः·उद्भूतसंबंधशब्देनतद्भिन्नतयाप्रतीयमानसंबंधः·विशेषणभावमापन्नइति·विशेषणत्वंवैशिष्ट्येनोपस्थितइत्यर्थः·स्वप्रकृत्यर्थगताविशेषणत्वस्यापिप्रथमातिरिक्तविभक्त्यर्थत्वादितिभावः·अभिधीयते·शक्त्याउपस्थाप्यते·स्वनिष्ठः·प्रातिपदिकार्थमात्रनिष्ठः·प्रातिपदिकार्थमात्ररूप

समर्थवचनमिति·समर्थशब्दस्यवाच्यइत्यर्थः·कर्मणिल्युट्·कुपुनरिति·पृथगर्थत्वमेकार्थत्वंचविरुद्धत्वादेकस्मिन्विषयेनसंभवतीतिप्रश्नः·राज्ञः·पुरुषइति·राज्ञइत्यनेनपदेनराजार्थोनियतसंबंध्यपेक्षयोद्भूतसंबंधोविशेषण[illegible]भावमापन्नोऽभिधीयते·पुरुषइत्यनेनपुरुषार्थः·स्वनिष्ठोविधीयमानत्वात्साधान्यमापन्नोभिधीयते·वृत्तौतुभेदस्यानिवर्त्तनात्तदधिष्ठानस्यापिसंबंधस्याभावात्षष्ठीनिवर्त्तते·सैवचस्वाभाविकीनिवृत्तिः·सुपोधातुप्रातिपदिकयोरितिशास्त्रेणन्वाख्यायतेप्रत्ययलक्षणसिद्धये॥ ॥

इतियावत्·नतत्संबंधांतरापेक्षयोद्भूतसंबंधइत्यर्थः·विधीयमानत्वात्·विधेयताख्यविषयताश्रयत्वात्·प्रथमायाविधेयावभक्तित्वादितिभावः·तदेवाह·प्र[illegible]धान्यमिति·वृत्तौभेदस्य·भिन्नोपस्थितिविषयत्वस्य·यथाघटघटत्वयोः·घटशब्दजन्यसंबंधाविषयकोपस्थितिविषयत्वंतथात्रवृत्तौराजपुरुषयोरितिभावः·संबंधस्यातभावात्·राजपुरुषइतिसमुदायेनैवोपस्थानादित्यर्थः·उक्तार्थानामप्रयोगइतिषष्ठ्याभिव्यक्तिरितिभावः॥ राम ११

६५७

उक्तविशेषस्यगम्यमान[illegible]याऽविशेषोक्तिः·कथमित्यतआह·एवंहीति·पृथगर्थत्वंस्यादिति·समासेऽपेक्षयापरस्परापेक्षयाचपृथगर्थत्वंभिन्नार्थत्वंस्यादित्यर्थः·नप्रतीयेतेति·पदाभ्यामितिशेषः·सामर्थ्यभेदोपीति·व्यपेक्षैकार्थीभावरूपइत्यर्थः·भाष्येनापिक्रमइति·नैवक्रमइत्यर्थः·वाक्येपृथगर्थत्वेपीति·पृथगुपस्थितिविषयत्वेपीत्यर्थः·एकार्थता·एकसामर्थ्यवत्ता·एकार्थीभावकृतविशेषप्रश्नेसुब्लोपइत्यादिकथनमसंगत

किमुच्यतेइति·एवंहिवाक्येपदानांपृथगर्थत्वंस्यात्·यद्येकएवविशिष्टोर्थोनप्रतीयेत·वृत्तौचपुरुषमात्रप्रतीतौस्यादेकार्थीभावः·यतस्तुवृत्तिवाक्ययोरेकएवार्थःप्रतीयतेनतदासामर्थ्यभेदोपिनास्ति·नापिक्रमइति·वाक्येपृथगर्थत्वेपिपदानांसाकांक्षायोग्यतावशाद्विशेषणविशेष्यभावाद्विशिष्टार्थप्रतिपत्तिः·वृत्तावपिविशिष्टएवार्थोराजपुरुषशब्दाभ्यामभिधीयतेइतिकुतोन्यस्यानयनेनचेतावतावृत्तिवाक्ययोरेकार्थता·यथाब्राह्मणेनोशतंभोज्यतांशतंब्राह्मणाभोज्यंतामिति·सत्यपिकार्यस्याभेदेशब्दार्थोभिद्यतेतथेह्यापीत्यर्थः·सुब्लोपइति·एकार्थीभावाभावेकृतोपिविशेषएकार्थीभावकृतइत्युच्यतेसन्निधानासंनिधा[illegible]नाभ्यांक्रियाभिनिर्वृत्तोपदार्थोनोकारणत्वात्·यथावर्षकृतंसुभिक्षंवर्षकृतंदुर्भिक्षमितिचोच्यते॥ ॥ ॥

मतआह·एकार्थीभावाभावेति·यथामशकनिवृत्तिकारणंमधिधूमोमशककारणमित्युच्यतेमशकार्थोधूमइतितथातदभावकारणकमपितत्कारणकमित्युच्यते·तदुक्तंपातंजलभाष्ये·उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः·वियोगान्यत्वधृतयःकारणंनवधास्मृतं॥ ॥

वै०सि०२ उभयत्रापि राजसंबंधवत्पुरुषप्रतीत्यविशेषः कश्चिद्भिन्नत्वादिः कश्चिन्नेति विभागः कथमित्यत आह· तत्रेति· वाक्यीयप्रायेण विशेषणत्वे भे
वषष्ठी प्रवृत्तौ निमित्तं· तत्रैव संबंधस्याद्भूततया भानादिति भावः· भेदनिवृत्ताविति· भिन्नोपस्थितिविषयत्वमत्र भेदः· संबंधस्योपरमादिति·
प्रातिपदिकोक्ततया तदाकांक्षोपरमादित्यर्थः· अर्थस्येति· अर्थगतभिन्नोपस्थितिविषयत्वस्येत्यर्थः· ऋद्धस्य राजसमानाधिकरणत्वेनै

सार२ तत्र राज्ञः पुरुष इति वाक्ये भेदाधिष्ठानस्य संबंधस्य प्रत्याययिषितत्वाद्विनाविभक्त्या तस्य प्रत्याययितुमशक्यत्वान्नास्ति सुब्लोपः
समासे तु भेदनिवृत्तौ तदाश्रयस्य संबंधस्योपरमात्स्वाभाविकी सुपो निवृत्तिः सैव च शास्त्रेणानुज्ञायते· तदेवं सुपो भावाभावा
भ्यामर्थस्य भेदाभेदानुमानं· वाक्यसमासयोः व्यवधानमपि सत्यर्थभेदे दृष्टं· वाक्ये भार्या राज्ञः पुरुषो देवदत्तस्येति असति तु
देवदत्तस्येत्यत्र पदमध्ये पदांतरस्य प्रक्षेपुमशक्यं· यथेष्टमिति· वाक्येऽनियतपौर्वापर्येण पदानां प्रयोगः· समासे तु नियतपौर्वा
पर्यः· स चार्थाभेदनिबंधनः· यथा कर्कट इति प्रयोक्तव्ये कर्कट इति न प्रयुज्यते· स्वरभेदविति· अर्थभेदे स्वरभेदो दृश्यते· यथा देवदत्तगाम
भ्याजेति·

कार्थ्याद्व्यवधायकत्वमितिमन्वानं प्रति स्पष्टमुदाहरणमाह· भार्या राज्ञ इति· भार्या देवदत्तस्येत्यस्य मध्ये राज्ञः पुरुष इत्यनेन व्यवधानमिति बो
ध्यं· ननु वाक्येपि राज्ञो विशेषणतायाः एव नियतत्वाद्यथेष्टमभिसंबंध इत्यनुपपन्नमत आह· वाक्ये अनियतेति· पौर्वापर्यलक्षणः शब्दगतोभि राम
संबंधो भाष्याभिप्रेत इति भावः· समासासमासकृतः स्वरविशेषोनैकार्थीभावकृत इत्यत आह· अर्थभेद इति· स्वरभेद इति· स्वरस्तु नोदात्तः स्वरितो वा १२
त्र्यर्थविवक्षित इति बोध्यं·
६५८

द्वेपीति· राजनूशब्दः कृतसमासोत्तरकालीनः· पुरुषः कृपनंत इति भावः· सिद्धे शब्दार्थसंबंधे इत्यस्यैकार्थीवाचनिकत्वं कथमत आह· वचनेनेति· व्यभि
चारमेव दर्शयति· यथेति· ननु वाचकाभावे कथं तत्प्रतीतिरत आह· पंचकेति· तात्पर्यग्राहकं तु प्रकरणादीति भावः· इदमेव दर्शनं सिद्धांतिनः

तदभेदेन दृश्यते यथा घट इति· अत्र राज्ञः पुरुष इति द्व्यपि पदे नित्यस्वरेणाद्युदात्ते राजपुरुष इति समासांतोदात्तः· वाच
निकानीति· वचनेनैवं भवतानामन्वाख्यानात्· व्यभिचारान्नानुमानं सुब्लोपादिकमर्थाभेदस्येत्यर्थः· यथा पयः प्रयोजयती
त्यत्र विनापि विभक्त्या कर्तृकर्मप्रतीतिर्भवति· पंचकप्रातिपदिकार्थदर्शने तथा राजपुरुष इत्यत्र सत्येवार्थभेदे राजपद
मेव संबंधमभिदध्यात्· अर्थाभेदे च सुब्लोपादृष्टः· यथा वर्णासु ज्ञाने पुष्कर इति· तथा वृत्तावपि प्रयोगानियमो दृश्यते· अतो
दीआद्यतौ जातपुत्रः पुत्रजातः· वाक्ये च प्रयोगनियमो धवश्वखदिरश्चेति· न हि भवति च खदिर इति च धव इति एकस्वर्यं च वा
क्ये दृश्यते तीक्ष्णेन परशुना [illegible] वृश्चन्निति· अर्थाभेदे च स्वरभेदः· कर्तव्ये अन्वेतेनैइति· अनश्वेतवै युगपत्त्वेन वातश्च युगप
दित्यत्र स्वरः॥

तिबोध्यं· राजपदमेवेति· शब्दशक्तिस्वाभाव्यादिति भावः· एतेन विभक्त्यर्थस्य प्रातिपदिकार्थत्वेन दृष्टमित्यपास्तं· शब्दाभावेऽर्थसद्भावे प्रदर्श्य शब्दस
द्भावेप्यर्थाभावं दर्शयति· अर्थाभेदे चेति· अभिन्नोपस्थितिविषयत्वे चेत्यर्थः· वाक्ये चेति· चादीनां निपातानां परप्रयोग एवेति भावः· तीक्ष्णेनेति
परांगवद्भावात्स्वरैक्यमत्रेत्यर्थः· अंतश्चतनेइति· आद्यमसमासे अंत्यं समासे स्वरद्वयोपकं·

कै॰वि॰२

विभक्त्यर्थेति॰ वाक्ये उपसर्जनबोधकपदानां विभक्तत्वं तत्त्वेन तदर्थे संख्याविशेषयुक्तार्थबोधकत्वमित्यर्थः॥ अंतर्भूतेति॰ विशेषणीभूतस्वार्थ
कमित्यर्थः॥ अभेदैकत्वेति॰ विभक्त्यभावेन संख्याविशेषाणां तत्तद्रूपेण प्रतीतेः संख्यात्वेन सर्वसंख्यानां भानं मधुनि रसानां सर्वरसत्वेन भानव
दिति भावः॥ तदाह॰ यथौषधीति॰ अथवेति॰ अत्र पक्षे संख्यात्वेन सामान्यं भासते न तु विशेषा इति पूर्वस्माद्विशेषः॥ संख्या च द्वाजसंबंधीति
पक्षद्वयेपि बोध्यः॥ अत एव भाष्ये संख्याविशेष इति विशेषपदोपादानं मधुनि सर्वरससत्ताजन्यस्य तत्तद्रोगादिनिवृत्तिरूपस्य फलस्यानुभ

संख्याविशेष इति॰ वाक्य उपसर्जनपदानि विभक्त्यभिव्यापितत्वात्संख्याविशेषयुक्तं स्वार्थं प्रतिपादयंति॰ समासे त्वंतर्भूत
स्वार्थं प्रधानार्थमाभिदधतीत्यभेदैकत्वसंख्यामवगमयंति॰ संख्याविशेषाणामविभागेनान्वयानमभेदैकत्वसंख्या॰ यथौ
षधि॰ यथौषधिरसाः सर्वे मधुन्याहितशक्तयः॥ अविभागेन वर्त्तन्ते तां संख्यां तादृशीं विदुरिति॰ अथवा परित्यक्तविशेषं संख्यासामा
न्यमभेदैकत्वसंख्या॰ तदुक्तं॰ भेदानां वा परित्यागात्संख्यात्मा स तथाविधः॥ व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते॰ अगृहीतविशे
षेण यथा रूपेण रूपवान्॰ प्रख्यायते न शुक्लादिभेदरूपस्तु गम्यत इति॰

वान्तस्तत्ताकल्पनेपि अत्र सर्वसंख्याविशेषकल्पने मानाभाव इति तद्भावः॥
भेदानां॰ विशेषाणां॰ संख्यात्मा॰ संख्यासामान्यं॰ तथाविधः॥ अभेदैकत्वसंख्यापदवाच्यः॥ निर्विशेषसामान्याभावादिदं कथमत आह॰ व्यापारा
दिति॰ संख्यात्वेनैव तत्प्रतीतेर्विशेषरूपाणां तत्तद्रूपेण प्रतीतेश्च भेदापोह इति भावः॥ तदेव समर्थयति अगृहीतेति॰ शुक्लादिरूपभेदस्त्विति॰ शुक्लादिरू राम
पविशेष इत्यर्थः॥ भेदरूप इति पाठे शुक्लादिविशेषरूपोर्थस्त्वित्यर्थः॥ तत्र रूपत्वेन रूपप्रतीतिः सद्वस्तुविषया अत्र तु संख्यात्वेन प्रतीतिरसद्वस्तुविषया १३
विकल्पात्मिकेति विशेषः॥

६५६

नन्वेकार्थीभावकृतसंख्याविशेषाभावेनैव तदसान्निध्यमिति चेन्नेत्याह॰ लुकेति॰ लुकृशास्त्रपर्यालोचनयार्थसत्त्वमनुमीयत इति भावः॥ ननु लुकृशा
स्त्रपर्यालोचनयाऽर्थसत्त्वमेवेत्यत आह॰ नहीति॰ अनुगम्यत इति॰ बोध्यत इत्यर्थः॥ प्रत्ययलक्षणसिद्ध्य इति शेषः॥ ननु जातौ बहुवचने कथं व्यक्ति

क्वचित्संख्याविशेषाभिव्यक्तिर्भवति॰ यथाद्विपुत्रः पंचपुत्र इत्यादौ प्रातिपदिकार्थ एव संख्याविशेषः तावकीनो मामकीन इत्यत्रादे
शाभिव्यक्त्यमेकत्वे॰ शौर्पिकमिति प्रातिपदिकेन विशिष्टस्यैव परिमाणस्योपादानादेकत्वावगमः तथा मासजात इति विशिष्टकालावग
माय प्रयोगादेकत्वावगतिरेवमन्यत्रापि प्रकारांतरेण संख्याभेदावसायो द्रष्टव्यः॥ तदसान्निध्यादिति॰ लुक्काविधाने निवर्त्तितत्वादित्यर्थः
ननु चेति॰ नहि विद्यमानेर्थे लुकमाचार्यो न्वाचष्टे अपितु तदर्थस्याभावात्॰ स्वत एव शब्दस्य या निवृत्तिः सैवानुगम्यत इत्यर्थः॥ अर्थेष्टे
तेनेति॰ प्रत्यापिपयिषितार्थप्रतिपादनाय शब्दप्रयोगात्॰ अर्थरूपमिति॰ अर्थस्वभाव इत्यर्थः॥ एतदुक्तं भवति॰ संख्याविशेषादियुक्त
वस्तुप्रतिपादनेच्छायां वाक्यं प्रयुज्यते अन्यदा तु वृत्तिः॥ गोषु चर इति॰ गोषुचरः कुक्कुट इच्यते॰ एकस्यां गवि द्वयोर्बहुषु वा यश्चरति
स सर्वो मा च विशेषेणोच्यते॰ जातौ चेदं बहुवचनमिति व्यक्तिगतसंख्याभेदानवगतिः॥ यदि तु व्यक्तिगतं बहुत्वं प्रतीयेत तत्तसादा
श्रयमेव बहुवचनं क्रियते॰ यदा तु सत्यपि बहुवचने व्यक्तिगतं बहुत्वं न प्रतीयते तदा जात्याश्रयं बहुवचनमित्येवमुपगम्यते॥ ॥

गतसंख्याविशेषप्रतीत्यापादनमत आह॰ यदित्विति॰ सत्यपि प्रत्यये तदनवगतेर्जातौ तदाश्रीयत इति भावः॥ जात्याख्यायामिति सूत्रप्रत्या
ख्यानादवयवे बहुत्वारोपेण बहुवचनमिति अत्रापि वक्तुं युक्तं॥

कै०वि०२

अत्राप्यभेदैकत्वमिति॰ अवयविगताभेदैकत्वमित्यर्थः एवं हि दाराइत्यादावप्यभेदैकत्वसंभवमभिन्यभेदैकत्वं स्यादिति तस्यावृत्तिकृतविशेषत्वभंग
इतिचिंत्यं॰ संख्याविशेषवल्लिंगविशेषोपिकुतो नोक्तस्तत्राह॰ लिंगविशेषस्यापीति॥ ॥परे तु संख्याविशेषइत्यस्य प्रातिपदिकार्थसंख्याविशेषइत्य
र्थस्तेनाद्दिपुत्रादौ न दोषः मासजातादौ शब्दात्संख्याऽप्रतीतिरेव मासत्वेन तु एकमासस्यैव बोधः॰ अनेकमासजाते द्विमासजात इत्यादिदर्शनात्॰ श
ब्दशक्तिस्वभावान्न कदापि तेनानेकमासस्य मासत्वेन बोधः तत्पुत्रो पुष्पो सुत्र इत्यादावपि तत्त्वेन पुत्र इत्येव बोधः॰ आदेशात् दम्भावे तु तत्त्वेन वस्तु

वर्षासु जनः इंद्रगोपः॰ अत्राप्येकस्मिन्न तावयवबहुत्वापेक्षो बहुवचनांतो वर्षाशब्दोवर्त्तते न त्वत्र ऋतुबहुत्वं प्रतीयतेइत्यत्राप्यभेदैकत्वमु
पजायते॰ तत्त्वरूपेऽक्षितिबहुत्वमिति अत्रोत्तुक्तः लिंगविशेषस्यापिकृचिदृत्ताबुपादानं॰ कुमारीपुत्र इत्यादौ॰ क्वचित्त्यागः कुक्कुटोऽंडमृगमांस
मिति॰ यावेपिजात्यंतरनिवृत्तिपरे लिंगविशेषाविवक्षा दृश्यते छागस्य मांसमिति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ

त एकबोधनतदभावाभ्यां॰ यथा घटानित्यादितो बहुत्वेनैव कदाचित्त्रया एवं कदाचिच्चतुरादीनां भाने न तु कदाचिदपि त्रित्वचतुष्ट्वादिना तथा दन्तौ राज
त्यादिनैवैकानेकव्यक्तिभाने तात्पर्यवशात् न त्वनेकद्वित्वादिना एकवचनत्वादिकं वस्तुत एकत्वादिविशिष्टव्यक्तिबोधकत्वेन त्वेकत्वद्वित्वादिनेत्येता
वत्पर्यंतमाग्रहः एवमन्यत्रापि बोध्यं॰ दंतोष्ठस्य दंता इत्याधन्तराइत्यादावप्यवयवसंख्या अभाने दंतत्वेन ओष्ठत्वेन दंतोष्ठलक्षणार्थद्वयप्रतीतेस्तत्त्वे
व अनेकव्यक्तिसत्त्वेपि तासां शब्दतो भानाभावात्॰ अतएव भाष्यकृतोपसर्जनविशेषणरूपविशेषस्य देवदत्तस्य गुरुकुलमित्यादावव्यापकत्वेव दस्य मासे
जातादावव्यापकत्वं नोक्तं॰ अभेदैकत्वसंख्याभासत इति भाष्येनक्वापि दृश्यत इत्याहुः॥ राम॰ १४

६६०

न्नास्तिस्वरभेद इति॰ आमंत्रितस्य चेति पदात्परस्य निघातविधानादित्यर्थः॰ ननु नियमेन संदेहस्यैकजननेदुष्टएव प्रयोगः स्यादत आह॰ तत्र प्रकरणादीति॰
निपातनाद्वेति॰ केवलाच्च संज्ञायामित्यादावित्यर्थः॰ संख्याविशेषरूपस्य विशेषस्थितत्वादेषोपीत्यपिशब्देऽप्युक्त इत्यत आह॰ अपिशब्द इति॰ पदोत

ब्राह्मणकंबल इति॰ यद्यप्यत्र स्वरान्निर्णयस्तथापि शब्दस्वरूपमात्राभिज्ञस्य याभावइत्येवं परमेतत्॰ यत्रापि नास्ति स्वरभेदः संबुद्धिषष्ठीस
मासयोः तिष्ठति ब्राह्मणकंबल इत्यादौ तत्रापि प्रकरणादिवशाद्वर्थान्निश्चयेन भाव्यं॰ केवलशब्दो घृतादित्वान्निपातनादंतोदात्तः एका
र्थीभावे सति भेदनिबंधनसंबंधाभिधायिविभक्तिनिवर्त्तनात् उक्तो विशेषोऽभिधानमुच्यते॰ एषोपीति॰ व्यभिचारात्॰ अपिशब्दः सु
बन्तोपाद्यपेक्षया समुच्चयार्थः॰ अरुद्धस्येति॰ राजा स्वार्थादप्रच्युतः पदांतरार्थमप्रातिपन्नो वाक्येयोग्यत्वाद्विशेषणसंबंधमनुभवति॰ वृत्तौ
तूपसर्जनीभूतस्वार्थमर्थांतरं प्रत्यायतीत्ययोग्यत्वाद्विशेषणेन न संबध्यते॰ एषापीति॰ अव्याप्तित्वात्॰ त्वयोग इति॰ वाक्ये पदार्थानां भि
न्नत्वाद्भेदनिबंधनसमुच्चयद्योतनाय चशब्दः प्रयुज्यते॰ वृत्तौ तु समूलेहत्त्वे एकार्थप्रादुर्भावाद्भेदस्य निवर्त्तनाद्योत्यार्थाभावाद्योतकस्या
यर २ प्रयोगश्चशब्दस्यानवृत्तिः॥
रार्थमप्रपन्नः पदांतरार्थोन्वयित्वेनैवोपस्थित्यविषयः अर्थांतरं प्रत्यायतीति॰ विशिष्टोपस्थितावस्यापि सहायत्वादितिभावः॰ अयोग्यत्वादिति॰ पदा
र्थैकदेशत्वेनायोग्यत्वे॰ भिन्नत्वादिति॰ भिन्नोपस्थितिविषयत्वादित्यर्थः॰ भेदनिबंधनसमुच्चयेति॰ घटपदजेघोपस्थितिविषययोर्घटघटत्वयोः समुच्च
याप्रतीतेरितिभावः॰ भेदस्यनिवर्त्तनादिति॰ पृथगुपस्थितिनिवर्त्तनेरित्यर्थः॰ द्योत्यार्थाभावादिति॰ समुच्चयाभावादित्यर्थः॥

कै०वि०२

पूर्वग्रंथेन संगतिं वदन् अभिप्रायमाह· अयंभावइति· यद्यपि चार्थे द्वंद्वसंज्ञकसमुदायस्य शक्तावेकार्थीभावः सिद्धस्तथापि अवयवैः समुदायेन च पृ
थगुपस्थितानामन्वयइत्यपि संभाव्येत तथा सति विशेषणद्वयान्वयोपि संभाव्येतेति भावः· सूत्रकृदादेशनस्य भूतत्वाद्वर्तमानप्रयोगोऽसंगत

अथेतस्मिन्निति· अयंभावः· यदि वाचनिकमर्थाभिधानं तदा समस्येकार्थीभावे चार्थे द्वंद्वविधानात् द्वंद्वे नैव चार्थस्योक्तत्वाच्च स्या
प्रयोगोन्यथासिद्धत्वान्नानुमानमेकार्थीभावस्य· स्वाभाविकेतु चार्थेइत्यादिरर्थनिर्देशः अनर्थकः स्यात्· अर्थानादेशनादिति· अव
तुरेत्यादिविधिनेति भावः· आदिशन्निति· प्रवृत्ताविरामलक्षणं वर्तमानत्वं शास्त्रप्रबंधानुपरमाद्दर्शयति· वाक्यभेदेन चार्थादेश
नं मन्यते· सुबंतमनेकमन्यपदार्थे वर्तते तच्च बहुव्रीहिसंज्ञमिति· एवमन्यत्रापि वाक्यभेदो दर्शनीयः· यदा तु लोकप्रसि
द्धार्थानुवादेन बहुव्रीहिसंज्ञा वि[illegible]धीयते· यदन्यपदार्थे अनेकं वर्तते तद्बहुव्रीहिसंज्ञमिति तदार्थादेशनेनापि वाक्यभेदः अ
र्थे स्वभिनिविष्टानामिति· अभिनिविशश्चेत्यत्र परिक्रमणइत्यतोन्यतरस्यांग्रहणानुवर्तनाद्विकल्पेन कर्मसंज्ञाविधानात् सप्त
मी कृता· एतदेव भाष्यकारवचनं लिंगं तद्विकल्पस्य· कूपइति· कूपोलक्षणत्वेनोपादीयते इह सदक्षिणमार्गग्रहणस्य· अ[illegible]इति· अत्राप्येतेन च
इमसोलक्षणत्वेन निर्दिश्यते·

इत्यत आह· प्रवृत्तेति· प्रबंधो धारा· अर्थादेशनपरत्वे संज्ञापरत्वेन स्यादत आह· वाक्येति· सिद्धांताभिप्रायमाह· यदा त्विति· विकल्पेन कर्मसंज्ञेति· अतिप्र
संगस्त्वनभिधानाद्वारणीयः· भाष्येत्वाख्यानं क्रियतइति· समासप्रत्ययादिसंज्ञाप्रतीतिशेषः· चंद्रमसमिवेति· ग्रहणदर्शने चकूपाभ्योरितिशेषः· तदाह· कू
पोपलक्षणत्वेनेति· निमित्तशब्दो ज्ञापकसाधारण इति भावः॥

ना२

रा म०
१५

६६१

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्

वाक्यभेदरूपकारणस्य सत्वात् किं पुनः कारणमिति अनुपपन्नमत आह· प्रकृतीति· यथा कृते रीयङित्यादौ· लघ्वर्थमित्युक्तत्वात् अर्थादेशने गौरवमित्यु
क्तं· दोषांतरमनवस्थामप्याह· अवश्यं ह्यनेनेत्यादिना· तस्य च तावन्तेनेति· यथा चार्थे इत्यत्र च स्यायमर्थ इति केन शब्देनोक्तं यत्करणकृता

किं पुनरिति· प्रकृतिप्रत्ययोपदेशवद्वावतु वाक्यभेदेनार्थादेशनमितिभावः· लघ्वर्थमिति· लघुशब्दो लाघवे व
र्तते· लाघवेनार्थमर्थानादिश्यते· अन्यथा गौरवमनवस्था च प्राप्नोति· तथाहि· यदि चार्थे वर्तते अनेकं तच्च द्वंद्वसं
ज्ञमिति वाक्यभेदेनार्थादेशने क्रियते तर्हि एवं प्रष्टव्यं स्यात् कः पुनश्चार्थस्तत्राचार्येणैव वक्तव्यं स्यात् समाहार इत
रेतरयोगश्चेति ततः कः समाहारः क इतरेतरयोग इति प्रश्नप्रतिवचनयोरनवस्था गौरवं चानुषज्यते· असंभ
व इति· असामर्थ्याद्दोषबाहुल्यप्रतिपादनाय अर्थादेशनस्य गौरवानवस्थासंभवाः परस्परांतर्भावेपि पृथगुपन्यस्ताः·

र्थज्ञानेनासौ व्यवहारः क्रियते येन शब्देन च तदुक्तं तत्रापि चायमेव पर्यनुयोग इत्यर्थः· अनुषज्यत इति· भाष्ये अनवस्था च स्यादिति पाठे चेन गौर
वमनुषज्यत इत्यर्थः· असंभवे हेतुरसामर्थ्यादिति· आदेष्टुरिति शेषः· गौरवानवस्थासंभवानां परस्परांतर्भावेण पृथगुपन्यासोऽसंगत इत्यत आह·
दोषबाहुल्येति·

एवकारादिति· अनेकार्था अपि धातव इति तत्र तत्र भाष्योक्तेरित्यपि बोध्यं· यथेच्छमिति· गंगादिशब्दानां तीरादावपि प्रयोगादिभौ तिवः· नन्वेवं कोशा
संगतिरत आह· शक्तिनियमे त्विति· शक्तिबोधने त्वित्यर्थः· प्रकृतीनामर्थनिर्देशो नावश्यक इत्याक्षिपति भाष्येऽप्येवं चेति· प्रत्ययार्थनिर्देश इति· प्रत्य
यार्थनिर्देशः प्रकृतीनामर्थस्य संबंधादेव प्रतीतिसंभवेन प्रकृतीनामर्थानिर्देशो न कार्य इति भावः· प्रत्ययार्थनिर्देशे प्रकृत्यर्थस्य निर्देशो न कर्तव्य इ

कोहीति· अनेकार्थत्वादिति भावः· तत्र धातूनामनेकार्थत्वं कुर्द खुर्द गुर्द क्रीडायामेवेति नियमार्थादेवकाराद्विज्ञायते· प्रातिपदिका
नामपि यथेष्टं विनियोगदर्शनात्· शक्तिनियमे तु पुरुषस्य व्यापारः प्रत्ययानां तु कृत्यल्युटो बहुलं कृत्स्विति च लक्षणारंभात्· निपाता
नामनेकार्थत्वेनानाविधस्यार्थस्य प्रयोगेषु द्योतनात्· न चैतन्मंतव्यमिति· कस्यचिदेवार्थो निर्दिश्यते अन्यस्य तु संबंधात्प्रतीति
र्भवतीति भावः· भवतीति· एकत्वादिषु गुणेषु त्वादयो विधीयंते गुणेभ्यस्तु गुणिन आक्षेपात्तिराधारस्य गुणस्यासंभवात्· तद्यथा शुक्ल इति
गुणमात्राभिधाने गुणिन आक्षेप इत्यर्थः· एवमपत्ये प्रत्यये विधीयमाने सामर्थ्यादपत्यवतः प्रकृत्यर्थस्याक्षेपान्निर्देशः सिध्यति·

न्येतन्न मंतव्यमिति अक्षरार्थः· एवं च प्रकृत्यर्थनिर्देशो नावश्यक इति भावः· तदाह कस्यचिदेवेति· भौण्ये पूर्वपक्षी स्वोक्तं साधयति भवतीहीति· द्रव्यो
रित्यादावितिशेषः· स एव गुणेन गुणिन आक्षेपे दृष्टांत आह· तद्यथेति· गुणमात्रेति· सामर्थ्यादेव गुणिप्रतीतौ स्वाभाविकी मतुपो निवृत्तिरेव गुणव
चनेभ्यो मतुपो लुगित्यनेनान्वाख्यायत इति भावः· इदमपि संबंधिनः पदेनानुपादानेऽपीति बोध्यं· गुणशब्दः संबंधिशब्दोपलक्षणमित्याह· एवमपत्य इति त
थापत्य इति पाठांतरं॥

समाधत्ते· विषम इति· शुक्लः कृष्ण इति दृष्टांतो विषम इत्यर्थः· तत्र गुणिमात्राक्षेपस्तथा प्रतीतिश्च· अत्र तु नियमेन विशेषप्रतीतिरिति वैषम्यमि
ति भावः· तदाह· यथा शुक्ल इत्यादि· द्रव्यमात्रमिति· सु बर्थसंख्यया आक्षिप्यत इत्यर्थः· निर्दिश्येतार्थ इति· अस्य तदेति शेषः· क्वचित्संकरस्त्वादः भ
वति चेति· विशेषसंप्रत्यय इत्यनुषंगः· तस्मादुत्सादीनामपत्यार्थादेशनमावश्यकं न च तत्तेषां भवतीति स्वाभाविकत्वपक्ष एवाश्रयणीयः· तदाह· त

विषम इति· यथा शुक्लः कृष्ण इति गुणेन गुणिमात्रस्याक्षेपो न गुणिविशेषस्य· एवं वृक्षः प्लक्ष इत्यत्रापि एकत्वादौ धातुर्द्रव्यमात्रं प्रतीयेत
यदि लोकादर्थावधारणं नाश्रीयेत नापि शास्त्रेण प्रतिप्रकृति निर्दिश्येतार्थः· तदा वृक्षादयो द्रव्यमात्राभिधायिनः स्युरिति प्रकरणाद्यभावे
विशेषसंप्रत्ययो न स्यात्· भवति च· तस्माद् वृद्धव्यवहारादेव शब्दार्थसंबंधव्युत्पत्तिरनिरुक्तानां पिपुक्तिवशादेष्टव्येत्यर्थः· येषामर्थो न
ज्ञायते इति· स्वर्गापूर्वदेवतादिशब्दानामर्थः प्रत्यक्षापरिच्छेद्यत्वादिदं तया न ज्ञायते· तन्न तेषां कथमर्थो निर्दिश्येरन्नित्यर्थः· तैर्वि
द्वद्व्यवहारात्तेषामर्थो विज्ञायत एव· अस्ति कोऽपि चैरिति· यथैते व्यवहारवशादर्थाधिगम्यं तेन तथा शब्दैरपीति भावः॥ ॥श्रीराम·

स्मादिति· इदं तया· तत्तद्धि नास्य रूपेण· विज्ञायत एवेति· तत्तत्पदवाच्यः कश्चिदर्थ इत्येवं रूपेणेत्यर्थः· भाष्ये जर्भरीति· यद्यपि जर्भरी त्यस्य मंत्रोऽश्वि
नौ तुर्फरीत इत्यस्य हंतारावित्यर्थो निरुक्तकारैर्दर्शितस्तथापि सर्वजनप्रसिद्धत्वाभावात्प्रकृतिप्रत्ययविभागेनान्वाख्यानासंभवाच्चैवं न विज्ञायत इ
त्युक्तं भगवता॥ ॥

अन्वाख्याने। वाक्यभेदेन विधाने। तस्माल्लोकसिद्धानामेव निमित्तत्वेनान्वाख्यानमित्येव युक्तमित्येव युक्तमिति भावः। भाष्ये भंगादेरं। आर्द्रकं। किं तेन कृतं स्यादिति। अनेनैषां प्रयोगानर्हत्वं सूचयति। यदि तु मोक्षुर्यादिति शय्यादिप्रतीतिः प्रयोजनेन तदा तु प्रयोक्तव्यमेवेति बोध्यं। अर्थाभिधानस्य स्वाभाविकत्वपक्षे लाघवमपि दर्शयति। वानवचनानर्थकं चेति। वाक्यभेदोपि वचनानां वचनानर्थक्यं चेत्यर्थः। वा वचनपदेन म

नखल्विति। साध्वसाधुसंकरनिरासाय शास्त्रारंभान्नास्तिलोकव्यवहारानुगतार्थान्वाख्याने प्रयोजनमित्यर्थः।
वा वचनानर्थक्यं चेति। द्वह्व्यपेक्षायां समासो न भवति एकार्थीभावे वाक्यं नेति वा विकल्पविषयत्वादनयोर्बोध्यं वा
धकभावो न भविष्यतीति नार्थो विकल्पेन। एकार्थीभावविकल्पनात्। नचसंज्ञायामिति। एकार्थीभावे चित्रगुरित्येवेष्यते
न चित्रा गावस्येवं। तथा राजपुरुष इतीष्यते न राज्ञः पुरुष इति। अनुवादः प्रयुरुष इष्यत इति एकपदीभेत्स्वर्यमेक
विभक्तिकत्वं सर्वदैकार्थीभावे इष्यत इत्यर्थः।

हा विभाषोच्यते। इदमुपलक्षणं। निषेधशास्त्राणांमिसंज्ञेत्यादिनिरसग्रहणस्य च। किमन्यादिति। न च विशेषणीभूतसामर्थ्यनैव संबंधः त
स्य लोकस्वभावसिद्धत्वेनाविधेयत्वाद्विशेषणतया च विकल्पानन्वयादिति भावः। न च संज्ञायामिति। एकार्थीभावविषये इति शेषः। तदाह। एकार्थी
भावइति। रामः

अर्थाभिधानस्य वाचनिकत्वपक्षे आह। भाष्ये। यथे वृत्तिवर्तयंतीति। वृत्तिं एकार्थीभावरूपां वर्त्तयंति शब्दस्त्रेणनिष्पादयंति ये शास्त्रैकगम्यं सामर्थ्यम
न्यंत इत्यर्थः। अयं भावः। एकार्थीभावकृतविशेषाः समर्थसूत्रविधेयाः सुबंतं सुबंतेन सह सामर्थ्यवद्भवति समर्थं च समाससंज्ञं स्यादित्यर्थः। एवं च
विभाषाधिकारादिसर्वे चरितार्थं। समासादौ वृत्तिव्यवहारस्तु वृत्तिवृत्तिमतोरभेदोपचाराद्बोध्यः। किं तेइति। स्वाभाविकत्वमते एकार्थीभावरूपावृ
त्तिर्लोकत एव सिद्धेति तन्निकिंचित्तत्र वक्तव्यं। ये तु शास्त्रनिष्पाद्यामन्यंते ते किं तत्स्वरूपं शास्त्राभिधानयोग्यमाहुरिति प्रश्नः। तत्ध्वनयन्नुव्याचष्टे। का

अथेति। कार्यशाब्दिकाना वाक्यादिव विकल्पेन वृत्तिं निष्पाद्यांमन्यमानाः किं वृत्तेर्लक्षणं कुर्वती
ति प्रश्नः। नैत्यशाब्दिकास्तु वृत्तिवाक्ये नित्ये विविक्तविषये मन्यंते॥ ॥ रामरामरा।

येशाब्दिका इति। शब्दानां शास्त्रकार्यत्वे तेषां लोके सिद्ध्यभावात् अर्थसंबंधस्य लोकतो ज्ञानासंभवेन तस्यापि शास्त्रविधेयत्वमेव वाच्यं। एवं च द्विकत्वादि
बोधकत्वया विभाषापदादिचरितार्थमेव च शास्त्रैकगम्यत्वादित्सामर्थ्यरूपवृत्तेर्लक्षणमपि कार्यमिति भावः। वृत्ति। वृत्त्याश्रयं समासादिरूपं। तेषां मतेव
त्तिव्यवहारप्रयोजकं वृत्तिधर्मवाक्यरूपं सामर्थ्यमपि विधेयमेवेति भावः। किं वृत्तेरिति। सामर्थ्यस्येत्यर्थः। नैत्यशाब्दिकास्त्विति। कार्यशब्दमादृनित्यश
ब्दमाहेत्यर्थः। तदाहेतिमाष्यादो दिव्यत्वादिति। शब्दस्य नित्यत्वे तदर्थसंबंधस्यापि तस्य तया नित्यत्वेनुभयोरपि लोकत एवं विवक्तविषयत्वेनैव सिध्ये
कोपस्थितिजनकतो वृत्तिसमुदायस्यैव वृत्तित्वेन तद्वृत्तेर्को पस्थितिजनकत्वा सामर्थ्यं लोकसिद्धमिति तन्मते प्रश्नइतिभावः।

 परस्पशब्दस्येति॰ प्रधानार्थकशब्दस्योपसर्जनशब्दस्य चेत्यर्थः॰ यत्रेति॰ समासादिवृत्तिव्यवहारादिति भावः॰ एवं चतन्निष्ठशब्दान्तरकरणकपरार्थाभि

परार्थाभिधानमिति॰ परस्पशब्दस्ययोर्थः तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः॰ यथा राजपुरुष इत्यत्र राजशब्देन वाच्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते॥

धायकत्वं तेषां स्वाश्रयत्वेन वृत्तिव्यवहारप्रयोजकं सामर्थ्यमिति फलितं॰ तच्च स्वार्थविशेषणक पुरुषार्थोपस्थितौ राजपदशक्तिज्ञानस्य सहकारित्वाद्बोध्यं॰

वर्णवदनर्थकोपलभ्यमानावयवानि॰

भाष्ये॰ वृत्तिवर्जनावादिनाभिसक्तेषां पदस्यव्यावर्त्यं दर्शयति॰ नित्येत्यादि॰ पदसरूपावयवत्वमपि न नास्तव मित्याह॰ वर्णवदिति॰ वर्णेष्विवात्राप्यवयवक्रमः इति भावः॰ तदेवाह॰ तत्वत इति॰ नन्वेवं तत्पक्षे समर्थः पदविधिरित्याद्यसंगतं तत्राह॰ केवलमसत्येति॰ वाक्यविषयपदसारूप्यादेव तद्वदर्थमध्यारोप्यान्वाख्यानमिति भावः॰ एवं च तत्पक्षे तेषामर्थस्यैवाभावात् तत्र सत्वासत्वसंदेहाभावादथ ते षामित्युक्तमिति भावः॥ ॥ केचित्तु नित्यशब्दवादेपि उपलभ्यमानावयवानां नैरर्थक्ये समुदायस्य निरवयवत्वे च मानाभावः॰ न चैतावतानित्यत्वहानिः शास्त्रानिष्पाद्यत्वरूपनित्यतायास्तथात्वहानात्॰ न चैवं भाष्ये ऽथ तेषामित्यसंगतं स्यात्॰ शास्त्रनिष्पाद्यत्वं द्वेधा॰ सावयवस्यैव लोकसिद्धत्वेनानादितया निरवयवतया

अथ तेषामिति॰ नित्यशब्दवादिपक्षे तु राजपुरुषादीनि वाक्यविषयपदसरूपावयवानि तत्वतो निरवयवान्येव केवलमसत्यप्रक्रियाश्रयेणान्वाख्यायन्ते॰ जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था॰ पुरुषमात्रस्येति॰ राजशब्दोपादानमनर्थकमिति चेत् पर्यायत्वेपुरुषराजपुरुषशब्दयोः पर्यायावकशब्दयोरिवस्यादित्यदोषः॥ ॥

वा॰ तत्राद्येऽजहत्स्वार्थैव द्वितीये तु तेषामर्थाभाव एवेति जहत्स्वार्थैवेति वा सवदेवमनभेदेन नियमात्संदेहाभावेऽनन्तदुक्तिरिति वक्तुं शक्यत्वात्॰ तत्रापि अंत्यपक्षे आरोपितमर्थवत्वादिशास्त्रप्रवृत्तिमात्रफलकं तेन महास्तुं दरद्रत्यादावात्वमपि सन्यदेतत्॰ शास्त्रानिष्पाद्यत्वमेतेतु स्वार्थत्यागेऽर्थान्तराभिधायकत्वानुपपत्तिः॰ अर्थात्यागे तु पुरुषमात्रानयनापत्तिरिति प्राहुः॰ जहतीति॰ शत्रन्तं॰ बहुवचनं प्रयोगबाहुल्याभिप्रायेण॰ स्वार्थं॰ तत्वेन प्रसिद्धं॰ जहति स्वानि पदानि यामिति[illegible]रत्वः॰ जहत्स्वोर्थो यस्याः सेत्यर्थ इत्यन्ये॰

कै०वि०२

लक्षेति॰ षष्ठ्यभावेनसंबंधाप्रतीत्याप्रातिपदिकार्थमात्रवृत्तित्वादित्यभिमानः॰ स्वेनार्थेनवशीकृतस्येति॰ स्वार्थमात्रोपस्थानेन्यासक्तस्येत्यर्थः॰ अ
र्थांतरोपादाने॰ अर्थांतरंप्रतिविशेषणत्वं॰ यद्वा अर्थांतरस्यस्वंप्रतिविशेष्यत्वेनोपादाने॰ नचपृथगुपस्थितयोः पश्चादन्वयः॰ संबंधबोधकविभक्त्य
भावात्॰ अभेदान्वयस्तुबाधितएव॰ अनुभवबाधितश्चेत्यभिमानः॰ उपात्तस्येति॰ अर्थोपादानस्येवतत्त्यागस्याप्येतन्मतेवचनेविनाऽशक्यत्वा

दिनवचनंप्राप्नोतीति॰ लक्षन्यग्रोधाविति यथा॰ जहत्स्वार्थेति॰ नहिस्वार्थमजहतः स्वेनार्थेनवशीकृतस्यार्थांतरोपादानंघटते॰ युक्तंपु
नरिति॰ उपात्तस्यार्थस्यत्यागायोगात्॰ अग्निनेवोह्यस्य॰ वाढंयुक्तमिति॰ परार्थवृत्तित्वादेव॰ अत्रैवदृष्टांतमाह॰ तक्षाराजकर्मणीति॰
यदाराज्ञातक्षादृत्याहीनदारुवकेकर्मनिहोति॰ नात्यंतायेति॰ त्यागमात्रमभिसंधायजहत्स्वार्थेत्युच्यते नतुसर्वात्मनात्यागः परोप
माधत्ते यदाहीतीत्यन्ये यदान्यंतरेण वस्त्राणां वस्त्रैर्युगपत्स्पर्धामिति पाठः तद्भुता चाभिसंबंध इति च इष्टौ तु सत्स्वामिति तस्मादिष्टिरुइष्टेति भाष्याभिप्राय इति भावः तर्हीदानीमिति तदेदानीमित्यर्थः इष्ट्यारंभे इति यावत् इदं न भवति इदं न सिध्यति भवति सिध्यति कुतस्तत्राह यदेति इति भाष्याक्षरार्थः

कै०वि०२ कथमन्यपदार्थस्यप्रकर्षइति॰प्रतः प्रत्ययस्तदर्थप्रकर्षस्तत्प्रत्ययनिमित्तं॰एवंच सौक्ष्म्यप्रकर्षेप्रत्यये क्रियमाणेऽन्यपदार्थप्र
कर्षाभावात्कथंतत्प्रतिपादकसमुदायात्प्रत्ययः प्रकर्षरूपप्रतिपादनेतु नैकस्यसामर्थ्यं॰नच सौक्ष्म्यप्रकर्षएवान्यपदार्थप्र

यदुक्तंबहुव्रीहौकृतेपश्चात्सातिशायिकःक्रियतेतत्राह॰कथंपुनरिति॰अतिशयेनसूक्ष्मवस्त्रइति
बहुव्रीहेःप्रत्ययेक्रियमाणेवस्त्रगतसौक्ष्म्यप्रकर्षेकथमन्यपदार्थप्रकर्षःस्यादित्यर्थः॰अत्रोत्तरं॰
नैवान्यस्येति॰सर्वत्रैवयतःप्रत्ययोविधीयतेतदर्थस्यस्वतःप्रकर्षाभावादन्यगतएवप्रकर्षआ
श्रीयते॰यथोक्तं॰द्रव्यस्याव्यपदेश्यस्ययउपादीयतेगुणः॰भेदकोव्यपदेशायतत्प्रकर्षोभिधीयतइति॰ए
कएवासौप्रकर्षइत्यर्थः॥

कर्षः॰अन्यदीयस्यान्यदीयत्वायोगादितिभावः॰एकएवासाविति॰गुणप्रकर्षइत्यर्थः॰सचक्वचित्प्रवृत्तिनिमित्तगुणप्रकर्षः यथाशुक्ल रामं०
तरइत्यादौक्वचित्तत्सहचारितगुणप्रकर्षः यथागोतरइत्यादौक्वचित्तद्विशेषण×एवद्रव्यप्रकर्ष×घटकगुणप्रकर्षेयथाप्रकृते॰नैवान्य १०८
स्येतिभाष्येणापिपृथक्द्रव्यप्रकर्षोनात्रएवप्रतिपाद्यतेइतिबोध्यं॰

७५४

भाष्येवस्त्राणिप्रेस्युरिति॰वस्त्रस्यद्रव्यत्वात्तत्रप्रकर्षोत्तत्वैभावेनतरप्नकृतः॰सूक्ष्मतराणीति॰सूक्ष्मत्वस्यगुणत्वात्तत्रप्रकर्ष
संभवेनबहुव्रीहेरुत्पन्नेनात्यातिशायिकेनपरंपरासंबद्धस्यतस्यैवप्रकर्षउच्यतइतिभावः॰तथापिमन्त्रेति॰साक्षात्स्वगतगुण
प्रकर्षस्वसंबंधिपदार्थगतगुणप्रकर्षोवाउभयमपिद्रव्यप्रकर्षरूपंभवत्येवेतिभावः॰भाष्येगुणवचनादिति॰गुणोपसर्ज
नगुणिबोधकात्प्रवृत्तिनिमित्तगुणप्रकर्षेतत्सहचारितगुणप्रकर्षेवाप्रत्ययौयउच्यतइत्यर्थः॰गुणग्रहणंधर्ममात्रपरं॰सम

यद्यप्यत्राश्रयांतरवर्तीगुणप्रकर्षःतथापियत्रमथाभूतःसंभवतितत्रतथाभूतआश्रीयते॰गुणवचना
दिति॰नात्राजादीगुणवचनादेवेतिबोद्धव्यं॰तरपोत्रप्रकृतत्वात्॰तस्माद्गुणस्यैवप्रकर्षःसंभवतिनद्र
व्यस्येत्याश्रित्यैतदुक्तम्॰अजहत्स्वार्थेति॰तत्रसूक्ष्मार्थस्यविद्यमानत्वात्प्रकर्षसंभवः॥ ॥

सोपिगुणवचनइति॰सूक्ष्मत्वविशिष्टवस्त्रविशिष्टपुरुषवचनत्वादितिभावः॰अन्यपदार्थेरूढतयागुणवचनत्वंनेत्याशयेनपृ
च्छति॰कथमिति॰उत्तरयति॰अजहत्स्वार्थेति॰एवंचावयवार्थोपस्थितान्यपदार्थस्यसमुदायेनोपस्थापनाद्गुणवचनत्वं॰प्रवृत्तिनि
मित्तसहचारितगुणप्रकर्षइवप्रवृत्तिनिमित्तविशेषणविशेषणगुणप्रकर्षोपितदुत्पत्तिनिमित्तेसचगोतरइत्यादावेवाच्ययतो
पियादनिमित्तंकिंचकव्यंविशेषणविशेषणतयावाच्यस्येतिभावः

कै०वि०२ अथेति। तत्रहि उपसर्जनपदानामर्थाभावेपि प्रधानपदेन समुदायेन वस्तुतस्तादृशगुणोपलक्षितव्यक्तेरेव बोधो न तु गुणानां वाच्यत्वमिति भावः। न हत्वार्थायां च न दोष इति। अनयवानामर्थाभावेपि तद्गुणविशिष्टाया व्यक्तेरानयनादिप्रयोगौ वाच्यत्वेपि

बहूच्यतर इति। यद्यत्र बहुव्रीहिः कृतः स्यात्तदातिशायिकः क्रियेत तदा बहोर्नञ्वदुत्तरपदभूम्नीत्यंतोदात्तत्वमाद्यशब्दाकारस्य स्यात्। रेफाकारस्य चेष्यते। अयमर्थोन्यायसिद्धो यदि समासोत्प्रकर्षे प्रत्यय उत्पद्येत तदा किं बहुत्वगुणाश्रयः प्रकर्षः उत आढ्यत्वाश्रयः प्रत्ययोत्पत्तिनिमित्तमिति संदेहः स्यात्। तस्मात्पूर्वं प्रकर्षस्य विवक्षा पश्चादन्यपदार्थस्य। शाकभोजीति। शाकभोजित्वात्तत्त्वादृचर्मातद्यपदेशान्नार्थउत्तरपदलोपेनेत्याहुः॥

तथा तद्गतप्रकर्षे प्रत्ययः गोतर इत्यादावपि वाच्यवाहदोहादिप्रकर्ष इवेति भावः। संदेहः स्यादिति। प्रकरणादिना निश्चयसंभवादि दं चिंत्यं। नार्यउत्तरपदलोपेनेत्याहुरिति। अत्रारुचिबीजं तु शाकभोजिपार्थिव इत्यादिप्रयोगव्यावृत्तये वार्तिकमावश्यकमिति॥ ६८॥ ६९॥ राम० १०९

७५५

कै०मि०२ चतुष्पादो॥ ॥भाष्ये वक्तव्यमित्यस्य विच्छिन्नत्वाद्व्याख्येयमित्यर्थः। व्याख्यानप्रकारं दर्शयति। केचिदित्यादिना। शब्दांतरेति। चतुष्पाद्वचनाच्चतुष्पाद्विषया इत्येव पाठः। जातिरित्यस्य विच्छिन्नत्वादंतरंगबहिरंगभावस्य च सर्वैर्दुर्ज्ञेयत्वाद्वचनमेवावश्यक

चतुष्पा॥ ॥चतुष्पाज्जातिरिति। केचिज्जातिग्रहणमनुवर्त्यमित्याहुः। अन्ये त्वाहुः। शब्दांतरसन्निधिनिरपेक्षा ये चतुष्पाज्जातिवचनास्त एवांतरंगत्वादुच्यंते। न तु कालाक्ष्यादयो यौगिकाः शब्दांतरसन्निधानाच्चतुष्पाज्जातिविषयाः॥ ॥मयूर॥ मयूर इव व्यंसको धूर्तः छात्र इव व्यंसकः काकोजंघ इव मुंड इत्युपमानसमासापवादोयं समासः। प्रतिपदविहितोपमानसमासविषयपूर्वपदप्रकृतिस्वरबाधनार्थ इत्याहुः॥ ॥इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयाध्यायाध्यायस्य प्रथमपादे तृतीयमाह्निकम्॥ ॥छ॥ समाप्तश्चायं प्रथमः पादः॥ ॥छ॥ ॥राम॥ ॥छ॥ ॥इ

मितितत्त्वं॥ ॥७॥ ॥मयूर॥ ॥मयूर इव व्यंसक इति। केचित्तु विशेषणसमासे गुणवचनत्वाद्व्यंसकस्य पूर्वनिपाते प्राप्ते इदमित्याहुः॥ राम
तन्न। उपमानानीति सूत्रस्थभाष्यकैयटरीत्या तस्य येन नाप्राप्तिन्यायेन विशेषणसमासबाधकत्वात्॥छ॥ इति शिवभट्टसुतसतीगर्भजना ११०
गोजीभट्टकृते भाष्यप्रदीपोद्योते द्वितीयाध्यायतृतीयाह्निके पादश्च समाप्तः॥१॥ ४२२

प्रथमपादस्य

७५६

द्वि·द्वि·समारंभः।
द्वि·प्र·समाप्तिः

द्वि·द्वि·प्रा·

कें वि० २०२

श्रीगणेशायनमः॥ ॥ण॥ अर्धेनपुंसके॥ ॥सूत्रेनपुंसकमित्युक्तेरिहकस्मादितिप्रश्नोनुपपन्नइत्याशंक्याह॥ नपुंसकस्येति॥ सूत्रे
नपुंसकग्रहणंकिमर्धशब्दस्यार्थविशेषप्रतिपत्तयेउतसमासगतरूपविशेषप्रतिपत्तयेनाद्यइत्याह॥ अव्यवस्थितत्वादिति॥ नपुं

श्रीगणेशायनमः॥ ॥अर्धे॥ ॥नपुंसकस्याव्यवस्थितत्वात्कृतेचसमासेपूर्व
पदार्थस्यलिंगविशेषानवधारणात्कृतमपिनपुंसकग्रहणमकृतसममितिम
त्वाप्रश्नः॥ इहेति॥ कपुनरिति॥ नपुंसकत्वावधारणहेतावर्थे प्रश्नः॥ ॥राम

सकत्वस्यापूपार्धमित्यादावन्यपदार्थेपिदर्शनादितिभावः॥ नांत्यइत्याह॥ कृतेचेति॥ तस्यनपुंसकत्वलक्षणविशेषानवसायेनतत्कृत
रूपविशेषाभावादितिभावः॥ अधिकरणस्याकाशस्यनिर्ज्ञातत्वात्प्रश्नानुपपत्तेराह॥ नपुंसकत्वेति॥ कस्मिन्नर्थेपुंस्त्ववाचकइतिभाष्याक्ष
रार्थः॥ राम० १

७५७

पुंल्लिंगएवेतिमत्वंचारयति॥ नियमेनेति॥ नपुंसकग्रहणंज्ञापकमिति॥ निर्देशेननपुंसकत्वमात्रेलब्धेपिनित्यनपुंसकत्वलाभायत
स्यावश्यकत्वं॥ अन्यथोअपूपार्धंदंतार्धमित्यादावसमांशवाचिन्यपिएकदेशिसमासः स्यादितिचिंत्यमेतत्॥ ॥परेतुसमप्रविभा
गेनपुंसकलिंगइत्यस्यनपुंसकलिंगोपीत्यर्थः॥ अतएवओडेचइतिसूत्रेभाष्येएचोह्रस्वविधानेऽर्धेकारोर्धौकारौप्राप्नुतइति

अवयववाचीपुंल्लिंगइति॥ नियमेननपुंसकलिंगोनभवतीत्येवंपरमेतत्॥ अवयववाचीत्वभिधेयवशात्सर्व
लिंगः॥ तथाचप्रयोगोदृश्यते॥ अपूपार्धंमयाभक्षितंदंतार्धमास्यास्थितमिति॥ तदत्रनपुंसकग्रहणा
द्यस्मिन्नर्थविशेषेनियमेननपुंसकत्वंतदर्थवृत्तिरर्धशब्दआश्रीयते॥ तत्रैवार्थेनपुंसकत्वाव्यभि
चारात्॥ अर्धपितिनिर्देशादेवनपुंसकत्वेलब्धेनपुंसकग्रहणंज्ञापकंनिर्देशोपुंलिंगाविवक्षायाः॥ ॥

शंकायांनैवलोकेनापिवेदेऽर्धेएकारोर्धओकारोवास्तीत्युत्तरपरंभाष्येसमप्रविभागविषयेपिपुंलिंगःप्रयुक्तः॥ अवयववाचीतुपुंलिंगएव॥
अपूपार्धमितिसमप्रविभागएव॥ अन्यत्रापूपार्धइत्येव॥ परवल्लिंगमितिसूत्रेभाष्येतत्पुरुषमित्युत्तरसूत्रेस्फुटीकरिष्यते॥ अन्यतरस्यांग्रह
णापकर्षेणयोगविभागेनवाएकदेशिसमासविषयेषष्ठीसमासःसूत्रकृतोपीष्टएवंवर्णंचारंभप्रत्याख्यानयोःसमफलतानपुंसकग्रह
णंतुसूत्रेपुंलिंगाविवक्षायां निर्देशो ज्ञापकमित्याहुः॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

वै०वि०२०२ भाष्येऽर्धपिप्पलीनामिति॰ दृशानां पिप्पलीनामर्धमित्यर्थः॰ नचसमासे एकत्वसंख्यायाः अश्रुतत्वेन कथमत्र समासापादनं एकत्वस्यापि तत्राभानात् शुद्धपिप्पलीत्वेनानेकपिप्पलीबोधसंभवइति शंकाशयः इतरोर्धपदार्थस्यतत्रपंच पिप्पलीरूपत्वेन समासे बहुवचनं मत्वाह छूति॰ नवाभवतीति॰ अर्थांतरे भवतिनत्वेतदर्थे इत्याह परः॰ भवतियदेत्यादिना॰ अर्थश्चात्रेति॰ ^ दृशानांपिप्पली

यदात्वेतदिति॰ अर्थश्चात्राभिधीयते एव॰ समासेचकृतेऽर्धपिप्पलीत्येवस्यात् पूर्वपदार्थस्यच प्राधान्यात्तस्य चैकत्वात्॰ अर्धराशिरिति॰ राशेरवयवव्यतिरेकेणासत्वादवयवानां बहुत्वादेकत्वाभावंमन्यते॰ एकमेवेति॰ शब्दादेकस्यैवार्थस्य तिरोहितभेदस्यावगमात्॰

नामर्थेचेत्यत्रार्थः पिप्पलीनां प्रत्येकमर्धानि बहूनीति तत्रार्थः॰ भाष्ये तदा न भवितव्यमित्यस्य अनेन रूपेण न भवितव्यमित्यर्थस्त मभिप्रेत्याह॰ अर्धंपिप्पलीत्येनस्यादिति॰ पद्यप्यर्धपदार्थो बहवस्तथाप्यर्धशब्देनैकत्वावरुद्धसमुदायस्यैवभानादिति भावः॰ तदाकस्मान्नेति॰ समासः कुतो नेत्यर्थः॰ तिरोहितभेदस्येति॰ तिरोहितावयवभेदस्येत्यर्थः॰ समूहः समूहिभ्यो भिन्नोपीति भावः॥ ॥२॥ रा म० २

७५८

द्वितीयतृ॥ ॥नांतरीयकृतयेति॰ तस्मिन्ध्यनुगुणतया ज्ञापकत्वमस्येति भावः॰ स्मरणाय पुनर्ज्ञाप्यतेइति॰ वारद्वयज्ञानेपेदृढसंस्कारजननद्वारा शीघ्रंस्मरणायेत्यर्थः॰ विनिगमनाविरहादिदमपि ज्ञापकमिति भावः॰ सामान्येऽव्ययनाभावादाह॰ सामान्या

द्वितीय॥ ॥अन्यतरस्यांग्रहणस्यपक्षे षष्ठीसमासप्राप्त्यपेक्षत्वस्य ज्ञापकतां नांतरीयकतया प्रतिपादयितुं पूर्वपक्षोपन्यासः॰ पद्यपिवारेमध्यइत्यत्रायमर्थो ज्ञापितस्तथापीह स्मरणाय पुनर्ज्ञाप्यते॰ अवयवविधानइति॰ सामान्याश्रयसमूहापेक्षया प्रतिनियतो विशेषएकदेशो भवतीति विशेषविषयविधानमवयवविधानशब्देनोक्तं॰ किमेतस्येति॰ न्यायादेव विशेषविधिः सामान्यविधेर्बाधकइति मत्वाह छूति॰ भिन्नत्वीति॰ विरोधादेकफलत्वाच्च बाध्यबाधकभावः॥ इह तु भिन्नदेशत्वाद्विरोधो वा विकरणादीनांचानर्थक्यादेकफलत्वाभावः वार्त्तिककारस्य मते नेदमुक्तं॰ सहिविरोधाभावे बाध्यबाधकभावंनेछति॰ तथाचाह॰ अप्रबद्धजकक्षुनानादेशत्वादुत्सर्गप्रतिषेधइति॰ अयसमूहेति॰ षष्ठीत्यादिना सामान्यशास्त्रेणविहितेत्यर्थः॰ प्रतिनियतइति॰ अर्धमित्यादिशास्त्रेण विहितः॰ भाष्येऽवयवविधाविति॰ तद्विषयेनोत्सर्गप्रवृत्तिरित्यर्थः॰ न्यायादिति॰ येन नाप्राप्तिन्यायादित्यर्थः॰ विरोधादित्यादि॰ तदुभयसत्वेहि बाध्यबाधकभावः॰ प्रकृते चोभयोरप्यभावात्तदभावइति वार्त्तिकमते तेनेदंप्रयोजनमुक्तमित्यन्वयः॰

वै०वि०२०२ भाष्यकारस्त्विति । सत्यपि संभवे बाधनं भवतीति तदुक्ते रितिभावः ॥ नन्वीदृशं दृष्टिदानेन तत्करानस्य निवर्त्तकं दृष्टं तत्र ह्येकफलता स्तिन च सा प्रकृते इत्यत आह । अर्थाभिधाने इति । प्रतिपत्तिः प्राप्तिः । वस्तुतो भाष्यनये विरोधाभाव इवैकफलत्वाभावेपि बाधइ तिनिरूपितमाकडारसूत्रे भाष्ये । शबादेशाः श्यनादय इति । तत्रश्नमादेशा लुपं निवर्त्तयति मित्त्वादंत्यादचः परो रमागमबाधितीति भावः ॥

भाष्यकारस्तु विनापि विरोधेन सामान्यविशेषविध्योर्बाध्यबाधकभावमभ्युपगच्छति । अर्थाभिधाने साहायकप्र तिपत्तौ एकफलताप्यनयोरस्ति । प्राङ्मुखीति । अस्वांगपूर्वपदाद्वेत्यतो ङीष्विधौ वेत्यनुवृत्तिः ॥ नैतदस्तीति । वार्तिककारस्य मतमाश्रित्य प्रयोजनप्रत्याख्यानं । यदाऽपूर्वो ङीष्विधीयते तदा प्राङ्मुखी प्राग्जघने त्यादावपि स्यात् ॥ ॥ ॥

भाष्ये पत्रोत्सर्गापवादमिति । पत्रोत्सर्गापवादं महाविभाषाविकल्पितं तत्रेति पाठांतरं । अस्वांगपूर्वपदाद्वेत्यतो ङीश्ङीष्विधौ वेत्यनु राम०
वृत्तिरितिपाठः ॥ उत्सर्गापवादयोरुभयोरपि वैकल्पिकत्वं दर्शयितुं ङीषङीष्विधानिस्युक्तं । वार्तिककारस्येति । यदि त्वसंयोगोपधादि ३
त्याद्यनुवृत्त्या पूर्वो ङीष्विधीयते तदा प्रयोजनं भवत्येवेत्येवमुक्तं । इत्यादावपि स्यादिति । असंयोगोपधादित्याद्यनुवृत्तौ प्रतिपत्तौ गौरवमिति
वार्त्तिकाशय इति भावः ॥ ॥

७५९

७२

ङीष एव त्वनुदात्तत्वविधानेति । ङीबादेशद्वारेत्यर्थः ॥ नित्यस्वरमात्रविधाने इत्यस्यापि स्वरमात्रफलके ङीबादेशविधाने सर्वथः नित्यत्वेवायग्रहणाननुवृत्तेः ॥ तदनुवृत्तौ हि पक्षे ङीषु श्रवणं स्यादिति भावः ॥ भाष्ये इदं तर्हि प्रयोजनमर्धपिप्पलीत्यादि । परवल्लिंग मिति सूत्रस्थभाष्येणेदं विरुध्यते । तत्र हि एकदेशिसमासो नारभ्यते कथमर्धपिप्पलीति । समानाधिकरणो भविष्यति । अर्धं चा सौ पिप्पली चेति । नचैकदेशिसमासारंभे षष्ठीसमासस्य तेन बाधो भवति । अन्यथा षष्ठीसमासोपि प्राप्नोति । इष्यते षष्ठीसमासो

ङीष एव त्वनुदात्तत्वविधाने ङीपोत्र प्रतिषिद्धत्वाद्दोषाभावः ॥ तदेवं नित्यस्वरमात्रविधाने नास्ति सामान्यविशेषविधि त्वं । व्यतिविषयइति । एकार्थीभावविषय इत्यर्थः ॥ नेतदिति । पूरणेत्यत्र पूरणाधिकारविहितप्रत्ययांतग्रहणादिति भावः ॥

पि । अपूपार्धमनया भक्षितं त्वर्धं मया ग्रामार्धमिति । एवं पिप्पल्यर्धमित्यपि भवितव्यमित्युक्तं । तस्माद्यथाश्रुतसूत्रमते एकदेशिसमि ये । उन्मत्तगंगं लक्षणमव्ययीभावेनेति । यद्यपि वाकेन संज्ञाने न गमात्त्वान्यपि भावो नित्यसमासस्य दृशः तद्वत्समासान्तरनायकेन वा काभा वात्तथापि वा पदं तत्र संबध्यत एव । अत एव वाकं भवत्येव । अत एव संज्ञायामिति समासविषयेपि नाप्यामभ्यो वाप्यश्च इति वाक्यं भाष्याद्युक्तं संगच्छते इति भावः ॥ पूरणाधिकारेति । पूरणशब्दस्य स्वरितत्वादित्यभिमानः ॥ ॥ ॥ ॥ ॥

कै॰वि॰२०२ पर्यायपन्नशब्दं व्याचष्टे· अनात्यवहितमिति· स्वरभेदं प्राप्तमिति यावत्· ननु तदपि कोरेति· एवं च सूत्रविनिगमनाविरहाद्भाष्यप्रामा
ण्याज्ञानप्रत्ययांतानां केवलानां च द्वितीयादीनां ग्रहणं· भिक्षासंबंधित्वेंद्विसंख्यापूरणमित्यर्थः· भाष्ये एवं तर्हीति· अन्यतरस्यामित्ये

अनैतदिति· पूरणप्रत्यागेतीयादनिति स्वार्थिके नानात्यवहितमित्यर्थः· एतदपीति· पूरणगुणसुहितार्थेत्यत्रार्थशब्दस्य
प्रत्येकं संबंधात्पूरणार्थग्रहणं· ननु तदधिकारविहितप्रत्ययग्रहणमित्यर्थः॥ ॥प्राप्तापन्ने॥ ॥अत्वं च भवतीति·
चकारेण समुच्चयार्थेनाकारप्रश्लेषोऽनुमीयते· सौत्रत्वाच्चेति ईशस्य प्रकृतिभावः प्रगृह्यत्वं यो न भवति· यद्वा समाहा
रद्वंद्वे कृते विषयसप्तम्याः कारादेशापेक्षा क्रियते· सुब्विति चानुवर्तनात् प्राप्तापन्नयोरेव सन्निधानादुपसर्जनसंज्ञा
भवति· सूत्रारंभसामर्थ्याद्वा· प्राप्ताजीविकामिति· लिंगविशिष्टपरिभाषया प्राप्ताशब्दस्य समासः॥ ॥ ॥

तत्सामर्थ्यात्पूरणेति प्रतिषेधो नेति भावः॥ ॥३॥ ॥प्राप्तापन्ने॥ ॥अयमप्युच्यत इत्यादि· उभयोरपि प्राप्तापन्नयोर्ग्रहणे न विशेषविहि राम॰
तत्वादित्यर्थः· द्वितीययेत्यत्र प्रश्लेषे उद्देश्यासन्निधाने चकारेणाप्यवधाने चेति भावेनाह· सौत्रत्वाच्चेति· सूत्रारंभेति· द्वितीयाश्रितेत्येवसि ४
द्धे एतत्सामर्थ्यादिति भावः· लिंगविशिष्टेति· एकादेशस्य पूर्वान्तत्वादित्यपि बोध्यं॥ ४॥

७६०

कालाः॥ ॥तत्पुरुषे प्रायउत्तरपदार्थप्राधान्यात्प्रश्नानुपपत्तिमाशंक्याह· इहेति· प्राधान्यमिति· एवं च समानार्थत्वभंग इति भावः·
ननु चित्रगुरित्यादिवत्समासे उत्तरपदार्थप्राधान्यं एकार्थीभावकृतं स्यात्तत्राह· अन्योत्तरेति· तद्धर्मत्वं चभाष्योक्तं· किंच वाक्यविपरी
तविशेषणविशेष्यभावेनैकार्थीभावसाध्यः· अतएव तत्स्य एकार्थीभावकृतविशेषेषु भाष्ये गणना भावः· किंप्रधानोयं समास इति
समासपदं विग्रहपरमपि उत्तरपदार्थप्रधान इत्युक्तरमपि उभयसाधारणं· न च विग्रहेपि जातस्य प्राधान्ये जातस्य मास इति षष्ठ्य

कालाः॥ ॥इह वृत्तिवाक्ययोः समानार्थत्वं न्याय्यं· मासो जातस्येति च वाक्ये जातस्य विशेषणत्वादप्राधान्ये समासे तु मासो जातो दृश्य स॰
तामित्यादौ जातस्यैव कार्यसंबंधावगमात् प्राधान्यमन्योत्तरपदार्थप्रधानत्वे धर्मश्च मत्वाप्य इति· किंप्रधान इति॥ ॥

नुपपत्तिः विशेषणादेव षष्ठीविधानादिति वाच्यं· वृत्तिविग्रहयोः समानार्थत्वानुरोधेन तस्य वाक्यस्य वस्तुतो बोधकत्वविवक्षायां वि
शेष्यविशेषणभाववैपरीत्येपि पूर्वजातसंस्कारानिवृत्तेः अन्यथा समासे समासप्राधान्येन विशेषणविभक्तिषष्ठ्यापादनस्य भाष्ये
ऽसंगत्यापत्तेः मम तु न दोषः· विग्रहेपि तस्यैव प्राधान्येन तद्विभक्ति वत्समासादपि तदापादनात्· न तु उत्तरपक्षेवत्तत्र समासविशेष
णकसंबंधप्रतीतिवत्समासेपि विशिष्टोत्तरपक्षात्तत्त्वभवदुक्त्याशापातः संबंधस्याशेषत्वान्न षष्ठी स्फुटतरं॥ ॥ ॥

कैय्य०२०२ माष्येपैवासावंतर्वर्तिनीति· उत्तरपद इति शेषः· योसाविति· परिच्छेद्यपरिच्छेदकत्वरूपः· समासे इति· षष्ठीप्रयोजकोनभवतीत्यर्थः
तदाह· अभिहित इति· षष्ठ्यभवनेनिमित्तमिदं· प्रथमोत्पत्तिनिमित्तमाह· प्रातिपदिकार्थ इति· यतोभिहितोऽतएवप्रातिपदिकार्थः
संपन्न इत्यर्थः· अन्यथापचतीत्यादौ कर्त्राभिधीयमानो गुणभूतत्वादंतर्भूतोपीति तत्रापि प्रथमास्यादत इदमुक्तं· अनभिहितसंबं
धएव षष्ठीतितात्पर्यं· अंतर्भावादिति· संबंधिविषयकोपस्थितिविषयत्वादित्यर्थः· अनुद्भवएवेति· पृथगुपस्थित्यविषयसं

पोसाविति· षष्ठीनिवृत्तोन्यायकथनं संबंधस्यचांतर्भावादनुद्भवएवनिवृत्तिः· अभिहितइति· प्रथमोत्पत्तिनि
मित्तकथनं· अनुद्भूतोपिसंबंधोगुणभावेनसमासाभिधेयत्वादभिहित इत्युच्यते· तत्राभिहितोपिकश्चिन्नांतर्भवति·
यथाराज्ञः पुरुष इत्येत्रवाक्येषष्ठ्यासंबंधोभिधीयते नतुकश्चिदंतर्भावमुपयातिः॥ ॥ ॥

बंधिकत्वमनुद्भवः· प्रथमोत्पत्तिनिमित्तमिति· षष्ठीप्रतिबंधद्वारेत्यर्थः· ननुपक्त इत्यादौ तत्वेनाभिधीयमानंकर्मादिकमभिहितमित्यु
च्यते नेषतथासंबंधत्वेनाभावादत आह· गुणभावेनेति· संबंधाभिधानमेवमेवभवतीत्यर्थः· संबंधिविषयकोपस्थितिविषयत्वमेवगु राम
णभाव इत्याहुः· नतुकश्चिदंतर्भावमिति· नसंबंधिविषयकोपस्थितौविषयोभवतीत्यर्थः· उभयोः पृथगुपस्थितयोरेवसंबंधसंभवादितिभावः· ५

७६१

विवक्षितोर्थ इति· कियान्कालोस्यजातस्येति प्रश्नेजातस्यमासइत्युत्तरेऐवाकांक्षाशांतिर्नतुमासस्यजात इति उत्तरेणेतिसएवविवक्षि
तोर्थः सचनततः प्रतीयत इतिभावः· मासजात इति समासस्यत्वार्थमुत्तरत्वबोध्यं· नन्वेवंविग्रहेषष्ठीसमासेनैवसिद्धेः सूत्रंव्यर्थं उत्तरंतु
नवेवमप्यार्थमेवेति चेन्न· एतद्भाष्यप्रामाण्येनपरिच्छेद्यपरिच्छेदकसमभिव्याहारेपरिच्छेदबोधकादेवषष्ठीतिस्वीकारात्· अवय

राजसखादौ चबहुव्रीह्यर्थस्यांतर्भावोस्तिनत्वभिधीयत इति उभयोरुपादानं· इहपरिमाणं जातस्यप्रतिपादयितुंवाक्येपरि
माणिनएवषष्ठीकर्तव्यामासोजातस्येति· मासस्यजात इति ह्यभिधीयमानेविवक्षितोर्थोनप्रतीयते तत्रयथाचित्रागावोयस्येति
वाक्येयद्यपिगवांप्राधान्यंतथापिचित्रगुरितिवृत्तावप्राधान्यमेवतथेहापिवृत्तिवाक्ययोः परिमाणिनःप्राधान्याप्राधान्येशब्द
शक्तिस्वाभाव्याद्भवतः भवतिबाह्यमिति· परिमाणपरिमाणिसंबंधएवसमासेंतर्भूतोनतुबाह्यसंबंधापेक्षोमासजातस्यवस्त्र
मित्यादिरपिसंबंध इत्यर्थः·
बिनोः समभिव्याहारेयथावयविवाचकादेव· तत्रार्थजातमास इत्यानिष्टमित्यर्थस्तत्रे· शब्दशक्तिस्वाभाव्यादिति· यद्यपिएतद्भा
ष्यात्तद्धलीतिसूत्रभाष्याच्चवृत्त्यर्थोपदर्शकेविग्रहवाक्येपितत्समानेवविषयतेतिलभ्यते तथाप्यत्रवाक्यपदमर्थबोधायप्रयु
क्तस्वतंत्रवाक्यपरमितिबोध्यं· भाष्येप्येवमेव॥ ॥श्रीराम॥ ॥श्रीछछ॥ ॥ ॥श्रीः

के०वि०२०२ सत्तायानित्यत्वादिति॰ नित्यत्वमत्रपरिच्छेदककालाधिककालस्थायित्वं बोध्यं॰ इत्यभिप्रायेणेति॰ जातसंबंधीकालोमासइ
त्यभिप्रायः॰ भाष्येवदत्तणमिति॰ देवदत्तसंबंधिवदराणमित्यर्थः॰ कालशब्देनेति॰ कालपरिमाणमितिषष्ठीतत्पुरुषः॰ अत्र

नहिजातस्येति॰ तस्यहिदिष्ट्यादिपरिमाणंनतुमासः॰ नापितत्सत्तायामासः परिमाणंसत्तायानित्यत्वात् नापिजन्मक्रि
यायास्तस्याएकक्षणमात्रवित्वात्मासेनसंबंधाभावात् त्रिंशद्रात्रस्येष्ट॰ ननुत्रिंशद्रात्रएवमासोनापरइतिभेदाभा
वादयुक्तमेतत् तत्रेषदोषः॰ कालोजातस्यमासेनपरिछिद्यतेतथाहि॰ कियानुकालोस्यजातस्येतिप्रश्नेमासइत्यादि
प्रतिवचनं सचपरिछिद्यमानः त्रिंशद्रात्रात्मकएवसंपद्यतेइ त्यभिप्रायेणेतदुक्तं॰ एतदेवदृष्टांतेनदर्शयति॰ तद्यथेति॰
सिद्धंत्विति॰ कालशब्देनकालसामान्यमुच्यते॰ यस्यजातादेःसंबंधिनःकालसामान्यस्यपरिमाणंमासादितेनसका
लोमासादिःसमस्यते॰ अथवाकालशब्देनमासादिःकालविशेषउच्यतेसकालःपरिमाणंयस्यकालसामान्यस्यत
द्यस्यसंबंधितेनसकालोमासादिःसमस्यतइत्यर्थः॰
व्याख्यानेवार्त्तिकस्यकालपदार्थयोःस्वरसतऐक्यंप्रतीयमानंमन्यतेत्यतआह॰ अथवेति॰ अत्रपक्षेकालपरिमाणमितिबहुव्रीहिः॰ तद्यस्ये राम० ६
ति॰ तत्कालसामान्यं॥

७६२

जातमपिप्रतीति॰ जननक्रियापरिछेदद्वारेत्यर्थः॰ तरुतणेति॰ पदार्थोनामनन्यथासिद्धकार्यपक्षयानुमेयःकालइतिभाष्याशयइ
तिभावः॰ प्रत्ययांतरं॰ कारणांतरं॰ तस्यैकत्वादिति॰ अखंडकालाभिप्रायमिदं॰ वस्तुतस्तुएकत्वेतस्यकार्यवैचित्र्यनियामकत्वानुप
पत्तिरितिभाष्योक्तलक्षणानुपपत्त्याक्षणधारारूपःकालइतियुक्तं॰ क्षणानांचाशुविनाशित्वात्कथमयंमहरादिविभागइतिचाव

कं पुनरिति॰ यदिनित्यएकोविभुःकालस्तदातस्यभेदाभावात्परिछेदकत्वासंभवः॰ अथोपाधिभेदात्तस्यभे
दस्तदातद्वेदभिन्नस्यजातमपिप्रतिपरिछेदकत्वमस्त्येव॰ येनमूर्त्तीनामिति॰ तरुतृणलताप्रभृतीनांक
दाचिदुपचयोअन्यदात्वपचयःसप्रत्ययांतराविशेषेपियत्कृतःसकालइत्यर्थः॰ यद्येवंतस्यैकत्वा
त्कथमहरादिविभागइत्याह॰ तस्यैवेति॰ परोपाधिकएवसर्वस्यभेदः॥ ॥ ॥

तारणंयुक्तंकेयटेपि॰ नित्यःप्रवाहनित्यतया॰ एकःसमूहरूपेण॰ विभुः॰ क्षणस्यविभुत्वात्॰ तस्यसमूहस्यैकत्वादित्यर्थइत्यन्ये॰ इ
त्याहेति॰ इतिहेतोराहेत्यर्थः॰ भाष्येतस्यैवेति॰ बुद्धिविषयक्षणसमूहस्येत्यर्थः॰ क्रिययेति॰ क्रियासमूहेनेत्यर्थः॰ नन्वौपाधिकत्वे
अपरमार्थतास्यादतआह॰ परोपाधिकएवेति॰ व्यवहारमात्रस्यौपाधिकत्वाद्यावद्बाधंप्रामाण्यमंगीकार्यमितिभावः॥ ॥राम

कै०कि०२०२ अत्रार्थे वृद्धसंमतिमाह· तथा चेति· तस्य क्षणसमूहरूपकालस्य· आत्मा स्वरूपं· धर्म्यन्तराश्रयैः· धर्मी स्वरूपस्तत्र वृत्ति अंतरं धर्मांतरं
धर्मविशेषः क्रियारूपः स आश्रयो येषां तैः क्रियाश्रितैः भेदैः विशेषैः बहुधा अहरादिभेदेन· न केवलं कालस्यैव भेद औपाधिकः किं
तु सर्वस्यापीत्याह· भेदाभेदौ एकत्वानेकत्वे शुक्लत्वकृष्णत्वे इत्यादि सर्वमपि न कस्यचित्स्वाभाविकमित्यर्थः· तदुक्तं· नहि गौः स्वरूपे
ण गौः नाप्यगौः गोत्वाभिसंबंधात्तु गौरिति· किं सोपाधिकमेवेत्याह· द्रव्यात्मेति· द्रव्यपदार्थः तत्तत्संसर्गादेकत्वानेकत्वादिना व्यव

तथा चोक्तं हरिणा कालसमुद्देशे· तस्यात्मा बहुधा भिन्नो भेदैर्धर्मांतराश्रयैः· नहि भिन्नमभिन्नं वा वस्तु किंचन विद्यते· नैको न चा
प्यनेकोस्ति न शुक्लो नापि चासितः· द्रव्यात्मा स तु संसर्गादेवं रूपः प्रकाशते· संसर्गिणां तु ये भेदा विशेषास्तस्य ते मताः· स भिन्न
स्तैर्व्यवस्थानां कालो भेदाय कल्पते इति· कथं क्रिययेति· क्रियाया एकत्वात्तस्या अपि भेदकत्वं नास्तीति प्रश्नः॥ ॥

हारविषय इत्यर्थः· एवं च अहरेव कल्पितं तत्तत्पदार्थसंसर्गात् भेदाभेदैकत्वानेकशुक्लत्वकृष्णत्वादिना भासते इति भावः· वस्तुत
स्तु सर्वधर्मविनिर्मुक्तमिति बोध्यं· प्रकृतमाह· संसर्गिणमिति· आदित्यक्रियादीनां ये भेदाविशेषास्त एव तस्य कालस्य विशेषा अहरा
दिविशेषव्यवहारहेतव इत्यर्थः· तैर्भिन्नस्वरूपः कालो व्यवस्थानां अहरादिव्यवहाराणां भेदाय विशेषाय कल्प्यते इत्यर्थः· क्रियाया एकत्वादि
ति· गच्छतीत्यादितस्तथा प्रतीतेरिति भावः॥ ॥

DR. BHAU DAJI MEMORIAL

राम० ७

७६३

ज्ञानेन न ज्ञेयेति· स्वतो निवृत्तभेदेवेत्यर्थः· अन्ये तु दिनपर्यंतस्थायि क्रियानुपलंभात्प्रश्नः· कथमेति· आदित्यगत्येति उत्तरं· तत्क्रियास
मूहस्य तावत्कालं धारारूपेणानुस्यूतत्वादित्यर्थ इत्याहुः· ननु क्रियापरिच्छेदकत्वमेव न कालस्य न तु द्रव्यपरिच्छेदकत्वं द्रव्यस्य हि वित
स्याद्येव परिच्छेदकमत आह· जातस्य जननक्रियावधिरिति· मासो जातस्येत्यस्य जननक्रियामारभ्य मस्य मासो जात इत्यर्थ इत्यभिप्रायः·
एवं च जननक्रियापरिच्छेदद्वारा जातपरिच्छेदकत्वमिति तात्पर्यं· मासस्य परिच्छेद्यांतरमुक्तं निराकरोति· न च मासेति· त्रिंश

आदित्यगत्येति· आदित्यादिसाधनादिभेदाद्भिन्नैव क्रिया आख्यातेन तु सा निवृत्तभेदैवोच्यते· शब्दशक्तिस्वाभाव्यान्न तु स्योतेभे
दो नास्ति· यद्येवमिति· जातस्य जननक्रियावधिर्मासेन परिच्छिद्यते न मासाव्यातिरिक्तः कश्चित्त्रिंशद्रात्रो लियस्य मासः प
रिमाणस्यात्· न च कालसामान्यं परिच्छेद्यं· काल एव हि संसर्गिभेदात् प्राप्तमासादिभेदव्यवहारः क्रियायाः परिमाणेन वस्त्वंतरस्य·

द्रात्र इति बहुव्रीहिः पद्मनाभवत्पृषोदरादित्वेनाकारांतता समूहोऽन्यपदार्थः· समाहारे द्विगौ संख्यापूर्वो रात्रं क्लीबमिति न पुंस
कतापत्तिः· न च कालसामान्यमिति· तस्य निष्कलत्वाद्विभुत्वाच्चेति भावः· स एव पक्षे तद्द्वारा विच्छेदेन तस्यानंतत्वादपरिच्छेद्यत्वमि
ति भावः· युक्तं तरमप्याह· न वस्त्वंतरस्येति· एवं च क्रियाद्वारैव कालपरिच्छेदकत्वं क्वाप्यमिति तद्द्वारा जातपरिच्छेदकत्वमेवेति भावः·

कैं०वि०२०२ ननु संख्याविशेषैकत्वावगतिरपि नेत्यत आह· एकत्वेत्विति· तथा च तत्त्वात् नियतपरिच्छेदकपरिमाणवाचित्वात्· अन्यथा तस्यास्यै
मात्रैकालद्वितीति प्रश्नोऽस्योत्तरत्वे नैनस्यादिति भावः· नन्वेवं सति तत्रार्थे द्वित्वाद्यवगतिरपि स्यादत आह· बहिरंगेति· द्वित्वादिप्रतीते
रनुभवविरुद्धत्वाच्चैत्यपि बोध्यं· शौर्पिक इति· परिमाणे अक्षपरिमाणत्वं उपाधिमाश्रित्य संख्याएकत्वरूपा भेदेन तद्रूपेणभासत इत्य

॥ ॥अनभिधानादिति· समासे द्वित्वादेरनवगमात् एकत्वं तत्र प्रातिपदिकार्थस्य नयाम् तत्वात् प्रतीयते व
॥ ॥स्वेतरानपेक्षत्वाच्च· द्वित्वादिका तु संख्या वस्त्वेतरापेक्षत्वाद्बहिरंगा· न तु क्तं हरिणा· शौर्पिके मासजातेच्च परिमा
णं स्वभावतः उपाधिभूतमाश्रित्य संख्याभेदेन वर्त्तत इति· उत्तरपदेनेति· तद्धितार्थस्येदमुक्तं तदेवशिष्यानुग्रहाय स्मारितं॥

र्थैः अक्षपरिमाणवाचकशब्दस्य लेतथैवव्युत्पत्तिरितितात्पर्यं· वस्तुतः समासे एकत्वमपि नेवभासते किंतु मासत्वेनैकमासस्यैवमा
नं न त्वनेकस्यानभिधानादिति भाष्याशयः· एवं शौर्पिकत्वावकीनादावपीदं बोध्यं· इदमनभिधानं समर्थसूत्रे उक्तं एकार्थीभावकृत राम०
विशेषानरूपणावसरे· तुल्यन्यायादत्राप्यालोकेति सूत्रस्यमेकवचनेतामोरित्यपि प्रत्याख्यातं बोध्यं॥ ॥५॥ ॥श्रीराम· ८

७६४

नञ्॥ ॥शब्दार्थावगतेर्लौकिकव्यवहाराधीनत्वेपि न्यायव्युत्पादनाय विचार इत्याह· इहेति· प्रक्रियागतेति· लिंगसंख्यादिसिद्धितदभावरूपगु
णदोषेत्यर्थः· असत्सामान्यं· अभावो भेदः· न स्यासत्त्वं निरूपयितुमशक्यत्वात् तथा हि भिन्नाभ्यां द्विधर्मिप्रतियोगिभ्यां स निरूप्यः तत्रायमेव
सचेत्कात्माश्रयः· अन्यश्चेदन्योन्याश्रयः तत्तीयादेरन्यस्य स्वीकारे चक्रकमनवस्था चेति तत्रान्तरे स्फुटं· सामान्यत्वं च केवलान्वयित्वा

नञ्॥ ॥इह ब्राह्मणादिना क्षत्रियादेरभिधानं लोके दृश्यते तत्र प्रक्रियागतगुणदोषनिरूपणाय प्रश्नः· किं प्रधानइति· त्रयश्चात्र
पक्षाः· अन्यश्च द्र पूर्वपदोत्तरपदार्थप्राधान्यलक्षणः· संभवेति· यदा ज्ञातौ ब्राह्मणशब्दो वर्त्ततेऽविद्यमानं ब्राह्मण्यं यस्य सो ब्राह्मणः
क्षत्रियादिस्तदान्यपदार्थः प्रधानं· यदा तु सत्सामान्यवृत्तिर्नञ् ब्राह्मणादिभिर्विशेष्यते ब्राह्मणत्वेनासत् अन्यथा तु सत्त्वार्थः क्षत्रि
यादिरब्राह्मणशब्देनोच्यते तदा पूर्वपदार्थप्रधानः· यदा तु दुरुपदेशान्मिथ्याज्ञानाद्वा ब्राह्मणशब्दः क्षत्रिये प्रयुज्यते ब्राह्मणपदा
र्थनिवृत्तिश्च स्वाभाविकी नञा द्योत्यते तदोत्तरपदार्थप्रधानः· यद्यपीहार्थो न निर्दिष्टस्तथाप्यभिधानशक्तिस्वाभाव्याल्लभ्यते· इ
द्ववत्तु स्वतंत्रपदार्थद्व्यानवगमात् उभयपदार्थप्राधान्यं नाशंकितं॥
तः· तत्प्रवृत्तिः· तद्वृत्तिः· एवं च ब्राह्मणभिन्न इत्यर्थः· फलितं· दुरु
पदेशोऽमुष्मिन्नवकाशे ब्राह्मण इत्यादिः मिथ्याज्ञानं प्रकरणांतरेण भ्रमः· ब्राह्मणपदार्थो ब्राह्मण्ये तत्स्य स्वाभाविकी निवृत्तिर्मुख्यब्राह्म
ण्याभावो द्योत्यते इति वक्तव्या आरोपितत्वद्योतकोन इत्युक्तं भवति· यद्यपीहेति· इह सूत्रेऽर्थे तत्पुरुषसंज्ञेति नानिर्दिष्ट इत्यर्थः॥

कै०वि०२०२ यदि च नञेति· यदि नञा ब्राह्मणार्थः प्रतिषिध्यते स्वार्थप्रतिषेधरूपाभावविशिष्टो बोध्यते तत्र तदभावप्रतियोगी ब्राह्मण इत्यर्थे सर्वत्र

एवं पक्षद्वैप्यसंभवेऽन्यप्रतिविधेयपक्षमाश्रित्याह· उत्तरपदार्थप्रधान इति· ब्राह्मणमात्रस्येति· इहाभिमते गुणस्य गुणविशिष्टप्रतिपादनाय विशेषणं प्रवर्तते· न तु दुष्टोपेतायः· यदि च नञा ब्राह्मणार्थः प्रतिषिध्येत प्रदासर्वीत्सनात तदर्थस्याभावात् कथं प्राधान्यं स्यात्· तस्मात्तद्गतविशेषावचनान्नञनर्थक एवेति ब्राह्मणाब्राह्मणशब्दयोः पर्यायताप्रसज्येत· अन्वाख्यानाद्धि साधुत्वमेवं भूतस्यार्थवदनर्थकावयवस्य समासस्य स्यात्॥ ॥श्रीराम॥ ॥श्रीराम·

नाब्राह्मणेत्यरव्याकृतस्य नञर्थस्याभावात् किं निरूपितं परिच्छेद्यत्वरूपं प्राधान्यं स्यात् अभावप्रतियोगित्वादेः केवलान्वयित्वात्तदेवाह· तद्गतविशेषावचनान्नञनर्थक एवेत्यादि· नञनर्थकत्वे साधुत्वं तस्यादत आह· अन्वाख्यानाद्धीति· राम० ६

७६५

द्वंद्वैकदेशिसमासयोरिति· उपमितसमासः समानलिंगयोरेवेति भावः· अब्राह्मणकोदेश इत्यादि न सिध्यतीति· न हि द्वन्द्ववृत्तिनिमित्तमात्रनिष्ठेषु ब्राह्मणादिशब्देषु वाप्यं समासो न तद्भिन्नेष्विति स्वत्रनियामकमस्तीति भावः· नञ्पोस्त्यर्थानामिति तत्स्वत्रस्य वार्त्तिकाद्बहुपर्यायवि

भवर्षा इति· न चात्र परवल्लिंगतास्ति यस्मान्न्यासभेदेन द्वंद्वैकदेशिसमासयोरेव सोक्तावचनदोषस्तु यथान्यासेप्यपरिहार्य एव· किंच नञ्समासस्यान्यपदार्थप्रधानत्वस्याश्रीयमाणे पवादत्वादनेन बहुव्रीहिर्बाधनाद ब्राह्मणको देश इत्यादि न सिध्यति· असो सर्वस्मा इति चोत्तरपदार्थस्योपसर्जनत्वात् त्यदादि सर्वनामकार्यप्रसंगः सर्वादीनि सर्वनामानीति सूत्रे संज्ञोपसर्जनप्रतिषेधाभिधानात्· अव्ययसंज्ञेति· अलिंगमसंख्यमव्ययमित्यर्थाश्रयेणाव्ययसंज्ञाविधानादिति भावः· पक्षान्तराश्रयेणापि परिहाराभावं नीतिपाठमाश्रित्याह· नैष दोष इति· पाठेनापीति· पाठाभावात् समासस्य माभूदव्ययसंज्ञा लिंगसंख्यायोगस्तु नञर्थप्रधानत्वात्प्राप्नोतीत्यर्थः॥

भागोलप्स्यते· एतन्न दोष इति सूत्रेऽनञ्समासग्रहणाल्लिंगान्तजिति सूत्रे विहितसमासेऽप्युपसर्जनत्वप्रयुक्तकार्याभाव इति भाष्याशय इत्यन्ये· ननु नञः पाठेपि तदनत्वाभावादव्ययत्वाप्राप्तिस्तत्राह· भाष्ये पाठेनापीति· एवं च नञः पाठेनाव्ययत्वात् तदर्थस्य लिंगसंख्यानन्वयित्वेन समासेपि तदर्थस्य प्राधान्ये सत्यनत्स्यादिति भावः·

कै०वि०२०२ भाष्येनेदं वाचनिकं॰नेदं वचनप्रयोज्यमित्यर्थः॰चैयटेपि प्रयोजनमिति करणे ल्युट्॰ ब्राह्मणभावस्येति॰ ब्राह्मणभेदस्येत्यर्थः॰गुण
त्वादिति॰ आश्रितत्वमत्र गुणत्वं॰तद्युक्तेति॰तद्युक्तद्रव्योऽभेदेनान्वयित्वादित्यर्थस्तदृश्यति॰यदसौ द्रव्यं श्रितइतिभाष्ये॰ अयंभावः॰भे
दएवनञर्थः॰तस्य चाश्रयेण गुणस्येवतादात्म्यसंबंधः॰अब्राह्मणः क्षत्रियः॰ब्राह्मणभेदः क्षत्रियेइत्युभयविधव्यवहारदर्शना

नेदं वाचनिकमिति॰वचनं प्रयोजनमस्येति वाचनिकं॰एतदुक्तं भवति॰शब्दशक्तिस्वाभाव्यादसत्त्वरूपमर्थं वाक्ये॰
नञा ● हसमासेतुसत्त्वरूपं केचिदर्थैरिति॰धर्माधर्मवशात्॰अथवेति॰ब्राह्मणभावस्य गुणत्वात्तद्युक्तद्र
व्याभिधायित्वाच्चसमासस्य क्षत्रियाद्याश्रयगतेलिंगसंख्येभविष्यतइत्यर्थः॰पूर्वत्रस्वाभाविकदर्शनेसत्यादेवलि
गसंख्यायोगः॰इह त्वाश्रयद्वारकइति विशेषः॰समासइति॰समासार्थः॥
तद्गुणवचनानां गुणोपसर्जनद्रव्यवाचिनां आश्रयतउभयविशेषतोलिंगवचनानीत्यर्थः॰जात्याश्रयबोधकानां तु नियतलिंगतैवे
तिभावः॰इहत्वाश्रयेति॰साक्षाल्लिंगसंख्यानाश्रयत्वमेवासत्त्वमितिभावः॰भाष्येयदसौद्रव्यंश्रितइति॰यद्द्रव्यान्वयीत्यर्थः॥ ॥राम राम०

१०

७६६

उत्तरपदार्थप्राधान्यपरिग्रहस्तुविकल्पाभिप्रायेणनभवतीत्याह॰अत्रापीति॰अव्ययीभावस्येति॰परेतुनञासनेष्टएव॰असंहितमित्यत्रारो
पितेसंधानंपरसन्निकर्षस्तदभावादद्रुतायांवृत्तौसंहितासंज्ञाप्रयुक्तंकार्यंनप्राप्नोतीत्यर्थइत्रिनदोषः॰असंतताभावार्थकनञः क्रिया
गुणमात्रान्वयित्वेनामक्षिकमित्यादावसंहितमित्यादावुत्तरपदार्थाभावाप्रतीत्याऽव्ययीभावमात्रेतिश्च॰नञसमासग्रहणात्स्यादि

अत्रापिपक्षेदोषः॰यदितावत्स्वाभाविकदर्शनमाश्रीयतेतदानेनापवादत्वादव्ययीभावस्यबाधनप्रसंगादमक्षिकमित्यादिनसिध्य
ति॰तस्यतुनिर्मक्षिकमित्यादिरवकाशः॰असर्वस्मायसइत्यादौपूर्ववत्स्मायाद्यसिद्धिःस्यात्आश्रयद्वारकलिंगसंख्याभ्युपगमे
अवर्षाहेमंतौनर्थः॰स्त्रीत्यादौहेमंताद्याश्रयगतलिंगसंख्याप्रसंगइत्यालोच्याह॰अथवेति॰एतद्दोषस्त्रानञसमासग्रहणंलिंग
मुत्तरपदार्थप्रधानत्वस्यअन्यथेनतदोर्थद्वारेणसंबंधिनःसुशब्दस्यलोपेविधीयमानोऽन्येषामदरास्त्यसोदराःतीत्यत्रकथंप्राप्नुयात्॥

सिद्धिरप्युक्तेतितुल्यविकल्पाभिप्रायेणैवभाष्यं॰अवर्षाहेमंतइत्यपिप्रतियोगिरूपाश्रयगतलिंगादिग्रहणात्सिद्धमभावेनप्रतियोगिनोपिस्व
ज्ञानायाश्रयणेनतस्याप्याश्रयत्वात्त्वघटितसमासघटकत्वेनोपस्थितत्वाच्चास्यैवाश्रयस्यग्रहणमन्यथातद्दोषदूषितपक्षोर्ध्वमाश्रितेपित
द्दोषानुवृत्तौभाष्यस्यानिर्दलतापत्तिः॰अथवापुनरस्तूत्तरपदार्थप्रधानइतिसमकक्षतयापक्षांतरकथनस्यासंगतिश्चेतिवदंति॰अनेकमित्यादौक्व
नदोषंतुभाष्यकृदेवाग्रेवक्ष्यति॰

वै०वि०२०२ माष्येब्राह्मणमात्रस्येति· अभावो नञर्थः स विशेषणं चेत् अभावप्रतियोगी भेदप्रतियोगी वा ब्राह्मण इति बोधस्तथा सति यत्किंचिन्निष्ठा
भावप्रतियोगिनस्तादृशभेदप्रतियोगिनो वा ब्राह्मणस्यैवानयनं प्राप्नोतीत्यर्थः· मात्रशब्देन नशौचाचारादिहीनब्राह्मणस्यनापि क्ष
त्रियादेरित्यर्थबोधनं· राजा विशेषक इति· यद्यपि पुरुषमात्रस्यैवानयनं दृश्यते न राजविशिष्टस्य तथापि राजसंबंधिन एवानयनं नय
त्किंचित्संबंधिन इति राजा पुरुषस्य विशेषक इति भावः· नञ्विशिष्टस्येति· नञ्द्योत्यारोपितब्राह्मण्यविशिष्टस्येत्यर्थः· कः पुनरिति· ननु
नञर्थस्य विशेषणत्वे किं भेदप्रतियोगी ब्राह्मण इत्यर्थः उत भेदानुयोगी ब्राह्मण इति भेदे प्रतियोगीत्वोपस्थितब्राह्मण एवेति· नाद्यः ब्रा

नञ्विशिष्टस्येति· आरोपितब्राह्मण्यस्य क्षत्रियादेरित्यर्थः· कः पुनरसाविति· भावाभावयोर्विरोधात् नञ्विशिष्टो ब्राह्मणार्थो नोपपद्यत इति भावः·
निवृत्तपदार्थक इति· निवृत्तः पदार्थो मुख्यब्राह्मण्यं यस्मिन्स क्षत्रियादिरर्थः· सादृश्यादिनाध्यारोपितब्राह्मण्यो नञ्द्योतितत द्वस्य इत्यर्थः॥

ह्मणमात्रस्यानयनापत्तेः नोत्तर इत्याह भावाभावयोरिति· ब्राह्मणत्व ब्राह्मणप्रतियोगिकभेदयोरित्यर्थः· कप्रत्ययप्रयोगसूचितबहुव्रीहि
सूचितमर्थमाह· निवृत्त इति· सर्वथा निवृत्तपदार्थत्वे विशेषणमेव न युज्येतेत्यत आह· सादृश्यादिनेति· आदिना साहचर्यादि· नि
वृत्तमुख्यब्राह्मण्यादिरारोपिततद्भावनिमित्ताक्षरार्थः· तदाह नञ्द्योतितत द्वस्य इति· एवं चारोपितस्वप्रवृत्तिनिमित्तवानुत्तरप
दार्थ इत्यत्र तात्पर्यमाह कोनञिति तात्पर्यं· उत्तरपदार्थस्य प्राधान्यमप्येतदेवेति बोध्यम्॥ ॥ ॥४ राम० ११

७६७

यदा पुनरिति· यास्योत्तरपदस्य मुख्यार्थप्रत्ययत्यागपूर्वकमारोपितप्रवृत्तिनिमित्तकार्थबोधकता सा स्वभावसिद्धेति न नञ्· वचनेन शक्त्या
रोपितत्वस्य वाचकः सन् मुख्यपदार्थप्रत्ययं निवर्तयतीति प्रश्नस्तद्गुनयन्नाह इदानीमिति· किं स्वयमिति· निवृत्तस्य मुख्यब्राह्मणप
दार्थस्य निवृत्तिस्तत्पूर्वकमारोपितनद्बोधकत्वं ब्रोस्यते अत स्थितस्यैव मुख्यब्राह्मणपदस्य बोधनिवृत्तिस्तत्पूर्वकं तद्भुत्वारोपितत्वं नञा

इदानीं नञो वाचकत्वद्योतकत्वपरीक्षणमाह· यदा पुनरिति· किं स्वयं निवृत्तस्य ब्राह्मणपदार्थस्य नञा निवृत्तिर्द्योत्यते
अथ स्थितस्यैव नञा निवृत्तिः क्रियते मंत्रेणेव विषादिसामर्थ्यस्येति प्रश्नः· किं नञिति· ब्राह्मणशब्द एव राजद्वदूवे दू
रभदूरं चाविद्यमानब्राह्मण्यमविद्यमानब्राह्मण्यं च क्षत्रियादिकं वक्ष्यतीति नास्ति नञो व्यापार इत्यर्थः· अथेति· नञः
पदार्थनिवृत्तौ सामर्थ्यस्याप्रसिद्धत्वादपूर्वमेवतद्रूव्यमितिसोत्प्रासमुपहसति·॥ ॥ ॥ ॥

शक्त्योच्यत इत्यर्थः· ननु नञ आरोपितत्वे शक्तावपि ब्राह्मणादिपदैर्बोध्यस्य मुख्यब्राह्मण्यादेकथमबोधेत आह· मंत्रेणेवेति· नञः साम
र्थ्यादेव तन्निवृत्तिरित्यर्थः· नास्ति नञ इति· प्रकरणादिकं चेतात्पर्यग्राहकं भविष्यतीति भावः· पदार्थनिवृत्ताविति· पदार्थप्रत्ययनिवृत्तावित्यर्थः·
स्वशक्त्यारोपितत्वबोधेपि ब्राह्मणादिपदानां स्वशक्तार्थबोधकत्वनिवृत्तिर्वचनं विना न शक्या· किंच वचनेनापितत्कर्तुमशक्यमित्युपहासः·
मुख्यपदार्थान्निवर्तयतीत्यस्य

के०वि०२०२ भाष्ये पदार्थान्निवर्तयतीत्यस्य पदार्थप्रत्ययानित्यर्थः। अमुमेवार्थं शंकापूर्वकं दर्शयति नन्वित्यादिना। ननु शब्दस्य पदार्थनिवृत्तिकरत्ववत्तत्प्रत्य
यनिवृत्तिकरत्वमप्यनुपपन्नं। किं चैवमुत्तरपदार्थप्रत्यय एव न स्यादित्यत आह। अयमत्रार्थ इति। निवृत्तपदार्थकेति। निवृत्तमुख्यप्रवृत्तिनि

नञ् प्रयुज्यमान इति। ननु स्वाभाविकनिवृत्तिदर्शने कथं पदार्थो नञा निवर्त्यते। न चानिके निवृत्तिदर्शने त्वेन द्युत्यते वक्तुं एवं तर्हि पदा
र्थप्रत्यय एवोपचारात्पदार्थशब्देनोच्यते यथा सिंहमध्यापयेदिति सिंहशब्देन माणवक इत्यदोषः। अयमत्रार्थः केवलो ब्राह्मणश
ब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्य एव ब्राह्मणार्थप्रत्ययमादधाति नञ्प्रयोगे तु निवृत्तपदार्थकता ब्राह्मणशब्दस्य प्रतीयते। य
था प्रतिष्ठत इत्यत्र यद्यपि तिष्ठतिरवगतिवचनस्तथापि तस्मिन्केवले प्रयुज्यमाने प्रस्थानं न गम्यत इति द्योतकत्वेन प्रोपेक्ष्यते तथे
ह नञा पदार्थशब्देन पदार्थप्रत्यय उपचारादुच्यते। कथं पुनः स्वरूपेणो रूप्यमाणः पदार्थप्रत्ययो नञा निवर्त्यत इत्याह। कीलप्रतिकील
वदिति। यथा महता कीलेन प्रतिकीलस्त्वन्यते तथा क्षत्रिये सादृश्यादिनिमित्तोपनतस्य ब्राह्मणप्रत्ययस्य नञ्प्रयोगेण निवृत्तिरित्यर्थः॥

मित्तप्रत्यापकत्वस्यारोपितप्रवृत्तिनिमित्तकप्रत्यापकतेत्यर्थः। पुनर्द्वितीयो क्रमेव स्मारयति पदार्थशब्देनेति। ब्राह्मणप्रत्ययस्य मुख्यब्राह्मणप्र
त्ययस्येत्यर्थः। अनेन द्योतकानां प्रसिद्धार्थशक्त्यनुद्बोधपूर्वकमर्थान्तरशक्त्युद्बोधकत्वं स्वभाव इति बोधितं। तद्धन्यानुद्बोधेनैव तत्पदार्थप्रत्ययनिवृत्तिरिति बोध्यं। रा०म० १२

७६८

DR. BHAU DAJI MEMORIAL

अभिप्रायमप्रतिपद्येति। केचित्तु यदि नञः शब्दस्य बोधकतासामर्थ्यनिवृत्तिद्योतकत्वं स्यात्तदा तदर्थगतयोऽद्भुत्वादिसामर्थ्यनिवृत्तिद्योतक
त्वमपि स्यादिति भाष्याशयमाहुः। ब्राह्मणपनिवृत्तेर्ज्ञानमभिधानात्तु न निमित्तेत्यनुपपन्नमित्यत आह। प्रनिमीदाविति। तादृशब्राह्मणप्र
वृत्तिनिमित्तको स्माद्बोध्यप्रतिभावः। अयमाशयः तत्तदर्थकाः शब्दाः भिन्ना एव नञ्समभिव्याहारे तु तदर्थकापमितिं ज्ञापयते इदमेव न

इतरो यथोक्तमभिप्रायमप्रतिपद्य पदार्थ एव नञा निवर्त्यत इति ज्ञात्वा पर्यनुयुंक्ते। मद्येतदिति। प्रतिपक्षानिवार
णाय नञमेव न प्रयुंजीरन्न तु तदर्थं हस्त्यादिविशिष्टनित्यर्थः। इदानीमभिप्रायं स्पष्टयितुमाह। एवं तर्हीति। नञ्निमित्तेति।
क्षत्रियादौ सादृश्यादिनिमित्ताध्यारोपितं ब्राह्मण्यं न तु गोत्वादिकमिति नञ्प्रयोगेण द्योत्यत इत्यर्थः॥ ॥ ॥

नो द्योतकत्वं नञ्निमित्तानुपलब्धेरिति भाष्यस्य तत्समभिव्याहारे मुख्यब्राह्मणार्थको नायं किं त्वारोपिततदर्थक इत्यमितत्पलब्धेर्नि
र्णय इत्यर्थः। तदर्थगतमोऽद्भुत्वादिसामर्थ्यनिवृत्तिद्योतकता तु नास्य स्वभावादेवेति तात्पर्यं। आरोपितत्वस्य नञ्वाच्यत्वे तु मुख्यब्राह्म
णत्वेन विगृहीतस्यालौकिकब्राह्मणपदार्थेन तदन्वयो दुरुपपाद इति तदर्थप्रत्ययसामान्यं वाच्यः सम्बन्धः शब्दार्थसंबन्धस्यानित्यताहानिरित्यादि दिक्॥

कै०वि०२०२ अमुमेवार्थं पुनः प्रश्नप्रतिवचनाभ्यां स्पष्टीकरोति· यदि पुनरित्यादिना· सच्चेन्निवृत्तइति· ब्राह्मणपदशक्यं यन्मुख्यं ब्राह्मण्यं तस्य नि
वृत्तौ स्वशक्यस्य बोध्यस्याभावात् तत्प्रयोगो व्यर्थः अशक्यबोधने तु नञा निरूपितदर्थबोधसंभव इति भावः· प्रतिषेधविषयेति· न
ञ्द्योतकत्वपक्षे समभिव्याहृतपदशक्तेर्बोधकत्वे वाच्यं तच्च पदांतरप्रयोगं विना न संभवतीति तत्स्वरूपोपादानमिति तात्पर्यार्थः· अ
स्य पदस्य मुख्योऽर्थः प्रवृत्तिनिमित्तरूपो निवृत्तः गौणश्चोपजात इति ज्ञाप्यते तेन तु भाष्याक्षरार्थः· भाष्येनेत्यके संदेहः स्यादिति· समभि

यदि पुनरीति· अर्थप्रत्यायनाय शब्दः प्रयुज्यते स चेन्निवृत्तः किमर्थमसौ प्रयुज्यते· एवंमप्येति· प्रतिषेधविषयप्रदर्शना
य बुध्या ब्राह्मणार्थं निरूप्य तस्य क्षत्रियादौ मुख्यसत्ताविरहप्रतिपादनाय नञा सहितो ब्राह्मणशब्दः प्रयुज्यते इत्यर्थः॥ ॥

व्याहृतपदस्य बोधकत्वाभावात् निवृत्तिरूपार्थस्य प्रतियोग्याकांक्षाया अनिवृत्तेर बोधकत्वेन च तदर्थप्रयोग एव स्यात्· नन्वस्तु वाचकत्व
मेवेति चेदेवमपि संदेहः स्यादिति भावः· तदाकारं दर्शयति· कस्य पदार्थ इति· कस्य पदस्य पदार्थ इत्यर्थः· अभिधेयपरः पदार्थशब्द इति तात्प
र्यं· संदेहपदेन निर्णयाभावो विवक्षित इति तत्त्वं· एवं चेतदिति· एवमेवैतदित्यर्थः· लक्षणापक्षस्तु तेनेदृश्यमेव यत् आरोपितप्रवृत्तिनिमि
त्तकस्य बोधः· तत्र नञ्समभिव्याहारे निवृत्तमुख्यब्राह्मण्यको ब्राह्मणशब्दार्थ इति बुद्धेरारोपितत्वात्पर्यकत्वं फलतीति बोध्यम्॥ ॥ राम० १३

७६९

इदानीं प्रकारांतरेणापि नञो द्योतकत्वं व्युत्पादयति भाष्ये अथ वा सर्व एते इति· अवशिष्टानामिति· तथा च तु गुणप्रतिपादनाय नञः प्रयो
ग इत्यर्थः· अयमेवमयं समुदाय इत्यादि भाष्यार्थः· एवं च गुणसमुदायवति ब्राह्मणशब्दप्रयोगः निवृत्तगुणानां निवृत्तिप्रतिपादनाय शब्द
स्य ब्राह्मणशब्दस्यार्थे कतिपयगुणाभावप्रतिपादको नञिति भावः· तपः श्रुतादि संग्रहायाह· गुणशब्देनेति· याजनादिसंग्रहायाह· निदर्शना

सर्व इति· तत्र यस्यैव गुणस्य स्वाभाविकी निवृत्तिस्तस्यैवासौ नञा द्योत्यते अवशिष्टानां तु गुणानामधीत्सद्भावो गम्यते· गु
णशब्देनात्र धर्ममात्रपरा अपि मुच्यते· स्मृतिशास्त्राभ्यपेणा निदर्शनाय ब्राह्मणगुणानाह· तप इति· तपश्चांद्रायणादि कै
र्म· श्रुतं वेदवेदांगादीनामध्ययनं· योनिर्ब्राह्मणाद् ब्राह्मण्यां जन्म· ब्राह्मणकारकमिति· शेषषष्ठीसमासः ब्राह्मणव्यप
देशस्यैतत्कारकं निमित्तमित्यर्थः· गुणसमुदायाभावेऽपि तदेकदेशे प्रयोगदर्शनादाह· तपः श्रुताभ्यामिति·॥ ॥

येति· कर्त्तरि चेति समासनिषेधमाशंक्याह· शेषषष्ठीसमास इति· एषां ब्राह्मणसादकत्वाभावादाह· व्यपदेशस्येति· गुणसमुदाया
भाव इति· तत्र गौणः प्रयोग इत्यत्र जातिपदवन्नञपि कश्चित्तात्पर्यग्राहक इति भावः॥ ॥श्रीरामाय नमोऽस्तु॥ ॥

कै॰वि॰२०२ वाहुल्येनेति॰ तथा चैते गुणा व्यभिचारिण इति भावः॰ पिंगलकपिलकेश इति भाष्ये एकं पदं॰ पिंगलाः कपिलाः केशा यस्येत्यर्थः॰ पद्मपिंगल इति वर्णः॰ गौर इति॰ यस्य तु अष्टवर्षीयादत्तः श्रुतशीलसमन्विते॰ सा गौरीत्युक्ता यस्तु स गौरः परिकीर्तित इत्यर्थः॰ ब्राह्मण्ये॰ ब्राह्मण

अधुना लोकप्रसिद्धान् बाहुल्येन तथादृष्टान् गुणानाह॰ गौर इति॰ पूर्वे पांचाला इति॰ अवयवेषु समुदायरूपारोपाच्छब्दप्रवृत्तिविशेषा न तु शब्दः स्वार्थं परित्यज्यार्थांतरं वक्तुं समर्थः शब्दार्थसंबंधस्यानित्यताप्रसंगात् तैलमिति॰ यदा संस्कारादि मुक्त्वावशिष्टमात्रापरिमितं समुदायमाह तैलशब्दस्तदा समुदायवचनोऽन्यदा तु जातिशब्द एवायं॰ शुक्ल इति॰ स्वयमशुक्लोऽपि चयवः शुक्लावयवांतरासादितशौक्ल्यसमुदायरूपारोपेण शुक्लशब्दाभिधेय इत्युदाहरणं॰ स्वयं त्ववयवस्य शौक्ल्ये मुख्य एव शुक्लशब्दः॰ यत्तिष्ठतीति॰ तपःश्रुतयोरभावाच्चिंदयात्रा ब्राह्मणशब्दप्रयोगस्तत्र जातिमात्रेण यद्वै समुदायरूपारोपाद्ब्राह्मणशब्दप्रयोगेन जातुस्वाभाविकी तपःश्रुतनिवृत्तिर्द्योत्यते॰

शब्दार्थगुणसमुदाये॰ कुर्वंति केचिल्लौकिका इत्यर्थः॰ पूर्वे पंचाला इत्यादिग्रंथः पश्यशापांव्याख्यातः॰ भाष्ये जातिहीने साधि॰ सामान्ये नैकवचनं तेनावयवेष्विति प्रागुक्तेन सामानाधिकरण्यमुपपन्नं॥ ॥ ॥ ॥ ॥ राम १४

७७०

न च भिन्नविषयत्वमिति॰ नञा यत्किंचिद्विषयनिवृत्तेर्ब्राह्मणपदेन यत्किंचिद्गुणसत्त्वस्य प्रतिपादनेन पूर्वोत्तरपदयोरसामर्थ्यात् समासो न स्यादिति भावः॰ द्वयोरपीति॰ नञ एकदेशनिवृत्त्यादिद्वारा समुदायस्यैव निवृत्त्यादिप्रतिपादनादस्त्येव सामर्थ्यमिति भावः॰ नञ्समभिव्याहारे श्रुतादिगुणनिवृत्तिद्योतनद्वारा जन्मनिमित्तो ब्राह्मणशब्द इति फलती त्येकविषयत्वमित्यत्र तात्पर्यं॰ जात्यारोपस्य निमित्तफले आह॰ तत्र

न च भिन्नविषयत्वं पूर्वपदोत्तरपदयोः शंकनीयं॰ द्वयोरपि समुदायविषयत्वात् तदेकदेशनिवृत्तिसद्भावप्रतिपादनद्वारेण॰ जातिहीन इति॰ तत्र स्तुत्या ब्राह्मणशब्दस्य प्रवृत्तिरध्ययनादिगुणसद्भावप्रतिपादनाय॰ संदेहादिति॰ संदेहनिमित्तं गुणः संदेशो हे द्वेनो॰ ॰॰ गुणैकदेशादर्शनाच्च गुणसमुदायस्य संनिधिमवसाय यदा प्रमाणांतरेण जात्यभावं प्रतिपद्यते तदा तद्द्योतनाय नञ् प्रयुंक्ते अब्राह्मणोऽयमिति॰ जातिकृतेति॰ जात्यभावकृतेत्यर्थः॰ यथा वर्षकृतं दुर्भिक्षमिति॥ ॥

स्तुत्येति॰ भाष्ये दृष्ट्वाध्यवस्यतीति॰ अध्यवसायाकारो ब्राह्मणोऽयमिति॰ ततउपलभते नायं ब्राह्मण इति प्रत्यक्षमुक्तं तस्य चारोपमूलकत्वादर्शिता ब्राह्मणाध्यवसायो नरस्योत्तमः अब्राह्मणोऽयमितीति॰ अस्य ततद्दसादिः॰ पुप्रयुंक्ते इति शेषः॥ ॥ ॥

/

कै०वि०२०२ अर्थैकदेशस्येति वक्तव्ये अर्थस्येत्युक्तमत आह। अयमत्रार्थ इति। एकदेशविगमादिति। एवं चानपत्यप्रतिपादनायोऽयमप्रयोग इति भावः। भाष्ये गुरूपदेशादिति। असम्यगुपदेशादिति तदर्थः। एतद्भाष्ये अब्राह्मणो यमित्युक्तं तं निर्मूलं तं तस्य भवतीत्यपाठानुपयोगात्। नान्यथेति।

अर्थस्येति। समुदायस्येत्यर्थः। अत्रायमर्थः। एकदेशविगमात्समुदायो निवृत्त उच्यते। एकदेशान्तरसद्भावाच्च तस्य सद्भावोऽभिधीयते। यथैकदेशकरणाकरणाभ्यां कृताकृतः संघात उच्यते। माषराशिं वर्णमिति। कालविशेषप्रतिपादनपरमेतत्। आपणमासीनमिति। आचाराभावकथनं। निर्ज्ञातमिति। योनिबीजाभावादुपधारयितं वस्तुतत्त्वं तस्य ज्ञातमितिबाह्मण्योपायाभावाद् ब्राह्मणशब्दस्य तत्राप्रयोगाद् अब्राह्मणशब्दस्यापि प्रयोगाभाव इत्यर्थः। तदेवं दोषपरिहारादुत्तरपदार्थप्रधानत्वे स्थापिते इदानीं तत्रैव दोषमाह। इदं त्वल्पमपीति। अनेकमित्युत्तरपदार्थप्रधानत्वे सति प्रधानगतसंख्याश्रयमेकवचनं सिध्यति नान्यथेत्यर्थः। कथं पुनरिति। अनेकशब्दो यदि बहूनां वाचकस्तदा बहुवचनं प्राप्नोत्यथैकप्रतिषेधमात्रमस्यार्थस्तदानेको जनस्तथागत इति बहूनां संप्रत्ययो न प्राप्नोति।

पूर्वपदार्थप्राधान्ये नित्यैकत्वानवगतेरेकवचनं न सिध्यतीत्यर्थः। एवमन्यपदार्थप्राधान्येऽपि तदसिद्धिः। एकप्रतिषेधमात्रमिति। एकोन भोजनीय एको जनो नागत इत्येवंरूप इत्यर्थः। बहूनां संप्रत्यय इति। एको नागत इत्येव प्रतीतेरिति भावः। ज्ञापकात्प्रसज्यप्रतिषेधेऽपि नञ्समासो ज्ञायत इत्यभिप्रायः। एकत्वप्रतिषेधमात्रमिति पाठोऽपपाठः। रा म ९५

७११

भाष्ये क्रियागुणाविति। गुणोदाहरणमनेकस्मिन्रूपं सदृश्यादि। एकं न भोजयेत्येकनिषेधापप्रसंजनस्य चारितार्थ्यात्कथं बहुत्वावगतिस्तत्राह। निराश्रययोरिति। गुणक्रिययोरित्यर्थः। एतच्च प्रसज्येति। एवं च तदाश्रये त एकदेशिनः शङ्कायोऽतमसमुपपत्त्यैव प्रसज्यप्रतिषेधपदार्थे निर्णीते तु मुक्तमुक्तमिति भावः। तथानेकशब्देनेति। आरोपितैकत्ववानित्यर्थः। एवं च पर्यु

प्रसज्याप्यमिति। विधायेत्यर्थः। निराश्रययोः अत्र तयोः संभवादनियतसंख्या इत्याक्षेपसत्त्वेऽपि प्रतिषेधाद्बहूनां प्रतीतिरित्यर्थः। एतच्च प्रसज्यप्रतिषेध उच्यते। पर्युदासे तु द्व्यादिसंख्यायुक्त एवानेकशब्दस्यार्थः। यस्माद्व्यादिष्वेकत्वमारोप्य प्रतिषिध्यते। यथा क्षत्रियादौ ब्राह्मणत्वे ततो यथाब्राह्मणः क्षत्रियादिरुच्यते तथानेकशब्देन संख्यान्तरयुक्तः। यत्र तु खल्विति। यत्र तु पूर्वमेव प्रतिषेधः पश्चात्क्रियागुणविधानं तत्र कथं बहूनां संप्रत्यय इति प्रश्ने भवतीति। अयमर्थः। आख्यातस्य पश्चात्प्रयोगस्तु पूर्वं वा धात्वर्थेन तावत्कारकस्याक्षेपो वश्यंभावीति तत्रैकप्रतिषेधसामर्थ्याद्द्व्यादियोगिसाधनाक्षेपः।

दासप्रत्येव बहूनां प्रतीतिः तुल्यमेवेति भावः। तत्र द्वित्वादिनिर्णयस्तु तात्पर्यवशादिति बोध्यं। आरोपितैकत्ववत्त्वेनैव बोधाच्चैकवचनसिद्धिः। एवं चानेक इति बहुवचनमसाध्वेवेति बोध्यमिति मञ्जूषायां विस्तरः। यत्र तु पूर्वमेवेति। तत्र पूर्वं क्रियोपस्थित्यभावादनियतसंख्यद्व्याक्षेपाभावेनैको न तिष्ठतीत्येव बोधपर्यवसानादिति भावः।

के०वि०२०२

ननएकमपि स्यत्र द्वयोर्नञोः प्रकृतार्थगमकत्वात्प्रियस्यैकत्वमेव प्रतीयेत न बहुत्वमत आह· आबाधे इति· षष्ठीति· आबाधायामप्रतीतेः
त्वप्रतीतेरनुपपोगाश्चेति भावः· नो स्मा कमेकं प्रियं न किंत्वनेकमिति तदर्थः· एवमेको न तिष्ठतीत्यादावेकस्य निषेधेपि अनेकस्येति

नन इति· आबाधे चेति द्विर्वचनं· शत्रोः प्रियेण सुखेन च प्रयोक्तुराबाधः· न इति वा षष्ठी· अत्रैकप्रतिषेध सामर्थ्यादेव संख्यां
तरयुक्त वस्तु प्रतीतिः· अन्यथा न प्रियमित्येन वाच्यं स्यात् तस्माद् ॰ त्र वाक्येपि सामर्थ्यात्संख्यांतरगतिर्भवति तत्र समासे वाक्य
विलक्षणधर्मप्रादुर्भाव हेतौ किं न भविष्यतीत्युक्तं भवति· अब्राह्मणत्वमिति· नब्राह्मणस्य भाव इति पुंवद्भाव प्रतिषेधसं
बंधविवक्षायां प्रत्ययसमासप्रसंगे पक्षिपरत्वात्प्रत्ययः स्यात् पुनः प्रसंगविज्ञानाद्वा पश्चान्नञ्समासः क्रियते· तदा तत्पुरुषे
तुल्यार्थेति पूर्वपदप्रकृतिस्वरेण आद्युदात्तं पदं स्यात्· प्रत्ययस्वरश्चेष्यत इति नञ्समासे कृते त्वतलौ का ॰ तत्र भाव
प्रत्ययस्याभावात् प्रकृत्यर्थस्य सापेक्षत्वाद सामर्थ्यान्न भवति नञ्समासस्तु प्रधानस्य सापेक्षत्वात् भवतीत्याहुः॥ ॥ ॰ १२

बोधो द्रष्टव्यः भाष्ये त्वतलस्यामिति· पूर्वपदार्थप्राधान्याश्रयेण वार्तिकारंभः· उत्तरपदार्थप्राधान्ये तु असामर्थ्यात् पूर्वं भावप्रत्य
यानुत्पत्तिरेवेति तत्तत्रैव भाष्ये स्पष्टं· तदाह· तत्र भावेति॥ ॥ ६॥ ॥ ॥श्री रामायनमो नमोस्तु॥ ॥

राम०
९६

११२

ईषदकृता॥ ॥ ननु ज्ञातावीषदर्थान्वयासंभवादेवासमासः सिद्धो तत्राह· यथैकेति· गोत्रं चेति· गार्ग्यत्वस्य जातित्वं गर्गादेरिति· कडुमभदेइ
तिम्वादौ पठितादारन्यपि सिध्यतीति· यद्यपीति· उणादयो बहुलमिति शास्त्रारंभात्सर्वमेव धातुजमिति सिद्धम् इति भावः॥ ७॥ ॥

ईषदकृता॥ ॥ ईषद्गार्ग्य इति· यथैकार्थसमवेत क्रियागुणापेक्षया जातेः प्रकर्षादियोगो गार्ग्यतरः गार्ग्यकल्पो गार्ग्यपाश इ
ति तथेषदर्थेनापि योगः· ईषत्कडार इति· गडेः कडुचेत्यारन् प्रत्ययांतत्वात् कृदंतः कडारशब्दः क्रियाकारकसंबंधस्या
संप्रत्ययादकृदंत इति केचिदाहुः· तदयुक्तं· कृद्ग्रहणे न हि कृत्संज्ञः कः प्रत्यय उच्यते· अथाव्युत्पन्नानि प्रातिपदिकानीत्यव्युत्पत्तिपक्षाश्रयणा
दत्र समासः स्यात् तथापीषद्रक्तं ईषदुन्नत इत्यत्र न स्यात्॥ ॥ षष्ठी॥ ॥ किमर्थमिति· सप्तमेणैवात्र समासः सिद्ध इति प्र
श्नः· अपवादार्थ इति· अपवाद इत्यर्थः· का पुनरिति· प्रतिपदविधाना याप्यपि समासप्रतिषेधविषये कृद्योगो लिङ्योगा या
अपि प्रतिपदविधानमिति विषयविभाग इत्याशंकते·॥ ॥ श्री राम॥ ॥ श्री कृष्ण॥ ॥

॥ ॥ षष्ठी॥ ॥ भाष्ये वक्ष्यतीति· न निर्धारणे इत्यत्रेति शेषः· उत्सर्गं प्रति हि प्रथमे कापकविशब्दस्यानन्यमादाह· अपवाद इतीति· अपह
ष्यते नेनोत्सर्ग इत्यपकर्षोऽपवाद इत्यर्थः। प्रतिषेधविषये· सर्पिषो ज्ञानमित्यादौ॥ ॥ श्री रामे॥ ॥ श्री कृष्ण॥ ॥

के०वि०२०२ कारकविशेषेति॰ कर्तृकर्मणोरिति विभक्तिरित्यर्थः॰ इत्यादिप्रकरणमिति॰ तत्र शेष इत्यनुवृत्तेरिति भावः॰ शेषलक्षणामित्यस्य शेषमात्रलक्षणामि त्यर्थ इति तास्सर्व॰ समासनिवृत्त्यर्थमेवेति॰ तत्तद्धातुयोगे उपात्तकारकातिरिक्तकारककाणां शेषत्वविवक्षाभावज्ञापनेनापि चारितार्थ्य संभवादिदं चिंत्यं॰ किंच लुगभाव एव कल्प्येत यदि स्वेतद्धार्ति कबलात्समासाभावकल्पनं तदा तदावश्यकमेव॰ सूत्रेणापि तत्रानुवादः

सर्वा षष्ठीति॰ साक्षाद्धातुकारकविशेषोपादानेन विधानात् प्रतिपदविधानेत्यर्थः॰ कृद्ब्दोपादानेन तु या विहिता सैव कृद्योगो च्यते॰ तत्र शेषविवक्षायां षष्ठी शेष इत्यनेन सिद्धायां षष्ठ्यां लोविदर्थस्य करण इत्यादिप्रकरणं समासनिवृत्त्यर्थमेवारब्धं षष्ठी भवत्येवभ्रूयत एव न तु तस्याः समासो भवतीत्यर्थः॰ समासे हि सति तस्याः अभावः स्यात् तस्मात्प्रतिपदविधानेति न वक्तव्यं॰ अशेषविषयेविधानार्थत्वात् कर्तृकर्मणोः कृतीत्यस्य समासनिवृत्तौ सामर्थ्याभावात् सूत्रेणैव समा

१ न चित्रानुत्पमानेकृद्योगेतिनवक्तव्यं स्य सिद्धत्वात्॰ प्रतिप्रसवप्रसंगेनान्यदपि कथ्यते॥

यावश्यकानीति न वक्तव्यं प्रतिपदविधानेनेति चिंत्यं॰ किंच तस्य न चनस्य सत्वेदिवस्तदर्थस्य छत्त्वेऽर्थप्रयोग इत्यादिविषयेऽक्षाणां देविते त्यादौ तन्नं तेन लोकेति निषेधेन कर्तृकर्मणोरिति षष्ठ्यभावेनेन षष्ठ्याः समासनिषेधसिद्धिः॰ त द्वीत्यातु शेषग्रहणस्य तत्र निवृत्त्या समासः स्यादित्यपि चिंत्यम्॥ ॥ राम० ६७

११३

तच्छब्देन द्रव्यपरामर्शे काकस्य कार्ष्ण्यमित्यादावतिप्रसंगमाशंक्याह॰ तच्छब्देनेति॰ स्वात्मनीति॰ स्वात्मन्येवाभेदेनास्थितात्तु द्रव्येइ त्यर्थः॰ नन्वभेदस्याधाराधेयभावनियामकत्वाभावात्तत्स्थैरित्यनुपपन्नमिति शंकते॰ न चेति॰ यद्यपि व्यपदेशिवद्भावेन तत्स्थैरिति वक्तुं शक्यं तथापि न समुख्य इत्याह॰ मुख्यस्येति॰ उत्तरयति॰ तस्मादभिधानेति॰ गुणमात्रशक्तशब्दमात्रप्रतिपाद्यगुणवाचकैः

तत्स्थैरिति॰ तच्छब्देन सन्निधानाद्गुण एव परामृश्यंते तेनायमर्थः॰ स्वात्मनि ये गुणा अवस्थितास्तैः सह समासो न च स्वात्म न्यवस्थानं गुणानां संभवति॰ भेदनिबंधनत्वान्मुख्यस्याधाराधेयभावस्य॰ सर्वस्य च गुणस्य द्रव्याश्रयत्वात्तु तस्मादभि धानव्यापारापेक्षया तत्स्थत्वमुच्यते॰ इह केचिद्गुणाः [redacted] शब्देन द्रव्यान्निष्कृष्टा एव प्रत्याय्यंते न तु द्रव्यस्योपरंजकत्वेन॰ यथा चंदनस्य गंध इति सह्यवैयधिकरण्यमेव गुणगुणिनोः न तु कदाचित् चंदनगंध इति सामानाधिकरण्यं भवति॥ ॥

शब्दैरित्यर्थः॰ एतत एवा पेस्य तत्स्थत्वमिस्य ग्रेवक्ष्यति॰ तदेवोपपादयति॰ इह केचिदिति॰ द्रव्यान्निष्कृष्टाः भेदेनैव द्रव्यान्वयिनः तदा हि गुणगतजातिः प्रावृत्तिनिमित्तम्॥ उपरंजकत्वं॰ स्वाभेदेन द्रव्यप्रत्यायकत्वम्॥ ॥ ॥ श्रीरामायनमोस्तु॰

Dr. BHAU DAJI MEMORIAL
[stamp, Devanagari text]

कै०वि०२०२ द्रव्यैकत्वमिति॰ जातिविशिष्टगुणः प्रवृत्तिनिमित्तं अत एव तेनोभावप्रत्ययेन गुणबोधः अर्थस्य तत्स्यत्वमिति॰ एवं च गुणिपरत्वे

शुक्लादयस्तु गुणाः कदाचिन्निकृष्टरूपाः शब्दैरुच्यंते पटस्य शुक्ल इति कदाचिद्द्रव्यैकत्वमापन्नाः शुक्लः पट इति॰ तस्मा
त् द्विविधा गुणसद्भावात्तस्यैरिति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तमिति ब्राह्मणवर्णादयमुदाहरणं॰ अथ ब
लाकायाः शौक्ल्यमिति समासः कस्मान्न भवति॰ तत्स्यं हि शौक्ल्यं सर्वदा वेयधिकरण्येन संबंधात्॰ नैष दोषः॰ शौक्ल्ये शब्दे
न शुक्लो गुणोभिधीयते॰ शुक्लशब्दस्य द्रव्ये वर्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते भावप्रत्ययविधानात्तेन चासौ तत्स्यः
अभेदाध्यवसायेन द्रव्यप्रस्तुरंजकत्वदर्शनात् शुक्लपट इति॰ अर्थस्य तत्स्यत्वमाश्रीयत इति शब्दभेदव्यर्थ
स्याभेदात् नास्ति शुक्लस्य गुणस्य तत्स्यत्वं॰ रूपवान्पट इत्यादौ तु नास्ति गुणगुणिनोरभेदाध्यवसायः॰ भे
दाश्रयेणैव मत्वर्थीयप्रयोगादिति रूपस्य तत्स्यत्वमव्यावृत्तमिति पटरूपमिति समासो भवत्येव॰॥ ॥श्रीरा रा म॰

वाचकशब्दाभाववत्त्वं तात्स्थ्यमिति फलितम्॥ ॥ ॥श्री छछछछछछछछछछछछछछछछछछछ १९

७७४

एवं तर्हीति॰ तद्विशेषणैरित्यस्य तद्विशेषप्रतिपादकैरित्यर्थ इति भावः॰ तीव्रादिशब्दैः समासप्रसंगमुपपादयति॰ यश्च गंधेति॰ एवं तर्हि

न तु तद्विशेषणैरिति॰ तच्छब्देन गुणः परामृश्यंते तेषां गुणानां मानि विशेषणानि तद्वचनैः सह समासो न भवतीत्य
र्थः॰ घृतस्य तीव्र इति॰ तीव्रो गंधस्य विशेषणं॰ चंदनस्य मृदुरिति॰ स्पर्शस्य मृदुत्वं विशेषणं॰ ननु घृतस्य गंधेन संबं
धो न तु तद्गतेन तीव्रेण विशेषणेनेति सामर्थ्याभावात्समासप्राप्तिरेव नास्ति किं प्रतिषेधेन॰ एवं तर्हि यदा प्रकरणा
दिवशात्तीव्रशब्द एव विशिष्टगंधवृत्तिस्तदा तदर्थोपजनित एव व्यतिरेके घृतस्येति षष्ठीत इति षष्ठीति समासप्रसंगः
यश्च गंधविशेषवचनस्तीव्रशब्दस्तस्य द्रव्यवाचिना सामानाधिकरण्याभावात् गंधशब्दस्येव तत्स्य गुणाभिधायित्वात्स
मासप्रसंगे प्रतिषेधउच्यंते॰ ननु वतीव्रघृतं मृदुचंदनमिति सामानाधिकरण्यदर्शनात्तस्य तत्स्यत्वाभावात्तत्समासाप्रसंगात्प्र मा॰
तिषेधोनर्थकः॰ एवं तर्हि सोत्रस्य प्रतिषेधस्य विषय कथनं न तु तद्विशेषणैरिति तत्स्यत्वाभावात्तैः समासः प्रतिषिध्यत एवेत्यर्थः

ति॰ तद्विशेषणैरित्यस्य तद्विशेषप्रतिपादकैरित्यर्थः तीव्रादयः शुक्लादयश्च निषेधसूत्रस्य विषया इत्यनेन सूच्यत इति भावः॥

वै॰षि॰२०२ साप्येकिमर्थमिदमिति· इदमाप्यवहितमपि तस्यैरितिपरामृश्यते· तदाह गुणेनेति· केवलगुणेति· घृतस्य तीव्र इत्यादावपि
केवलगुणवाच्येवेति भावः· भाष्ये एतदेवेति· काकस्य कार्ष्ण्यमित्यादावेव षष्ठी इदमिति यस्त्विदमित्यर्थः· सापेक्षमसमर्थ

नपुनरिति· तत्र गुणोपसर्जनद्रव्यवाचिना समासो निषिध्यत इति केवलगुणवाचिना रूपादिश
ब्देन समासो भविष्यतीत्यर्थः· एतदेवेति· केवलगुणवाच्येवेत्यर्थः· द्रव्यमत्रेति· ततश्चेदं तापेक्ष
पो ब्राह्मणस्येति षष्ठी शुक्लार्थेन संबंधाभावात् समासस्य प्रसंगाभावान्नार्थः प्रतिषेधेन॥ ॥

मिति· इतरसापेक्षत्वेन शुक्ला इत्यनेनान्वयाद सामर्थ्यमित्याशयः· तदुक्तं यत्नाह· शुक्लार्थेन संबंधाभावादिति· न तु तद्वि राम॰
शेषणैरितिवक्तव्यमिति भाष्यप्रतिषेधविषयप्रदर्शनार्थमित्यादिः॥ ॥८॥ ॥९॥ ॥१०॥ ॥श्रीरामश्री॰ १६

११५

पूरणगुण॥ ॥सत्ले निविशत इत्यादि· वस्तुतस्तद्विशेषणैरितिवक्तव्यमिति भाष्ये प्रतिषेधविषयप्रदर्शनार्थमित्यादि इदं चिं
त्यं· तस्याकडारसूत्रोक्तगुणवचनपदार्थसमत्वात् तत्र वाचकः सर्वलिंगानामित्युक्तत्वात् काकस्य कार्ष्ण्यमित्यादेरनुदाहरणत्व

पूरणगुण॥ ॥अर्थशब्दस्य प्रत्येकं संबंधाद्गुणेस्वरूपग्रहणं न भवति नाप्यादेरुंकिंतर्हि सत्ले निविशते पै
तीत्येतल्लक्षणलक्षितो गुणो गृह्यते· संसर्गिभेदकमित्यादिलक्षणयुक्तस्तु न गृह्यते· सामान्यादेरपि ग्रहणप्र
संगात्· नापि शुक्लादेरेव ग्रहणं कंटकस्य तैक्ष्ण्यमित्यस्योदाहृतत्वात्· गोविंशतिरित्यादौ संख्यायाः समासो न
निषिध्यते· शतसहस्रांतात्वनिष्कात् क्रोशशतयोजनशतयोरुपसंख्यानं· स्वारी शतमपि ददाती तिमुनित्रय
वचनात्· ज्ञापकादुत्तरपदार्थप्राधान्यमित्यादेश्च मुनिप्रयोगाद्वप्रतिषेधस्यानित्यत्वाद्यल गौरवादिशब्दसिद्धिः॥
स्य

प्रसंगात्· तस्मादत्रव्याख्यानात् केवलगुणवाची सन् यो गुणिबोधकस्तत्प्रकृतिकभावप्रत्ययांतप्रतिपाद्यानां गु
णपदेन ग्रहणं· अर्थपदान्वयाच्च न द्योधकशब्दमात्रग्रहणं· एवं च प्राभाण्यगौरवादौ प्रसक्तिरेव न॥ ॥श्रीराम॥

कै०यि०२०२ अवसितमवृत्तिरिति· सामान्यशब्दस्यापि प्रकरणादिना विशेषमात्रोपस्थापकत्वमित्यर्थः अनेनैतत्सूचयति· वाक्यैकदेशन्यायेन शुक्ला
इत्यस्य दन्ताः शुक्ला इत्यर्थः· षष्ठ्येव षष्ठी स्यात् च षष्ठ्यन्तं समर्थं प्रकृतिकसुबन्तेन समस्यत इत्यर्थः· तादृशं च न शुक्ला इति पदमित्यसाम
र्थ्यं तदवस्थमेव एवमपि प्राप्नोत्येव पूर्वसूत्रे एतदेवोदाहरणमित्युक्तं· अत्र त्वं भाष्ये त्वेकदेशयुक्तिः· अनेन समासशंका वा

गुणेन किमिति· वक्ष्यमाणोऽभिप्रायः भवतीति· यदा प्रकरणादिवशाद्दन्ताद्यर्थे एवावसितवृत्तिः शुक्लादिश
ब्दस्तदा तदर्थोपजनितत एव ब्राह्मणदोर्व्यतिरेक इति सामर्थ्यसद्भावात् समासप्रसंग इत्यर्थः· ननु गुणस्य गुण्य
पेक्षत्वात् गुणिन एव समासनिषेधेन भाव्यं· न च ब्राह्मणः शुक्लगुणाधारः· नैष दोषः· गुणशब्देन केवलगुणवाचि
नो गुणोपसर्जनद्रव्यवाचिनश्च व्याप्त्या पाश्रयेन ग्रहणं तद् इति गुणिनो गुणाधारसंबंधिनश्चोपपन्नः समासप्रतिषेधः

रणपालुभानां महत्त्वः क्रियत इति कर्मणि चेति सूत्रे वदता कैयटेन ध्वनितमेतत्· अन्यथा ब्राह्मणस्य ग्रामं गत इत्यर्थे ग्राममित्यस्य राम
प्रकरणादिना ज्ञाने गत इत्यस्यैव वाक्यैकदेशन्यायेन तावदर्थत्वे सामर्थ्यात् समासापत्तिरिति स्पष्टं कर्मणि चेति सूत्रे भाष्ये॥ ॥ २०

७७६

ननु ब्राह्मणस्य पश्यन्नित्यत्र ब्राह्मणस्यौदनं पश्यन्नित्यर्थावगमात् ब्राह्मणस्य पाकापेक्षपाककर्मत्वकर्तृत्वाभावात् कर्तृत्वस्योक्त
त्वं षष्ठ्या अप्राप्तौ प्रतिषेधोक्तिः असंगतेत्यत आह· आवर्जनवाचीति· आवर्जनमंगीकारः स्यागो वेत्याहुः· कर्मणि न भवतीति· शेषष
ष्ठ्यं तस्य कामार्थन्त्वपेक्षं भवति क्रियान्वयेनेति भावः· एतेन कर्मणः शेषत्वविवक्षायां षष्ठी सुलभेत्यपास्तं· नलोकेत्येतन्निषेधवि

प्रतिषिध्यते ऽत्रेति· आवर्जनवाचि पश्याश्रयेण ब्राह्मणं प्रत्येव कर्मत्वम्यते· यथास्य लोकपङ्क्तिर्लौकावर्जनमित्य
र्थः· ततश्च ब्राह्मणस्येति षष्ठी पाकापेक्षपाककर्मणि न भवतीत्यर्थः· चोरस्य द्विषन्निति· तौ सदिति सूत्रेनोग्रहणस्योपाध्य
संसर्गार्थत्वात् द्विषोऽमित्रे इत्येतत्सूत्रविहितोऽपि शतासत्संज्ञः· ननु चात्रापीति· तत्निनि प्रत्याहारेण शतुरविग्रह
णात्· सूर्यस्योदेतोरिति· सूर्योदयोत्सवं मित्यर्थः· वृक्षस्योपरीत्यादीन्यपव्ययउदाहरणानि॥ श्रीराम॥

षयेन निधानात् षष्ठविवक्षेव न भाष्यप्रामाण्यादित्यन्ये· ननु द्विषोऽमित्र इति विहितस्य नु सत्संज्ञकत्वं· लटः इति सूत्रविहितयोरेव स
त्संज्ञाविधानात् इत्याशंक्याह· तौ सदिति· अस्य धातुर्व्यादेशत्वाभावादाह· तत्रिनि· अस्योदाहरणत्वं स्थापयति· भाष्ये वक्ष्यते तदि
ति· इत्यादीन्यपीति स्वाह च परीक्षितव्यमेव ग्रह्यते अन्याक्ष्ये: सति सामर्थ्ये समास इष्ट एवेति भाष्याशयमाहुः॥ ॥राम॥

कैoविo२०२ पूर्वनिपातानियमः स्यादिति। उपसर्जनत्वस्यान्वर्थतामाश्रित्य षष्ठीसमासेपि तन्नियमसंभवात् उपसर्जनसंज्ञासूत्रे स्वयमपि तथैवोक्तेश्चिंत्यमेतत्। तस्माद्विशेषणसमासोप्यत्र बाहुलकान्नेत्येव तत्त्वमिति केचित्। तन्न। अर्धपिप्पलीत्यादौ पुनरोधेन तस्याऽनन्वर्थत्वाश्रयणमवश्यं[illegible]मित्याशयात्। विशेषणसमासे वचनसामर्थ्यादिति। पूर्वापरप्रथमचरमेति सूत्रे समानेत्यादिवचनसामर्थ्यादित्यर्थः। एवं च षष्ठीसमासे तदप्रवृत्तौ मानाभावः। न चैवं बहुव्रीहिरुच्छिद्येत। शेषग्रहणसामर्थ्येन तत्राप्यस्याप्रवृत्तेः। न च सु

राज्ञः पाटलिपुत्रकस्येति। विशेषणसमासोत्र भवत्येव। ततो विशेषणस्यैव पूर्वनिपातः सिद्धो भवति। षष्ठीसमासे तु पूर्वनिपातानियमः स्यादिति स प्रतिषिध्यते। विशेषणसमासे च वचनसामर्थ्यात् समानाधिकरणे समर्थं वदितिनाश्रीयते अधाव्ययमिहित मिति। एवं च कर्मस्य क्रियमाणस्येत्याद्युदाहरणं॥

दरपाचकइत्यादौ तस्य सावकाशता। एवं तर्हि समानेत्यादि सामान्यापेक्षं यत्र समानाधिकरणेनो विशेषविहितः समासस्तत्रैव तत्प्रवृत्तिः समानादेव्वरूढं तेन न समासो अभिधानादित्याशयः। केचित्तु प्रथमानिर्दिष्टमिति सूत्रभाष्योक्तरीत्या षष्ठीति सूत्रे येन सुबंतेन समासस्तदर्थनिरूपितसंबंधार्थकषष्ठ्येव गृह्यते तादृशमेव च सामर्थ्यं षष्ठीसमासप्रवृत्तौ निमित्तं। न चेदं सामर्थ्यं प्रकृते तस्मिन्नित्याशयेनाह। असामर्थ्यादत्र न भविष्यतीति। एवं च प्रत्याख्यातं समानाधिकरणग्रहणं भाष्ये लेतदाशयानभिज्ञपूर्वपक्षिसिद्धांतिनोरेक देशिनोरुक्तिपरमित्याहुः॥११॥१२॥१३॥ राम० २१

७११

कर्मणि च॥ ॥दोषदर्शनादिति। पक्षद्वयेपि दोषदर्शनादित्यर्थः। क्वचित्तु तृजकाभ्यामिति। तृजकाभ्यामित्यस्य कर्त्रर्थे तृजकाभ्यामित्यर्थ इदं। कर्तरि चेत्यस्येनायमर्थ इति वृत्तिमतेनाह। कर्तरि चेति। अन्यैस्तु उपपदकृदंतैः शेषषष्ठ्या समासो भवत्येव गंगाधरम्

कर्म॥ ॥कृषष्ठ्योः प्रकृतत्वादन्यतरविशेषणे दोषदर्शनात्स्पष्टमिति। कथमिति। अकर्तरि च कारक इति। यः कर्तरि विधीयते यथा कुंभकार इति तत्रापरस्यादुपपदसमासेन भाव्यं केचित्तु तृजकाभ्यां कर्तरि कर्तरि चेति प्रतिषेधेनेत्यभिप्रायेण कर्तरि त्युक्तं। इध्मप्रव्रश्चन इति। करणे ल्युट्। कर्मणि षष्ठी। तृजकाभ्यां चेति। कर्तरि यौ तृजकौ तत्र सामर्थ्यात्कर्मण्येव षष्ठी त्वनेनैव प्रतिषेधः सिद्धः। इध्ममत्रेति ब्राह्मणस्येति षष्ठी भुक्तापेक्षया न भवति नलोकाव्ययनिष्ठेति प्रतिषेधात्। तत श्च ब्राह्मणस्य यश्चौदनादिस्तेनान्येन भुक्त इत्यर्थः प्रतीयत इति ब्राह्मणस्य भुक्तेन संबंधाभावः॥ ॥श्रीराम

स्वरादौ स्वरेपि न विशेषः। उभयथाप्यंतोदात्तत्वात्। न च गस्य कर्तिर्गार्थेकशब्देन साम्यं[illegible] इत्यर्थे समासानापत्तिः। शेषषष्ठ्या समासे पि स्वरे विशेषादिति वाच्यं। अकर्तरीत्यस्य तृजकाभ्यां कर्तरीति सूत्रनिर्दिष्टाभ्यामन्वेनेत्यर्थात् कर्मणीत्यस्य षष्ठी विशेषणत्वे तेनेत्यस्यानन्तुवृत्तिरेवेति बोध्यं। भाष्ये तृजकाभ्यां चेति। अस्यैवकर्त्रर्थे तृजकाभ्यामित्यर्थ इति भावः॥

के०वि०२०२ पारंपर्येणेति। भुजेरोदनेनौदनस्य ब्राह्मणेनेतीत्यर्थः। भवतिवा यिति। ब्राह्मणस्य शुक्लाइत्यत्रोक्तन्यायः। समासशंकानिवारणायेति अनेन तन्त्याप्राश्रयणेपि पूरणेति स्त्रोक्तमद्रीत्या वस्तुतः सामर्थ्यनास्तीवेति सूचयति। तदाह अबुधानामिति। अतिप्रसंग इति। अत्रापि वंन्यायैः समासापादनसंभवात्तत्रापि प्रतिषेधो वक्तव्य इत्यर्थः। भाष्ये ब्राह्मणस्य गतइत्यादेः ब्राह्मणस्य आमंगतइत्यादि

प्रतिषेध्यमितिचेदिति। यदि पारंपर्येण संबंधसंभवाद्भवति वैकस्यचिदितिन्यायाद्यसमासशंकानिवारणायाबुधानोयत्नः क्रियतेतदाति प्रसंगोयत्नस्येत्यर्थः। इत्यर्थ इति। अनेकार्थत्वान्निपातानांतेनकर्मणीत्युक्तार्थयाषष्ठीविधीयते सा न समस्यतइत्यर्थः। ततश्चाश्वयोगवादोहोगोपालकेनेत्याद्युदाहरणं॥ ॥नित्यं॥ ॥प्रतिषेधेसिद्धेस्यारंभाद्विधिरप्यत्रसंभाव्यतेअनंतरत्वाच्च प्रतिषेधोपीति प्रश्नः। किमिहेति। विधिरिति। प्रहृाविभाषाधिकारात्। नित्यइति। विधिविकल्पेनैव पाक्षिकस्य प्रतिषेधस्य सिद्धत्वा त्प्रतिषेधारंभसामर्थ्यादेव नित्यः प्रतिषेधः सिद्धइति किंनित्यग्रहणेनेत्यर्थः १८१५१६

क्रमेणार्थः। इत्याद्युदाहरणमिति। ब्राह्मणस्य भुक्तीब्राह्मणस्य गतइतिपूर्वोक्तेतु असामर्थ्यादेवसमासो न भवतीनिहृदयं॥ ॥नित्यं क्री॥ ॥ प्रतिषेधेसिद्धइति। जीविकर्थविषयेत्तजकाभ्यामित्यनेनकर्तरिचेत्यनेनवेतिभावः। नित्यः प्रतिषेधइति। प्रतिषेधवाक्येस्तद्विषयेव्यपेक्षायाएवबोधनादितिभावः। विधित्वेतुजीविकार्थाकर्तरिचेतिनिषेधेप्राप्तेस्यारंभात्तद्विषयेनित्यमित्येतत्सार्थकं क्रीडायांतुविकल्पेप्राप्तेस्यारंभात्सामर्थ्यादेवनित्यत्वसिद्धमिति बोध्यं॥२७॥

राम० २२

७१८

नी३

कुगतिग ॥ ननु गतिग्रहणेन प्रादीनां विशेषणात्कर्मप्रवचनीयेषु प्राप्त्यभावादनर्थकः प्रतिषेधोत आह। प्रादिग्रहणस्येति। प्रत्यादिविषयएवेति। व्याख्यानादितिभावः। सामर्थ्यसद्भावादिति। वृक्षगतलक्षणत्वद्योतकत्वादितिभावः। द्वितीयापिनस्यादिति। कर्मप्रवचनीययुक्तइतियुक्तग्रहणादितिभावः। व्यवहितानामिति। स्वान्वययोग्यार्थवाचकपदापेक्षयापदांतरेण व्यवहितानामित्यर्थः। समास इति। अव्य

कुगति॥ ॥प्रादिप्रसंगइति। प्रादिग्रहणस्येहागतत्वात्कर्मप्रवचनीयानां प्रतिषेधउच्यते। प्रत्यादिविषयएवायंनिषेधः। तथाच स्वत्योः समासोभवत्येव। वृक्षं प्रतीति। वृक्षविद्योतनयोः प्रतिक्रियाजनितस्यलक्ष्यलक्षणसंबंधस्यावच्छेदकः प्रतिरिति सामर्थ्यसद्भावेत्समासप्रसंगः। संबंधाभावे [illegible]तु द्वितीयापिनस्यात्। व्यवेतानामिति। व्यवहितानांपदांतरेण प्रादीनांसमासोनभवतीत्यर्थः। आमंद्रैरिति। याहीत्यस्यांक्रियायांद्वयोरुपनिपातात्तद्वारकोदध्योदनादाविव परस्परसंबंधोस्तीति समासप्रसंगः। तथाचैकस्वर्यस्यादितितत्प्रतिषेधउच्यते।

यहितपदैरित्यर्थः। सामर्थ्याभावमाशंक्याह। याहीति। एकस्वर्यमिति। अव्ययपूर्वपदप्रकृतिस्वरेसति मंद्रस्यपृथगुदात्तत्वं न स्यादित्यर्थः। यद्यपि वेदे आपाद्यं रूपं नास्ति तथापि एवंजातीयके लौकिकप्रयोगे दोष इत्यर्थः। वेदेपि तस्यासाधुत्वशंकानिवृत्तिः फलमित्यन्ये॥ ॥

Dr. BHAU DAJI MEMORIAL

कै०वि०२०२ सामर्थ्यमेवनास्तीति॰ एकक्रियान्वयित्वरूपसामर्थ्यग्रहणेऽस्तु तः सर्वो म्लीनकपेत्यादौ समासापत्तिरिति भावः॰ दध्योदनादौ तु क्रियो
तर्भावेण सामर्थ्यमेवं च वचनद्वयमपि प्रत्याख्यातमिति बोध्यं॰ वृत्तौ गतशब्दाप्रयोगे हेतुमाह॰ वृत्तिविषय इति॰ पदैकदेशन्यो

एवं पाणिनीये लक्षणे ति त्यासिसुद्राव्य कात्यायनस्त्वासीयं लक्षणं करोति॰ सिद्धं त्विति॰ तेन प्रत्यादीनां न भवति आ
मं द्वैरित्यत्र त्वा ग्रहणेन प्राप्नोतीति सामर्थ्यमेव नास्तीति वक्तव्यं॰ प्रादयः क्तार्थे इति॰ अगत्यर्थमिदं॰ वृत्तिविषये
क्तार्थे वृत्तयः प्रादयः॰ एतदेवेति॰ कात्यायनाभिप्रायमेव दर्शयितुं सौनागैरतिविस्तरेण पठितमित्यर्थः॰ सुराजेति॰
न पूजनादिति समासो न प्रतिषेधः॰ उपाधीनां प्रयोगविषयोपलक्षणार्थत्वादन्यत्रापि समासो भवति॰ तेनातिक्र
मणे प्यतिः समस्यते॰ अतिसिक्तमेव भवतेति॰ सुकरइत्यादौ तूपपदसमासोऽस्त्येव॥ ॥ ॥

येनेति भावः॥ प्रगतः शिष्यं प्राप्तः॰ गुरुं प्राप्तः पितामहस्य पितृत्वं प्राप्त इति चार्थः॰ पूजायामित्युपलक्षणमित्याह॰ उपाधीना रामः०
मिति॰ अतिसिक्तमेवेति॰ तथा प्रयोगदर्शनादिति भावः॰ कर्मप्रवचनीयत्वादत्वषत्वाभावः॥ ॥ ॥राम २२

२२६

अर्थान्तरेपीत्यस्य समासो भवतीत्यनेनान्वयः॰ तत्र हेतुर्गतित्वादिति॰ दुष्कृतमिति॰ दुः कृत्यार्थे॰ अनभिधानात्तु भूतेरव्ययून भवति॰ सत्य
पीति॰ अपि भावस्तुतः सामर्थ्यमेव नास्तीति ध्वनितं॰ अगतित्वादिति॰ मंद्रस्य क्रियायोगाभावादिति भावः॰ ईषदर्थेपीति॰ अत एवोत्तरप
दाधिकारे ईषदर्थ इति कोः कादेशविधानं चरितार्थं॰ पृथ्वीवाचकस्य व्यावृत्तये तद्वचनं सार्थकं यत्तु न सर्वत्र व्यवस्थापकमिति भावः॰

दुर्निंद्यायामिति॰ प्रादिग्रहणेन यस्य समासस्तस्यायं विषयनिर्देशः इत्यर्थान्तरेपि गतित्वात्समासो भवति॰ आङीषदर्थ इति॰ क्रियायो दुष्कृतमिति
गे तु गतित्वात्समासः॰ आबद्धमिति॰ आमंद्रैरित्यत्र तु सत्यपि सामर्थ्ये मंद्रं प्रत्यगतित्वान्न॰ कुत्सेषदर्थाभावाच्च समासाभावः॰ कुपा
पार्थ इति॰ प्रशस्तेपि दृष्टा क्विदा भवति॰ पापं तु वस्तुस्थित्या गर्हितमिति तेन सपापयोर्भेदः॰ पूर्ववदुपलक्षणार्थत्वादीषदर्थेपि समा
सो भवति॰ कालवणमिति॰ अन्ये त्वाहुः पृथ्वीवाचि कुशब्दनिवृत्तये कुः पापार्थ इत्युच्यते ईषदर्थे तु उत्तरपदे कादेशविधानात्समा
सो भवत्येव॰ अव्ययं प्रवृद्धादिभिरिति॰ आदिशब्दः प्रकारे तेन यस्याव्ययस्य समासो दृश्यते तस्यानेन समासः कार्यः सह सुपेत्यत्रोक्तमपि पु

सह सुपेति योगविभागेन सिद्धं दृढं व्यर्थमित्यत आह॰ सह सुपेत्यत्रेति॰ एतेन नित्यार्थमिदमित्यपास्तं॰ तद्भाष्यप्रामाण्येन हवार्जितैर्वेनि
त्यपदासंबंधादिति भावः॰ वस्तुतस्तु रूपसंग्रहार्थमत्र वचनान्तोपाठः अत एव पुनर्गवइत्यत्र टच्॰ तत्र कारणादतत्त्वमपि लक्ष्यानुरोधेन च
व्यवस्थेत्याहुः॥ ॥

कै०वि०२०२ अत्र पूर्वमिति॰ अनुनासमासात्पूर्वमित्यर्थः॰ त्र्याणांपदानामिति॰ गतिविशिष्टतिङं तेनान्वयस्य समासविधानादित्यर्थः॰ उदात्तव
तेत्यनेन तु न विना समासः निघाते तस्योदात्तत्वाभावादिति भावः॰ तत्पुरुषे तुल्यार्थेति॰ समपादइत्यादौ पूर्वपदप्रकृतिस्वरेण पूर्वप

अथवा वार्तिकगृहीतोर्थो योगविभागेन तत्र साधित इति पौनरुक्त्याभावः॰ अनुव्यचलदिति॰ अत्र पूर्वं परत्वाति
व२ ङतिङ इति निघातः तत उदात्तत्वाभावादिति मते ति पृथगुक्तं तत्र त्र्याणां पदानां समासोक्त ते समासांतोदात्तत्वे मव
ति॰ तत्पुरुषे तुल्यार्थ सनेन तु पूर्वपदप्रकृतिस्वरत्वं न मनति॰ गतिर्गतावित्यनेनोरुदात्तत्वात्तत्र चोदात्तस्वरितग्र
हणानुवर्तनाद्धि शब्दस्य पूर्वपदत्वाभावात्॰ यत्परियंतीति॰ उदात्तवत उदाहरण॰ निपातैर्यद्यदीति निघा
तप्रतिषेधाद्यंतीत्यस्य प्रत्ययस्वरेणाद्युदात्तत्वात् परि शब्दस्य यंतीत्यनेन समासः॥ ॥ ॥

दानुदात्तत्ववारणाय उदात्तस्वरितग्रहणानुवृत्या न द्योगि पूर्वपदस्यैव बहुव्रीहौ प्रकृत्येत्यत्र ग्रहणादिति भावः॰ पूर्वपदत्वाभावादिति॰ रा म०
विनाचलदित्यस्य न समासः किंतु विविशिष्टेनाचलदित्यनेनानेनेत्याशयः॰ अन्यथा वेरुदात्तत्वे उदात्तयणः परस्याद्कारस्य स्वरितत्वं स्यादि २५
ति भावः॥ ॥१८॥
७८०

उपपदम॥ ॥यदि तिङंतेस्येति॰ उपपदस्येत्यर्थः॰ तिङंत एवेति॰ कृदभिहितस्य द्रव्यवद्भावादिति भावः॰ न च भाभवान्भूदित्येन ह्याव
त्त्येऽतिङंत समासइत्यर्थकं तत्॰ माङीत्यस्य सतीत्यर्थात्तत्रोपपदत्वमेव नेत्यदोषात्॰ प्रथमार्थे सोत्री सप्तमी हि उपपदसंज्ञालि
गं अत एव पशाविन्यादौ नोपपदत्वं॰ तुमुन्ण्वुलाविन्यत्र तु क्रियार्थोपपदस्येति कार्यार्थमुपपदत्वमावश्यकमिति भाष्याशयः॰ अ

उपप॥ ॥अतिङिति किमर्थमिति॰ यतिदिङंतस्य समासोभिधीयते तदा सुपेत्यधिकारात्तिङंतस्य प्राप्त्यभावादनर्थकएव
प्रतिषेधः॰ अभातिङ्शब्देनातिङर्थो लक्ष्यते तिङंतार्थकाचिन शब्दस्य समासानिषेधार्थत्त भाष्येपि तिङर्थ शब्दत्ति ङंतएव भवतीति
अनर्थक एव प्रतिषेध इति प्रश्नः॰ अतइति॰ यस्मान्तिङंतस्यानर्थकः प्रतिषेध इत्यर्थः॰ तच्छब्देनार्थशब्दसन्निधाने तिङर्थ उच्य
ते सति तिङंतस्यार्थो यस्य सतदर्थः॰ कस्येति॰ सामान्याभिधानाद्विशेषावधारणाय प्रश्नः॰ कः पुनरिति॰ कालसाधनसंख्यापु
र्थ शब्दसन्निधाने ति॰ तिङंतशब्दरूपार्थेन॥ रुषक्रियोपयदरूपत्तिङर्थस्तदर्थश्च तिङंतएव संभवतीनान्य इति प्रश्नः॥
स्योपदस्यासमवादिति भावः॰ तिङर्थ उच्यतइति॰ कस्यतिङर्थस्येतिभाष्येपि तिङ्पदेन तदर्थो ग्राह्य इति भावः॰ कस्येति प्रश्नोपि तदर्थ शब्द
र्थ प्रश्न द्वारा तच्छब्दार्थप्रश्न एवेति बोध्यं॰ पुरुषः प्रत्यक्षादिः उपक्रमग्रहः कर्त्रभिप्रायत्वादिः॰ यद्यपि कर्त्रभिप्रायत्वं नातिङर्थस्तथापि यथा
कथंचिद्योत्यमेवैत्येवेति बोध्यं॰ तिङ्पदत्व स्यतिङंतार्थ इत्यर्थः॥

कै०वि०२०२ अनेकार्थेति। कालसाधनादिरूपेत्यर्थः। साध्यत्वादिति। साधनसाध्यत्वेन शब्दप्राधान्यादित्यर्थः। तिङ्ग्रहणमपनीय क्रियापदग्रहणे लाघवं दर्शयति। यदीति। अतिङ्ग्रहणादिति। अक्रियाग्रहणे तु त्वयि बोध्यं। तच्चागतशब्दस्य सत्त्वप्रधानतया कथं क्रियावाचित्वमि

क्रियेति। अनेकार्थसंभवेपि साध्यत्वात् क्रियाप्राधान्ये। प्राधान्ये चार्थे तिङ्ग्रहणे न वचनसामर्थ्याल्लभ्यत इति भावः। क्रियाप्रतिषेधो वेति। यदि तिङ्ग्रहणे वचनसामर्थ्यात् क्रियालक्षणीया तदा प्रतिपत्तिलाघवाय साक्षात् क्रियाप्रतिषेधः कर्तव्य इत्यर्थः। अत्रापि पक्षे सुबन्ते स्य क्रियावाचित्वाभावान्निर्विषयमेव प्रतिषेध इत्याह। अथेति। कारको गत इति। गतशब्दः क्रियावाच्युपपदं तत्र तुमुन्ण्वुलाविति ण्वुल्। कर्तृगत इत्यर्थः। अत्रातिङ्ग्रहणे समासाभावः अन्यथा गतकारक इति स्यात्। अत्र च प्रकृतिवाच्यक्रियाश्रयो ण्वुल् तदाश्रयं गतशब्दस्य क्रियावाचित्वमिति समासनिषेधः। नैतदिति। सुबन्तविशेषणमतिङ्ग्रहणं न चात्र सुबन्तं क्रियावाचि प्रकृत्यर्थस्य स्वातन्त्र्येण भावः। प्रत्ययार्थस्य कर्तुः प्राधान्यं॥ ॥ ॥

त्याशंक्याह। अत्र चेति। द्रव्यवाचित्वे प्रत्ययानुत्पत्तिः क्रियावाचित्वे तु उपपदसत्तासो दुर्वार इति तद्भाव इत्यर्थः। क्रियायां ग्रहणमिति श०म० २५
भावः। इदानीमेव क्रियावाचित्वोपपादनायाह। सुबन्तेति। उपपदविशेषणमित्यर्थः। नैतत्क्रियावाचीति भाष्यस्य नेतरप्राधान्येन क्रियावाचीत्यर्थः॥

७८१

नन्वेवमत्र समासो दुर्वार इत आह। अत एवेति। प्रत्ययोत्पत्तिनिमित्तमुपपदत्वं च न गतशब्दस्य किंतु धातोरेवेत्याह। धातोश्चेति। अन्वर्थाश्रयणेपि सामर्थ्यादुपपदत्वमित्यभिमानः। न तु प्रत्ययोत्पत्तिवत्समासोपि स्यादत आह। धात्वर्थस्येति। एवं चात्र कारकस्यान्येनैकार्थीभावासंभव इति भावः। वस्तुतस्तु नैतत्क्रियावाचीत्यनेनात्र तुमुन्ण्वुलाविति ण्वुले च नेति बोध्यते। क्रियायां क्रियार्थायामिति स्त्रीलिंगनिर्देशेन क्रियार्थायाः क्रियाया एव लाभे पुनः क्रियाग्रहणेन प्राधान्येन साध्यमात्रावस्थक्रियाप्रतिपादकस्यैव ग्रहणात् किं च क्रियाशब्देन क्रिया

तस्य च द्रव्यरूपेण कृताभिधानं प्रधानेन च व्यपदेशो भवतीति द्रव्यवाचीत्युक्तं। अत एव गतशब्दस्य समासो न प्राप्नोति। तस्यानुपपदत्वात् धातोश्च क्रियावाचित्वात् तदाश्रयप्रत्ययोत्पत्तिरविरुद्धा। धात्वर्थस्य प्रत्ययार्थेन संसृष्टत्वात् सदोत्तरेणैकार्थीभावासंभवात् समासस्य
त्वप्रसंगः। धातोः सुबन्तत्वाभावाच्च।

वाचकशब्दग्रहणे क्रियाप्रधानभूता साध्यावस्थैव च गृह्यत इति कारकोपपदादिति सूत्रेपि भाष्ये स्फुटं। अर्थग्रहणे तु गुणीभूताया अपि ग्रहणमिति याकादियोगे कारकविभक्तिः कृत्सु तृजादीनां सा तु लभ्यते वेत्याशयः। अन्यथासिद्धाने कारको गत इत्यत्र समासो दुर्वारः स्यात्। किं च क्रियावाचित्वाभावादत्राप्रकृतोदाहरणत्वं तुमुन्ण्वुलाविति सन्न्यायसात्। कैयटोक्तरीतिस्तु अनुपसर्जनायेनविधिः समर्थः पदस्यादि सत्त्रभाष्यविरुद्धा तत्र हि निष्कृष्य कार्थीभावं विनापि समासतद्धितादिप्रवृत्तेरंगीकारात्। न चैवमपि कारको व्रजति तरामित्यत्र समासा
भावार्थं तदर्थं प्रतिषेध आवश्यकः। अनभिधानेन तत्र तादृशप्रयोगाभावादिति भाष्याशयः॥

के०वि०२०२ उपसंहृतक्रमत्वैरूपां॰उपसंहृतक्रमत्वसमानाधिकरणे वैजात्यविशेषरूपां॰प्रधानमितीति॰प्रत्ययार्थे वैजात्येन लिंगाद्यनन्व
श्रीराम० यरूपप्रकृत्यर्थवैजात्यकार्याभिभवात्तस्य प्राधान्यमितिभावः॰एवं चात्रापि न एकुलितितात्पर्यं भाष्यस्येतिबोध्यं॰साध्येएवं
मस्तीति॰
कारकस्य गतिरिति॰गमनं गतिरिति भावे प्रत्ययविधानात् क्रियावाचित्वंभावः॰एतदपीति॰धातुरत्र साध्यभूतां क्रि
यां प्रत्याययति॰प्रत्ययस्तु तस्या एव क्रियाया उपसंहृतक्रमरूपां सत्वरूपतामाह॰प्रत्ययार्थश्च प्रधानमिति यत्तु
नर बंतेनैं क्रियावाचित्वमक्रियावाचित्वं न तत्सुबंतमित्यर्थः॰द्रव्यवदिति॰यथा घटादेर्द्रव्यस्य लिंगसंख्यासाधनसंबंधः
तथा कृदभिहितस्यापि भावस्येत्यर्थः॰अनयोरिति॰नन्वत्रैव सूत्रेऽतिङ्ग्रहणात् सुपो निवृत्तिर्ज्ञाप्यतां पूर्वत्र
कथं ज्ञाप्यते॰एवं तर्हि योगविभागः क्रियते तेनातिङिति सूत्रद्वयशेषो विज्ञायत इत्येष॥२।२।१९॥ ॥
तर्हि सिद्धे इति॰तादृशप्रयोगाभावादतिप्रसंगनिरासे सिद्ध इत्यर्थः॰एवं तर्हि योगविभाग इति॰अत्रातिङिति पूर्वसूत्रे गतिरित्यचे राम०
त्यर्थः॥ ॥ २६
श्रीराम
१८२

अतिङ्ग्रहणेन चेति॰अतिङिति अस्य प्रथमांततया समास एव विशेष्यते॰अतिङिति बहुव्रीहिः॰प्रपाचतितरामित्यादौ नित्यसमा
स इष्ट एव॰तिङिचोदात्तवतीत्यनेन गतेर्निघातेऽनुदात्तत्वमेव॰तत्रैतल्लिप्यर्थमेव तिङ्ग्रहणं प्रत्याख्यातं भाष्ये॰गतिकारकेति
स्वरस्य तु नात्र प्रवृत्तिः॰कृद्ग्रहणात् कृद्ग्रहणप्रत्याख्यानं तु न भाष्यारूढमिति तत्रैव वक्ष्यामः॰एतेन तत्र नित्यसमासवारणाय

अतिङ्ग्रहणेन च समासो योग इत्यविहितो विशेष्यते अतिङन्तः समासो भवतीति॰तेन सुपेत्यस्यैव निवृत्तिर्ज्ञाप्यते सुब्
ग्रहणं तु पूर्वपदस्य पदकार्यार्थमनुवर्तत एव॰भाष्येपि समुदायस्यानिवृत्तिर्विवक्षिता न तु केवलस्य सुबित्यस्य॥ ॥

तिङिति तद्घटितप्रतिषेधायावश्यकमिति कथं तत्र ततन्निवृत्तिज्ञापकं प्रपच्यतितरामित्यादौ च गतिकारकोपपदादिति तिङि चोदात्त
वतीति सूत्रभाष्यप्रामाण्येनोदात्तवतेत्यादि वार्तिकोक्तो वैकल्पिकसमास एवेष्यत इति परास्तं॰सुप्ग्रहणं स्विति॰उपपदमित्यन्व
र्थसंज्ञया सुबंतस्यैव पदत्वेनोपपदत्वात्तगतेः सुबंतत्वाच्च राजपुरुषेत्यादौ पूर्वपदेन लोपादिपदकार्यसिद्धेः॰तिङन्तघटित इति समास
इति विशेषणेन कारकोऽव्रजतीत्यादिव्यावृत्तिसिद्धेः प्रथमांतसुबनुवृत्तेरपि फलाभावेन चिंत्यमेतत्॰

कै०वि०२०२ हृदंतावस्थायामेवेति॰ काष्ठैः पचतितरामित्यादिवारणाय ङ्ग्रहणस्यावश्यकत्वेन चिंत्यमिदमिति कश्चित्तन्न॰ बहुलग्रहणेन शानं जं नादि

गतिकारकोपपदानामिति॰ एतत्सूत्रद्वये सुपेत्यस्यानिवृत्त्या गतीनामुपपदानां च उत्तरपदात्सुबुत्पत्तेः प्रागेव समाससिद्धिः कारकाणां तु कृत्तेकरणेकृता बहुलमिति समासः क्रियते॰ तत्र ङ्ग्रहणस्याकृत्सुबुत्पत्तेः समासः तिङंतेन तु तीयांतस्य सुपेत्यस्यानुवर्त्तनात्सुमासाप्रसंगात् कृदंतेनैव समासे सिद्धे ङ्ग्रहणं कृदंतावस्थायामेवानुत्पन्ने सुपि समासार्थं॰ अस्याश्च परिभाषायाः पुंयोगादाख्यायामित्यत्र प्रयोजनानि वक्ष्यंते॰ यदि तत्सुत्तरपदात्सुपूर्वोत्पद्यते तदा दधिसेचाविह्यादौ पदादित्वाभावात् षत्वप्रतिषेधो न प्राप्नोति॰ पदत्वाभावादुत्तरपदव्यपदेशश्च॰ ततश्च तन्निबंधनः स्वरो न सिध्यति॰ नैष दोषः॰ निरुपपदात्सेचयतेः क्विपि कृते षष्ठीसमासः क्रियत इति षत्वनिषेधो भविष्यति॥ ॥श्रीराम राम राम

पिरिवंतेनापि समासस्यवारयितुं शक्यत्वात्परिभाषायाः प्रयोजनवत्त्वे ङ्ग्रहणे प्रयोजनवत्त्वादत आह॰ अस्याश्चेति॰ तन्निबंधनः स्वरइति॰ गतिकारकोपपदात्कृदिति विहितः स्वर इत्यर्थः॥ ॥ ल० ४०

राम०
२७

७८३

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

स्वरासिध्यश्चेत्याह॰ यद्वेति॰ सुपेत्यस्यानिवृत्ताविति॰ सुपेवेति नियमाभावाद्यथेष्टं समाससिद्धिरिति भावः॰ लक्ष्यानुसारेण व्यवस्थेति बोध्यं॰ तत्र सुबुत्पत्तेः प्रागिष्ठकपलक्षणं लिंगबोधकप्रत्ययोत्पत्तेः प्रागपीति बोध्यं॰ सुबुत्पत्तेर्भवतीति॰ सुबुत्पत्तेरनंतरमित्यर्थः॰ धनक्रीतेति॰ सुबुत्पत्तेः पूर्वं समासे क्रीतात्करणेति ङीप् स्यात्॰ सुबंतेन तु समासेंतरंगत्वाट्टाप् सिध्यतीति भावः॰ यत्र सुबुत्पत्तेः पूर्वं समासे क्री

यद्वा सुपेत्यस्यानिवृत्तौ सत्यां यथेष्टं कार्यसिद्धये क्वचित्सुबुत्पत्तेः प्रागपि समासः क्वचित्त्वाकृत्सुबुत्पत्तेः एवं कारकसमासोपि बहुलग्रहणात् क्वचित्सुबुत्पत्तेर्भवतीति साहितस्य धनक्रीतेति प्रयोग उपपन्नः॰ उत्तरपदशब्दः समासावयवविशेषस्य रूढिरिति तत्राप्यदोषः॰ यद्येतदिति॰ शब्देनोत्तरपदस्यानुपादानात्स्वश्चः समर्थेनेति॰ सुबंतस्यानुवृत्तौ सत्यां समासस्य पदविधित्वात्समर्थपरिभाषोपस्थानात्॰ पद्येनमिति॰ ततश्चैकस्वर्यादिप्रसंगः शाकलप्रतिषेधप्रसंगश्च॰

तत्र स्वराप्राप्तेराह॰ उत्तरपदशब्दश्चेति॰ सुपि स्वस्थेति॰ तदननुवृत्तावपि प्रागुक्तरीत्या पदविधित्वं बोध्यं॰ सुपेत्यस्यानुवृत्तावतिप्रसंगमाहभाष्ये यद्येवमिति॰ कुगतीत्यनेनेति भावः॰ अतिङ्॰ ङस्येनेन तिङंतस्यैव प्रतिषेध इति तात्पर्यं॰ ऐकस्वर्यादीति॰ आदिना कृपद्यं॰ किंच तयोः समासे प्रातिपदिकतया परत्वात्सुबुत्पत्तिरेव स्यान्नतु तिङ्॰ स्यपि बोध्यं॰

वै०वि०२०२ पूर्वं धातुरुपसर्गेणेति। तत्संज्ञकशब्देनेत्यर्थः। पूर्वं साधनेन योगेऽप्युपसर्गस्य क्रियाविशेषकत्वाविशेषात् सामर्थ्यस्य दुर्वारत्वमित्य
त आह। ततश्च पूर्वमिति। साधनसंसृष्ट एवोपसर्गेण युज्यत इति केवलेन सामर्थ्याभाव इति भावः। न च निष्कृष्यैकार्थीभावो न समा
समासादिप्रयोजकः इत्युक्तं। एवं च विशिष्टेनैकार्थीभावेऽवयवानामपि तत्त्वात् तस्य दुर्वार इति वाच्यं। तेनैकार्थीभावाभावात् आंकांक्षितानवेधात्

पूर्वं धातुरुपसर्गेणेति। तत्र तयोस्सामर्थ्यमस्ति उपसर्गार्थविशिष्टायाः क्रियायाः साधनेन योगात्।
पूर्वं धातुस्साधनेनेति। ततश्च पूर्वं साधनाभिधायिप्रत्ययोत्पत्तिः पश्चात् साधनसंसृष्ट एव धातु
रुपसर्गेण युज्यते न केवल इति धातूपसर्गयोः समासाभावात्। तत्र कृदन्तेन समासो भवत्येव।
तिङन्तेन त्वातिङिति निषेधान्न भवति। यत्र तु तिङन्तेन समास इष्यते स विषयो दर्शितः उदात्तवतेति।

तदवयवेन तु प्रत्ययार्थासंसृष्टेन नैकार्थीभावः साधनसंसृष्टार्थस्यैवोपसर्गेण योगादित्यदोषात्। भाष्ये साधनं हि क्रियां निर्वर्त रा०म०
यतीति। क्रियां तत्प्रतीतिं। साध्यत्वेन प्रतीतेस्तत्संबंधाधीनत्वात् साध्यत्वेन प्रतीतार्थकयोगे च तेषामुपसर्गत्वादीति भावः॥ ॥ २८

७८४

अभिनिर्वृत्तस्य। अभिनिर्वृत्तज्ञानविषयस्येत्यर्थः। अनिष्पन्नस्येति। अज्ञातस्येत्यर्थः। नन्वेवमुपसर्गसंबंधात् प्राक् केवलत्वात् सादे
सकर्मकत्वाभावेन कर्मणि ल्लादप्रयोगस्स्यादत आह। अनुभूयते सुखमिति। भातुरेवेति। केवलधातुरेवेत्यर्थः। उपसर्गस्तु द्योतक इति।
सन्नर्थोद्बोधाय पश्चादेव संबध्यत इति भावः। एतेनोपसर्गाणां द्योतकत्वेऽपि तद्द्योत्यार्थस्य साधनसंबंधात् पूर्वमेव धातुना बोधना

अभिनिर्वृत्तस्येति। अनिष्पन्नस्य विशेषाकांक्षाया अभावात्। अनुभूयते सुखमुपास्यते गुरुरि
त्यादौ धातुरेव सकर्मकः क्रियां वक्ति उपसर्गस्तु द्योतक इति नास्ति कश्चिदस्मिन् पक्षे दोषः।
षष्ठीसमासादिति। निसत्त्वानित्यत्वाभ्यामनयोर्विरोधसङ्कानः॥

वश्यकत्वेन धातूपसर्गयोः सामर्थ्याभावेन समासो दुर्वार इत्यपास्तं। एतच्च सुडुत्कादिसूत्रविस्तरेणोपपादयिष्यते। निपराभ्यां निरित्यादौ
व्यादिद्योत्यार्थप्रतिपादकस्येत्यर्थः। विपराभ्यां परस्मैपदस्येत्यर्थो वा। विरोधसङ्कान इति। इत्यभिमान इति शेषः। अभिमानत्वे चास्यानुप
दमेव स्फुटीकरिष्यते।

वै०वि०२०२ ननु कर्मण्युपपदे ऽण् कर्मत्वं च विभक्त्या गम्यं तत्रोऽण्युत्पत्तेः पूर्वं कृदंतत्वाभावात् षष्ठ्या अप्राप्तौ द्वितीययैव भाव्यमिति ज्ञाते पि अणि तन्निवृ
त्तौ मानाभाव इति कुतः षष्ठीसमासप्राप्तिरत आह पंचकेति प्रातिपदिकस्य पदत्वाभावादुपपदत्वं कथमिति चिंत्यमेतत् सुबंतमे
वोपपदमिति तत्रोपपदमिति सूत्रे भगवानेव वक्ष्यतीत्यस्वरसं च किंच पंचकपक्षे पि सकलकारकशक्तिमानर्थः संमुग्धाकारेणैव प्रा

कुंभकार इति पंचके प्रातिपदिकार्थे प्रातिपदिकेनैव कर्मण उक्तत्वात्तत्रैवोपपदे ऽण् भाव्ये अप
वादविषयत्वात् द्वितीयानुत्पादात् कृते वा ऽणि कर्तृकर्मणोः कृतीति षष्ठी भवतीत्यस्त्युभयप्रसंगः ग
तिकारकेति न तथोत्तरपदे विभक्त्युत्पत्त्यनपेक्षणादंतरंगत्वादुपपदसमासो भवतीत्यर्थः ॥ ॥

तिपदिकेनोच्यते ननु विशिष्येति कर्मोपपदत्वप्रयुक्ताणः प्राप्तिः अन्यथा करणाद्युपपदे पि कर्मोपपदप्रसंगः तस्मादुक्तः कृत्व राम
र्थकर्मत्वस्य सत्वेन कृदुत्पत्तावपि भावितसंग्रहात् त्वा षष्ठीप्रवृत्तिरिति स्वेव भाष्याशय उचितः अंतरंगत्वादिति षष्ठीति सूत्रे सुपेतित्तती २९
यांतस्य संबंधादिति भावः अत एव मातुः स्मरतीत्यादौ न षष्ठीसमासः अत एव च षष्ठ्यंतस्यानेकसुबंते न न समास इति बोध्यं ॥

७८५

एतद्वार्त्तिकद्वयमपि प्रत्याचष्टे अथ वेति भाष्ये विप्रतिषेधपरमित्यस्य तु न प्रवृत्तिः युगपदुभयविहिततत्पुरुषसमाससंज्ञयोः प्रवृत्ति
सत्वे नासंभवरूपविप्रतिषेधाभावात् उपपदे पि समासो भविष्यतीत्यस्योपपदमिति सूत्रविहितसमाससंज्ञा तत्पुरुषसंज्ञा च स्या
स्यतीत्यर्थः अन्यादृशविरोधस्य तत्प्रवृत्तिनिमित्तत्वेन मानमिति तात्पर्यं न च नित्यत्वानित्यत्वज्ञानयोर्विरोधः बोध्यबाधकज्ञानस्य

अथ वेति षष्ठीसमासे पि दोषाभाव इत्यर्थः

प्रतिबंधकत्वात् एवं च षष्ठीसमासो नित्य एवैतद्विषये फलितः तद्बोधिताभावांशस्येतद्विरोधेनैतद्विषये त्यागात् नित्यं क्रीडेत्यादिवि
षये तस्य कृत्प्रबाधत्वात् गतिकारकोपपदादित्यत्र कृतपरिभाषायां च लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्त्तते इति षष्ठीसमासो पि सु
बुत्पत्तेः पूर्वमेव स्वरश्च तत्रापि समासे इत्यंतरंगत्वमेव नास्तीति भावः परिभाषायां सामान्यतः कारकपदोपादानेन कारकविभक्त्यंतसमा
समात्रस्य सुबुत्पत्तेः प्राक् कृद्गिर्लीमादिति बोध्यम् ॥

के०बि०२०२ केपटे सिन्नित्यसमासयोरित्यादिर्यथा स्यादित्यंतोऽग्रंथः बहुषु पुस्तकेष्वनुपलंभात् तत्र नित्यग्रहणप्रत्याख्यानाच्च उत्तरपदेति एवं चाग्रिचि

कश्चित्कार्ये दोषदर्शनादाह अनेनेति सिन्नित्यसमासयोरित्यत्र नित्यसमासग्रहणेनास्वपदविग्रहणं यथा स्यात् अंतोदात्तादुत्तर
पदादित्यत्र नित्यसमासग्रहणेनास्यग्रहणं मा भूदिति भावः यस्य विग्रहो नास्तीति अस्यापि विग्रहाभावः षष्ठीसमासेन मु
क्तेपक्षे उपपदसमाससंज्ञा वाते नित्याधिकार इति नित्यशब्दस्य स्वरितत्वप्रतिज्ञानात्तदधिकारे सं प्रत्ययः नैनेशक्यमिति
नित्यशब्दस्य स्वरितत्वं दोषवत्त्वान्न प्रतिज्ञापत इत्यर्थः तदेवं प्रयोजनाभावाद्विप्रतिषेधोन पठितव्यः॥ ॥अमैवा॥
यदर्थ इति यत्निवृत्त्यर्थो नियमः स्यादित्यर्थः स्वशायमिति अधिकरणे शेतेरित्यच् स्वगोऽमिति सोरम्भावः अनेना
नव्ययेनाम्समासो मा भूत् इत्येवमर्थोयं नियमः स्यात् अंतरंगत्वादिति अनुस्वन्नएव सावुपपदसमासेन माव्ययप्रश्ना
लुप्नेति समासविधानकालेऽनव्ययस्याणो असंभवान्नियमांतरे चेतस्य चरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यर्थः॥ राम

नेत्यादौ विभक्त्युदात्तत्वमपि स्यादिति भावः॥ ॥१९॥ ॥अमै॥ ॥नन्वेवं वचनवैयर्थ्यमतस्तत्सामर्थ्यात्तुमुन्नेनेतरमपि समासो ज्ञाप्यत इत्यत ३०
आह नियमांतरेति वक्ष्यमाण इत्यर्थः॥

७८६

अमैत्यस्यावृत्तिरिति चिंत्यमेतत् आवृत्तौ मानाभावात् अमैव तुल्यविधानं यदुपपदं तदमाव्ययेन समस्यत इत्यर्थे अग्रेभुक्त्वा इत्यत्र
समासापत्तिरव्ययग्रहणवैयर्थ्यापत्तिश्च किंच कालो भोक्तुमित्यत्र समासापत्तिस्तस्मादमैव तुल्यविधानं यदुपपदं तदव्ययेनेति नियमे
ना

अमैवेति एवकारसामर्थ्यादमेत्यस्यावृत्तिराश्रीयते ततो येन वाक्यैमेव केवलो विधीयते न प्रत्ययांतरसहित
स्तेन वाक्येन यद्विधीयते उपपदं तत्र सप्तमी निर्दिष्टात्तदमा समस्यते नान्यदित्यर्थः अग्रेभोजमिति विभाषाऽ
ग्रेप्रथमपूर्वेष्विति द्वयोः क्त्वाणमुलोर्विधानादत्र समासो न भवति अग्रादिष्विति यतोऽप्राप्तविभाषा ततः प्र
त्ययोत्पत्तावग्रादीनां निमित्तत्वान्निमित्तस्योपपदत्वात्समासप्रसंगः प्राप्तविभाषायां त्वग्रादीनां प्रत्य
योत्पत्तावनिमित्तत्वात् तन्निवृत्तावेव हेतुत्वादतस्यानुपपदत्वमित्यर्थः॥ ॥श्रीरामरामरामराम

नसर्वेष्टसिद्धिः अतएव भाष्येऽग्रेभुक्त्वेत्युदाहृतेऽग्रादिष्वप्राप्तेति वार्तिकप्रत्याख्याने च संगच्छत इत्याहुः अप्राप्तविधेरिति विशेषण
व्यावर्त्यमुपपादयति प्राप्तविभाषायां त्विति आभीक्ष्ण्य इत्यनुवृत्त्याहिंसार्थत्वाभिश्च सत्येव प्रत्यय इत्यायुक्ते प्रत्यययोस्तत्त्वनियोगेनैवोपप
दसंज्ञास्वीकारादिति भावः॥ ॥२०॥२१॥२२॥ ॥

कै० वि०२०२

शेषो वा॥ ॥उपयुक्तादन्यः शेषः सामान्यं सहसुपेत्यादिः विशेषः द्वितीयाश्रितेत्यादिः पूर्वोत्तरेति यद्यप्यन्यपदार्थवत् पूर्वोत्तरपदार्थ
योरपि प्राधान्यं नास्त्येव तथाप्यव्ययीभावादिमहासंज्ञाबलेन पूर्वाचार्यपरिगृहीतार्थस्यानिमित्तत्वमस्येत्येवमभिप्रायः विशेषणं विशे

शेषो बहुव्रीहिः॥ ॥पदस्यार्थस्य च सर्वस्योपयुक्तत्वाच्छेषमसंभाव्य पृच्छति शेष इति पदतश्चेति पदेन पदतस्योदे
शादित्यात्तसिः नहीति सर्वेषां सामान्यविशेषरूपेणोपयुक्तत्वादित्यर्थः नहि संस्पर्था इति पूर्वोत्तरान्यपदार्थेषु
तत्पुरुषाव्ययीभावविधानात् प्रथमायाद्यिति द्वितीयादीनां प्रतिपदं समासविधानात्प्रथमायाः शेषत्वे तत्र प्र
थमान्तानां पदानां बहुव्रीहिरित्यर्थः समानाधिकरणानां भवति कण्ठेकाल इत्यादौ तु सप्तमीविशेषणे इति पूर्वनिपा
तविधानात् ज्ञापकाद्भवति॥ ॥इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयाध्यायस्य द्वितीये पादे प्रथम
माह्निकं॥ ॥१॥

येत्यादौ प्रथमाया अप्युपयुक्तत्वमित्यत आह द्वितीयादीनामिति गतार्थं प्रथमयेत्यादि तु व्याख्यानभूतं न स्वतन्त्रविधायकमिति भावः यद्वा राम
शेष इत्यस्य प्रथमान्तत्वात्प्रथमान्तग्रहीत किं कस्य प्रतिपदमुक्तोरितस्यैव ग्रहणमिति सर्वं सुस्थिः॥ ॥२३॥ ॥इति शिवभट्टसुतसती ३१
गर्भजनागोजीभट्टकृते द्वितीयाध्यायस्य द्वितीये पादे भाष्यप्रदीपोद्योते प्रथममाह्निकं॥ १॥

१८१

३२

अनेकम्॥ ॥भाष्ये क्रमोल्लंघनेनाभिप्रायमाह अनेकेति अन्यपदार्थेऽर्थोऽन्यत इति अन्यार्थे इत्यस्याभिन्नेऽर्थे इत्यर्थः भेदप्रतियोगी चोपस्थितः स्व
पदार्थ एव पर्युदासविधया स्वस्वपदार्थ इति भावः वाक्यव्यावर्तकं युक्तत्वान्तरमाह वर्त्तीति तेषां सुबन्तत्वादित्यभिमानः एतानि पदानीति समा

अनेकं॥ ॥अनेकग्रहणस्य वार्त्तिककारः प्रयोजनं वक्ष्यतीति भाष्यकारः पदग्रहणस्यान्यग्रहणस्य च प्रयोजनमाचष्टे बहुवक्तव्य
त्वाच्च पश्चादन्यग्रहणस्य विचारः पदग्रहणमिति अन्यार्थे इत्युच्यमाने स्वपदार्थव्यतिरिक्तेऽर्थान्तर आश्रीयमाणेऽन्यपदार्थो लभ्यते
वर्त्तिपदानां च क्रियालक्षणे वाक्यार्थे वृत्तसंभवात्तन्निवृत्त्यर्थमपि पदग्रहणं नोपयुज्यत इति प्रश्नः यथा मे मातेति कश्चित्केनचित्पृष्टः
कीदृशः कुलशीलादिना तव पितेति स आह यथा मे मातेति एतानि पदानि तथा मे पितेत्यस्य वाक्यस्यार्थं गमयन्तीति समासप्रसंगः अ
थवा स्यादीतिकश्चित्केनचिदुक्तः तं प्रत्याह यथा मे मातेत्यादि यथाशुद्धकुला मे माता तथा पितापीत्यभिजनशुद्धिरपि स्यात् किं वा
नस्यानेनेत्यर्थः ततः सुस्नातं भो इत्येतद्वाक्यार्थे वर्तमानानां यथाप्रभृतीनां पदानां समासाभावार्थं पदग्रहणं अश्रुतवाक्यार्थे च
पदानां वृत्तिर्दृश्यते यथा नद्यास्तीरे स्नासु कश्चिदुच्यते न द्या ग्राहा सन्तीति तस्मान्माभूत्स्नासीरिति वाक्यार्थः प्रतीयते॥

नाधिकरणानामित्यनपेक्ष्येदं वस्तुतोऽर्थपरमेतत् यथा मदीया मातेत्यत्र समासप्रसंग इति बोध्यं सुस्नातं भो इति पाठे आह अथवेति अत्र
सर्वत्रान्योऽर्थो व्यंग्य इति बोध्यं अभिजनशुद्धत्वपीति अपि रेवार्थे भाष्ये वाक्यशब्देन परस्मरहमात्रं

कै०वि०२०२

व्याप्तिसमाश्रयणेति· पदार्थग्रहणसामर्थ्याद्व्याप्तिन्यायस्यैवानुसरणं नान्तरङ्गन्यायस्येत्यर्थः· राजानं पुरुषमित्यर्थे सावकाशस्तत्पुरुषः ब हुव्रीहिरपि बहुपदके सावकाश इति प्रथमान्तपदद्वयेन विग्रहे परत्वात्स्वपदार्थेपि बहुव्रीहिः प्राप्नोतीति तद्व्यावृत्त्यर्थमन्यग्रहणं क्रि यतश्चात्रशेषइतिभावः· भाष्ये एकदेश्याह· नैतदस्तीत्यादि· तत्पुरुषः समानाधिकरणतत्पुरुषः· राजपुरुषइत्यादिरपि कर्मधारयएव·

अथान्यग्रहणमिति· अन्तरङ्गत्वात्स्वपदार्थे समासे सिद्धे पदार्थग्रहणसामर्थ्यादन्यपदार्थो लप्स्यत इति प्रश्नः· स्वपदा र्थेपीति· अपिशब्दादन्यपदार्थेपीत्यर्थः· पदार्थग्रहणं व्याप्तिसमाश्रयणार्थं स्यादिति स्वपदार्थान्यपदार्थयोः समा सः स्यात्· तत्पुरुषइति· बहुव्रीहेस्त्वन्यपदार्थो यत्कशः परं कार्यं त्वाज्ञेति· तत्तश्च संज्ञयोः समावेशात्स्वरस मासान्तप्रसङ्गः· शेषवचनमिति· शेषग्रहणप्रत्याख्यानं स्मारयति·

इतर एकदेश्याह· भवेदित्यादि· स्वरसमासान्तेति पर्यायेणेत्यर्थः· यद्वा कस्यचित्स्वरः कस्यचित्समासान्त इत्यर्थः· भाष्ये ऽशेषत्वान्न भविष्यतीति· पदतोऽर्थतो वाशेषइत्यभिमानः· एतदर्थं शेषग्रहणं प्रत्याख्यातमित्याह· प्रत्याख्यानमिति· आकडारसूत्रोक्तमित्य र्थः· पदतोर्थतश्च शेषे द्वैरावतीके दोषः· पदत एव शेषे वीरपुरुषकादौ दोषः· राम० ३२

समासविधावित्ति· संख्यानदीभिश्च अन्यपदार्थे च संज्ञायां मध्यमध्यमवीराश्च नजिस्त्रैतिभावः· पदतोऽर्थतश्चे शेषार्थकस्य तत्प्रत्या ख्याने परं कार्यमिति पाठेऽन्यग्रहणमावश्यकमित्याह· ततइति· नीलोत्पलं सर इति· इदमुपलक्षणं· बहुपदके बहुव्रीहिः स्वपदार्थेपि

संख्येति· द्वैरावतीको वीरपुरुषको ऽब्राह्मणको देश इति समासविधावुपयोगादशेषत्वाद्बहुव्रीहिर्न प्राप्नोति· तस्माच्छेष ग्रहणं न कर्तव्यं· ततः स्वपदार्थे बहुव्रीहिनिवृत्त्यर्थमन्यग्रहणं कर्तव्यमिति स्थितं। अक्रियमाणइति· नीलोत्पलं सरइत्यत्रा पि विशेषानुपादानादन्यपदार्थेपि स्वपदार्थइव तत्पुरुषो बहुव्रीहिं बाधेत· कण्ठेकाल इत्यादिश्च व्यधिकरणपदो बहुव्रीहेर वकाशः स्यात्· अन्यग्रहणे तु सति स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्बाधत इति न कश्चिद्दोषः· अथेति· एकनिव त्त्यर्थतानदनेकग्रहणं नोपपद्यते पदविभिन्नत्वात्सामर्थ्ये सति बहुव्रीहिसंज्ञाविधानादनेकाधिष्ठानस्यैकसामर्थ्यस्य· नापि बहूनां समासार्थमनेकग्रहणं· तद्धितार्थस्येनोत्तरपदे परतः समाससंज्ञाविधानात्तज्ज्ञापकाद्बहूनां बहुव्रीहेः सिद्धत्वादिति प्रश्नः·

स्यादित्यपि बोध्यं· परिनिष्ठितविभक्त्या समासमजानतो भाष्येऽक्रियमाणइत्याद्युक्तिरिति बोध्यं· कण्ठेकाल इत्यादि श्चेति· बहुपदके बहु व्रीहिविधाने सावकाशमिति बत्तुं पुक्तं॥ ॥

Dr. BHAU DAJI MEMORIAL

के०वि०२०२ तत्रश्चेति॰ नन्वेकसंज्ञाधिकारात् बहुव्रीहिसंज्ञया कर्मप्रवचनीयत्वबाधे षत्वं स्यात्॰ किं च कर्मप्रवचनीयसंज्ञाया निरवकाशत्वेन तया
बाधाद् बहुव्रीहिसंज्ञैव न भविष्यतीति वाच्यं॰ उपसर्गसंज्ञाया अपि तद्वत्त्वाद्बाधात्॰ परं कार्यत्वपक्षे समावेशसंभवाच्चेत्यभिमानः॰ केचित्तु

॥ सर्पिषोपि स्यादिति॰ अपिशब्दो बिंद्वर्थे वर्तत इति तस्यापि बहुव्रीहिसंज्ञाप्रसंगः॰ ततश्च कप् समासांतप्रसंगः॰ पदांतरेण स्या
दित्यनेन चास्य सामर्थ्यमस्तीति समर्थपरिभाषापि न व्यावर्तिकेत्याशयेन केचित्व्याचक्षते॰ अन्ये त्वाहुः॰ अपिः पदार्थस्वत्राप्य
र्थताबिंद्वादेर्निराकृता तस्मात्स्यादिति पदे बिंद्वर्थे वर्तत इति तस्य बहुव्रीहिसंज्ञाप्रसंगः॰ अतिङ्ग्रहणेन च पूर्वमेव सुप्सुपे
त्यस्यापि लिंगत्वादेकस्यापि तिङंतस्य प्राप्तिः स्यात्॰ नैतदिति॰ योगद्वय एवातिङ्ग्रहणेन सुपेत्यस्यासंबंधो ज्ञापितोऽन्यत्र तु सुप्सुपे
त्यनुवर्तत एवेत्यर्थः॰

ति॰ अत्राहुः चित्तु स्यादित्यनेन व्यपेक्षासत्त्वेप्येकार्थीभावाभावः॰ स्यादिति पदमिति॰ प्रकृतिप्रत्ययार्थयोरत्रैकार्थीभावः स्यादित्यभिमानः॰ रा म०
अत्र व्याख्यानेप्येकसंज्ञाधिकारे पुरुषदोषेण॰ संतु योर्भिन्नाश्रयत्वात्॰ भिन्नत्वादिति॰ अतिङ्ग्रहणं तु नानुवर्तते व्याख्यानादिति भावः॰ ३२
योगद्वय एवेति॰ तत्रैवातिङ्पदसंबंधादिति भावः॰

७८६

गुणे संख्याया इति॰ सुबंतत्वस्य प्रत्येकस्मात्त्वादिति वक्तुं युक्तं॰ समासविधानं चेति पाचस्त्वर्थे॰ द्व्यहजाता दामिति॰ कालाः परिमाणिनेतिसू
त्रस्थेनोत्तरपदेन परिमाणिना द्विगोः सिद्धमिति वार्तिकेनासिद्धे बहूनां तत्पुरुष इत्यर्थः॰ तदपि वचनमेतत्ज्ञापकसिद्धमेवेनापूर्वमित्या

बहूनामपीति॰ अन्यथा सुप्सुपेति गुणे संख्याया विवक्षितत्वात् द्वयोरेव स्यात्॰ उत्तरपद इति॰ द्विगुग्रहणं तद्धितार्थे
त्यनेन विहितस्य समासस्योपलक्षणं तेन दिशः समानाधिकरणेनोत्तरपदे समासावयव निशेषपरतः समा
सविधानं बहूनां समासस्य ज्ञापकमित्यर्थः॰ द्विगुस्तु द्व्यहजातादौ सावकाशत्वान्न ज्ञापकः॰ तत्पुरुषोपीति॰
ज्ञापकफलस्य विषयविभागाभावादनिष्टप्रसंगो महत्कष्टंश्रित इत्यत्रापि तत्पुरुषप्रसंगात्॥

शयेन माध्ये द्विगुग्रहणं॰ तत्पुरुषोपीत्यस्य कालाः परिमाणिनेत्येतद्भिन्नोपि तत्पुरुषद्व इत्यर्थ इत्यन्ये॰ ज्ञापकफलस्येति॰ संख्याऽविवक्षाप
पेत्यर्थः॰ यदूपथा कथंचित्सुबंतत्वादिग्रहणरूपस्येत्यर्थः॥ ॥ ॥ ॥

कै०वि०२०२ सर्वस्यापि समासस्य ग्रहणेन विधानाभावादाह· विशिष्टेति· संख्याविवक्षेति· मुख्यसुबंतस्य पर्यायस्य धिकरणग्रहणाविवक्षेत्यपि बोध्यं·
संख्याया अविवक्षेति· यथा कथंचिद्द्वितीयांतग्रहणाविवक्षेत्यपि बोध्यं· अबाध इति· अन्यत्र मुख्यद्वितीयाद्यंतग्रहणं सुप्सुपेत्यत्र तु
ज्ञापकेन यथा कथंचित्सुबंतग्रहणमिति तत्त्वमत्र· तदपि द्वंद्वबहुव्रीहिविधायकएवेष्टानुरोधात्· परिमाणमुत्तरपदकसमासवि

ग्रहणेनेति· विशिष्टपूर्वोत्तरपदनिर्देशेनेत्यर्थः· तत्र द्वितीयांतस्य श्रितादिभिः समासविधानात् प्रत्ययग्रहणपरिभाषोपस्थाना
त्समुदायस्य द्वितीयांतत्वादत्र तत्सुरूपाभावः· यद्येवमिहापि सुप्सुपेत्यनुवर्त्तनात् कथं द्वंद्वबहुव्रीहिरयं ज्ञापकेन संख्याविव
क्षा बाध्यते तदा द्वितीयादिष्वपि संख्याया अविवक्षा स्यात्· नैष दोषः· तत्सुरूपविधौ सुप्सुपेति संख्या प्रतीयते द्वितीयेत्यपि· द्वं
द्वबहुव्रीह्योस्तु सुप्सुपेत्यत्रैव संख्याप्रतीतिस्तत्र ज्ञापकेनैकैव संख्याप्रतीती बाध्यते· तावतान्वयितार्थत्वात्· द्वितीयादिषु संख्या
या अबाधः· चित्रगुरिति· सत्यनेकग्रहणे सुबित्येवानुवर्तते न तु सुप्सुपेति तन्निवृत्त्यर्थत्वात्तस्य तत्र श्वोत्तरपदमपि तेन भवत्य
प्यत इति समासशालिनोगोशब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वाद्ध्रस्वत्वसिद्धिः·
धौचेति बोध्यं· ग्रहणेन तत्सुरूपद्वत्य त्र तत्सुरूपपदमव्ययीभावस्याप्युपलक्षणं· तन्निवृत्त्यर्थत्वादिति· इदं चिंत्यं· तदनुवृत्तावपि द्वयोः समा रा म०
सामानार्थे· तदित्यस्यापि चकुंशावयत्वात्· तन्निवृत्तिं विना सर्वेषामुपसर्जनत्वासंभवो द्वयोः समासालाभश्चेति व्याख्यानात्तन्निवृत्तिरिति तत्त्वं॥ ३४

७८०

वर्त्तिपदानामेकविभक्तित्वादिति· समासोपेक्षयेति शेषः· पदपेक्षयेति· विग्रहेयदेकविभक्तिकमित्युक्तौ भवत्वासत्ता विग्रहीयपदांतरो
पेक्षया मत्वादृशमिति लभ्यते न हि चित्रागावइत्येतत्तथेति भावः· अथेति· यथा कथंचित्पर्यायेण· अन्यस्य समासस्यं· समासपदाद्यत्किं
चिदेकविभक्तिकमित्यर्थ इति भावः· भाष्ये कुतश्चिदेव समासार्थाविग्रहे इत्युक्तिरूपहेतोः· किंचित्सदं समासरूपमध्याहृत्येत्यस्य ज्ञानवि

नवेति· अन्यपदार्थस्य प्राधान्याद्दृश्यमानेके क्रियायोगादनेकविभक्तित्वेपि वर्त्तिपदानामेकविभक्तित्वादित्यर्थः·
पदितर्हीति· अन्यं भावः· चित्रागावो यस्येत्यस्मिन् विग्रहवाक्येन कस्यचिदनेकविभक्तित्वं यदपेक्षया वर्त्तिपदाना
मेकविभक्तित्वं स्यात्· अथ यथाकथंचिदन्यस्यानेकविभक्तित्वमाश्रित्य वर्त्तिपदस्यैकविभक्तित्वं व्यवस्थाप्यते त
दातिप्रसंगः· राज्ञोपाकुमारीतां पश्य तया कृतं तस्यै देहीत्याद्याश्रयेण कुमारीशब्दस्यैकविभक्तित्वादुपसर्जनह्रस्वत्वं स्यात्॥

षयीत्यस्यैत्यर्थः· तदपेक्षइति च शेषः· अनेनोक्तेप्यर्थे प्रत्यासत्तिमूलकत्वं दर्शितं अत एव सन्नापेइत्यादावुपसर्जनत्वेन ह्रस्वसिद्धिः· अन्यथा
विग्रहीयसहपदे विभक्तेरेवाभावेन तदपेक्षया नियतविभक्तित्वाभावात्तदप्राप्तिः· मम तु आनियतविभक्तिकसमासांतत्वं सिषपाद
स्तु का विभक्त्यनुत्पत्तेरेवान्वाख्यानाच्च· राज्ञोपाकुमारीति· प्रथमांतेनेन समासे इति दूषणम्॥ ॥ ॥ ॥

के॰वि॰२०२ किंतर्हीति॰ वाक्यसंस्कारे परिनिष्ठितविभक्त्यापि समास इति समाधाने॰ ततश्चेति॰ तस्य चेत्यर्थः॰ पर्यायेणेति॰ प्रयोगभेदेनापि यत्रैकविभक्तित्वमेव तत्र यथा

एकविभक्तियुक्तमेवेति॰ अयं भावः॰ नायं नियमः॰ प्रथमांतस्यैव कुमारीशब्दस्य षष्ठीसमासेन भाव्यं किं तर्हि द्वितीयाद्यंतस्यापि ततश्च
समासे विधीयमाने एकविभक्तित्वाभावात् कुमारीशब्दस्योपसर्जनह्रस्वत्वाभावः॰ एकग्रहणसामर्थ्यादिति॰ एकैकस्मिन् प्रयोगे सर्व
स्यैकविभक्तित्वादेकविभक्तिग्रहणं पर्यायेणानेकविभक्तेर्निरासार्थमित्यर्थः॰ विभक्तियुक्तमिति॰ एतदपि किमर्थमुच्यत इति चेत्संज्ञिनि
र्देशार्थं अन्यथा अपूर्वनिपातइत्येतावत्युच्यमाने संज्ञ्यनिर्दिष्टः स्यात्॰ पदार्थाभिधानइति॰ देवदत्तपदस्य यावानर्थस्तावान् बहुव्रीहि
णाव रुद्धः॰ अन्यपदार्थे तस्य विधानात् ततो गतार्थत्वादनुप्रयोगो न प्राप्नोतीत्यर्थः॰ यथा चार्थे द्वंद्वविधानाद्द्वंद्वे चशब्दस्य प्रयोगो न
भवति॰ एवमिहापि देवदत्तादिपदानां न स्यात्॰ सामान्याभिधाने हीति॰ चित्रगुशब्देन तद्व्यमात्रमुच्यते न तु विशेषः॰ यदा सामान्य इति॰
चित्रा गावोऽस्यैत्येवं विग्रहे कृते ऽन्यपदार्थसामान्यस्य बहुव्रीहिणाभिधानात् विशेषस्यानुप्रयोगः॰ यदा विशिष्टेऽन्यपदार्थे बहुव्रीहिः क्रिय
ते तदानुप्रयोगासिद्धिः॰
स्यादित्यर्थमिति भावः॰ नदेवं प्रत्यासत्त्याश्रयणेन समासापेक्षया विग्रहे यन्नियतविभक्तिकमित्यर्थमाश्रित्यानेकग्रहणं भवेगेताप्रत्याख्यातं॰ ज्ञापक
कृशंपरिहर्तुमनेकग्रहणं सूत्रकृताकृतमितिदिक्॰ राम॰ ३५

७९१

वाक्यमुपमन्यसमासप्रवृत्तेस्तस्यापि बुध्यारूढत्वमस्तीत्यत आह॰ लौकिके प्रयोग इति॰ लोके सर्वेषां चित्रगुपदशक्यत्वेन तस्य सामान्यशब्द

नेदमुभयमिति॰ लौकिके प्रयोगे वृत्तिवाक्ययोर्युगपत्प्रयोगाभावादेकेनैवार्थस्य प्रत्यायितत्वादितरप्रयोगायोगात्॰ यदा
समास इति॰ शब्दशक्तिस्वाभाव्यादन्यपदार्थसामान्यमेवाभिधातुं समर्थः॰ समासो न विशेषमिति प्रक्रियायामपि सामान्ये
न विग्रहः कार्य इत्यर्थः॰ सामान्यस्यैवमर्हीति॰ सामान्यस्य समासेनैवाभिधानात्॰ सामान्यमपीति॰ यथा विशेषो विशेषां
तरस्य निवर्त्तकस्तद्वत्सामान्यमपि विशेषाणां निवर्त्तकं सद्विशेष एवेत्यर्थः॰ चित्रग्विति॰ लिंगसर्वनाम्नां नपुंसकेन निर्द्दे
शः सामान्यवृत्तितामेव प्रकाशयितुं कृतः॰ सर्वं वा विश्वं वेत्यत्राकारप्रश्लेषः कृतोऽन्यथा पर्यायप्रयोगः स्यात्॰ तत्रा वश्य
मिति॰ चित्रगु सर्वमित्युक्ते नत्वेकमेवेति विशेषावगतिर्भवतीत्यर्थः॰

त्वमिति सामान्येनैव विग्रहः कार्य इति विशेषवाक्यं न बुद्धिस्थमिति यदा समासः सामान्येन तदा वृत्तिरिति भाष्यार्थ इति भावः॰ सद्विशेष एवेति॰
इतरभेदकत्वमेव विशेषत्वमिति भावः॰ अविश्वमित्यस्यासर्वमित्यर्थः॰

कै॰कि॰२०२ चित्रागावो देवदत्तस्येति विग्रहेऽपि न देवदत्तः समासशक्यः शंकितर्हि विभक्त्यर्थ एवेति भाष्ये पक्षोत्तरमाह· अथवा विभक्त्यर्थ इति· तद्व्या
चष्टे· कृत्स्नेति· गृह्यत इति· स्वतंत्रः सन्न समासशक्य इत्यर्थः· प्रकृत्यर्थोपसर्जनः प्रत्ययार्थ इति· सच संबंधरूपः सांसर्गिकविषय

अथवेति· कृत्स्नपदार्थाभिधानेऽनुप्रयोगासिद्धिश्चोदिता परिहृता च· यदा तु विभक्त्यर्थः संबंधादिरभिधीयते समासे
न तदा तद्वाचिनी विभक्तिर्नानुप्रयोजि द्रव्यं त्वनभिहितमिति तद्वाची शब्दोऽवश्यानुप्रयोक्तव्यः· कथं पुनरन्यपदार्थ इ
ष्यमाने विभक्त्यर्थ एव गृह्यत इत्याह· तत्र हीति· पदेन प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्ये
व प्राधान्यादन्यपदार्थग्रहणेन ग्रहणमित्यर्थः· सर्वपश्चादिति· भाष्यकारवचनप्रामाण्यादव्ययेनापि षष्ठीसमासः·
अद्रव्यस्येति· असत्त्वभूतस्य विभक्त्यर्थस्य लिंगसंख्याभ्यां व्यवहारो नोपपद्यत इत्यर्थः॥ ॥ ॥ ॥ राम॰

नानिरूपिताच तत्त्वस्य प्रकारतेति भावः· अव्ययेनापीति· अन्यथा पूरणगुणेति निषेधः स्यादित्यर्थः· अव्ययशब्देन रूढव्ययमेव गृह्यत इति पु ३६
त्वांतरमप्युक्तं तत्रैव मयेति दिक्॥ ॥

७६२

न्यायसिद्धानीति· अत्रेदमेव भाष्यं मानं· अन्यथा गुणवचनेष्वस्य वाचनिकतया समासस्याकरणात् स्त्रोक्तरीत्या गुणवचनत्वाभावेन व
चनाप्रवृत्त्या वसंगतिः· गुणवचनत्वे तु यथा न तथा शब्दासंगतिः स्पष्टैव· अभेदोपचारादिति· आश्रयाभेदमापन्नो विभक्त्यर्थ एव चित्रग्वा
दिपदै रुच्यत इति भावः· संबंध्यभिधीयत इति· विशेष्यत्वनयाश्रीयते चित्रगुर्देवदत्त इत्यादावित्यर्थः· ननु गवामपि संबंधित्वात्कृतलिं

अपर इति· अकारप्रश्लेषोऽत्र व्याख्याने नास्ति· आश्रयत इति· यदा पदानधिकमन्वाख्यानं तदा शुक्लो गुणेस्येति मतुप्लुक्सामान्य
मात्रे पदं संश्लिष्यत इत्येकत्व नपुंसकत्वाश्रयेण पदप्रयोगे प्राप्ते विशेषणानां चाजातेरिति सूत्रेण गुणवचनानामाश्रयतो लिं
गवचनानि प्रतिपादितानि· वाक्यसंस्कारे तु न्यायसिद्धम्· अन्याश्रयविशेषाश्रयेणैव पदसंस्कारात्तत्र यद्यपि चित्रगुशब्देन संबं
धोऽभिधीयते तथाप्यभेदोपचारात्संबंध्यभिधीयते· तत्रादृष्टत्वेन संबंधस्य प्रधानत्वात्स्वामिन एवाश्रयत्वं व्यवस्थाप्यत इति त
दृतलिंगसंख्येभवतो न तु गवाश्रये· यदितर्हीति· यथा शुक्लशब्देन कदाचिद्गुण उच्यते कदाचिद्गुणी तथा चित्रशब्देन केवलस्यापि सं गु १
बंधस्याभिधानं प्राप्नोति संबंधिन एव तु सर्वदेष्यते तन्नसिध्यतीत्यर्थः·
गसंख्ये किं न स्यातां तत्राह· तत्रादृष्टत्वेऽपीति· गवादिरूपस्वनिरूपितसंबंधस्यैवबोधनेन स्वामिन एवाश्रयत्वात्तद्गतलिंगसंख्ये एव भवत इत्यर्थः·
तत्र बहुव्रीहेः सामान्यशब्दत्वमेवेति विशेषतात्पर्यानुप्रयोगस्यावश्यकत्वमिति भावः· ननु बहुव्रीहेः संबंधिपरत्वस्योक्तत्वेन यदि तर्हीति भाष्योक्ता
नमाशंक्याह· यथेति· एवं च कथमभिहितमिति भाष्यस्य सर्वदेत्यादिर्बोध्यः·

कै०वि०२०२ द्रव्यशब्देनेति॰ तदेवदर्शितं भाष्ये सलिंगइत्यादिना॰ अर्थस्यैव लाभादिति॰ सचार्थः प्राधान्याद्विभक्त्यर्थ एव ग्रहीष्यत इति भावः॰ अर्थग्रहण
सामर्थ्याच्चसंबंधादिर्विभक्त्यर्थ आश्रयाभिन्नएव बुध्यत इति तत्त्वं॰ एवं च पट्वादिशब्द व न्नियमेन गुणिपरएवायं न कदाचिदपि गुणपर इति

कृत्स्नइत्युक्तं तदेव कार्त्स्न्यं प्रतिपाद्यते॰ सद्द्रव्य इति॰ द्रव्यशब्देन सत्त्वरूपोर्थ उच्यते॰ अर्थग्रहणसामर्थ्यादिति॰ यदि विभक्त्यर्थस्ये
वप्रधानस्य ग्रहणमभिमतं स्यात्तदार्थग्रहणं न कुर्यात् अंतरेणाप्यर्थग्रहणमर्थस्यैव लाभादित्यर्थः॰ यदि तर्हीति॰ यथा बहुव्रीहि
णा विभक्त्यर्थस्याभिधानात् षष्ठ्यादयो न भवंति एवं लिंगसंख्ययोरप्यभिधानात्तयोर्वाचकाः प्रत्यया न प्राप्नुवंति॰ सिद्धं लिंगेति॰ स्त्री
प्रत्ययप्रातिपदिकं वर्ज्जनेतस्मात्टाबादयो भवंतीत्यर्थः॰ तत्रश्च समासेनाभिहितेपि स्त्रीत्वे द्योतकाष्टाबादयो भवंतीति दोषाभावः॰
कर्मादीनामिति॰ चित्रगुरिति समासेन प्रातिपदिकार्थमात्रस्य कर्मादिशक्तिरहितस्यैकत्वादयउक्तास्ततः कर्मादिगतैकत्वप्र
तिपादनाय वचनानि भवंति चित्रगुं पश्य चित्रगुणा कृतमिति॰ प्रथमेति॰ समासे संख्याया अभिधानात्॥

भावः॰ यदि तर्हीत्यादि भाष्यमेकदेशिनो॰ घटादिशब्देष्विव तदुपपत्तेः पंचकस्य सर्वत्र प्रातिपदिकार्थत्वात् न प्राप्नुवंतीति॰ उक्तार्थानामप्रयोगादि
तिभावः॰ कर्मादिगतैकत्वेति॰ साहचर्यादिनिरूपितकर्मादिशक्तिविशिष्टप्रातिपदिकार्थगतैकत्वेत्यर्थः॰ समासेनेति॰ प्रथमा हि प्रातिपदिकार्थगत
संख्यामात्राभिधायिनीति तत्सत्त्वात्तु उक्तमनभिहितइति तस्याएव विशेषणमिति भावः॰

राम
३७

७९३

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इस्मारक

नियोगत इत्यस्यार्थो नियमेनेति॰ येनि माभावमुपपादयति॰ प्रतिनियतैवेति॰ समयो हि सामान्यतो विभक्तिं बोधयति॰ न प्रतिनियतां
कांचिदिति भावः॰ यदीति॰ यत इत्यर्थः॰ यतः प्रतिनियतैव समयान्न भवति तत्र घटितसमयाभावादित्यर्थः॰ द्वितीयादयोपीति॰ अर्थाभावेपि
च
समयादिति॰ पश्चेति नियमार्थमारब्धेन केवला प्रकृतिः प्रयोक्तव्या नैकेवलः प्रत्यय इति॰ न नियोगत इति॰ नियमेन प्रति
नियतैव यदि न भवति विभक्तिस्तत्समयपरिपालनाय द्वितीयादयोपि प्राप्नुवंति नियमकारणाभावादित्यर्थः॰ कर्मादी
नामभावादिति॰ कर्मण्येव द्वितीयेत्येवं कर्मादिषु द्वितीयादीनां नियतत्वात्तदभावे तासामभावः॰ षष्ठी तर्हीति॰ कर्मादी
नामभावः शेषः स वात्रास्तीति भावः॰ अशेषत्वादिति॰ प्रातिपदिकार्थमात्रस्य प्रथमाविधानुपयोगान्नास्ति शेषत्वमित्यर्थः॰
एवमपीति॰ समयात्प्रथमायामिष्यमाणायां वचनस्य व्यतिकरप्रसंगः॰ अर्थवत इति॰ यथान्यत्रैकत्वादिष्वेकवचनादीनि दृ
ष्टानि तथैवात्रापि भवति एवं हि समयश्च परिपालितो भवत्यर्थश्चानुसृतः॰
नियमपरिपालनाय विभक्तिश्चेत्प्रथमैवेति नियमाभा
वादिति भावः॰ प्रातिपदिकेति॰ कर्मादिप्रातिपदिकार्थव्यतिरिक्तो हि शेष इत्यर्थः॰ व्यतिकरो व्यत्यासः॰ अर्थाभावेपि समयादुत्पत्तौ सत्यामुक्तार्थ
त्याव्यवस्थैकत्वे संगतेत्यत आह॰ यथान्यत्रेति॰ विरुद्धविभक्त्यपेक्षया अनुवादकविभक्त्यर्थाप्य[illegible]मिति भावः॥ ॥

कै०वि०२०२ भाष्येऽथवासंख्यानामेयमिति· इयं यद्विशिष्टोनप्रातिपदिकार्थः प्रतिपिपादयिषितः सा· परप्रधाना· इतरपरिच्छेदिकेवत्तदेवाह· संख्येयमनयाविशेष्यमिति- संख्येयं द्रव्यं प्रातिपदिकार्थोऽन्ययासंख्ययाविशेष्यं परिच्छेद्यं तयावोधनीयमेवं च यावत्संख्यं संख्येयं तावत्संख्या प्रातिपादिकाविभक्तिरुचिता विभक्तिमंतरा तस्या अप्रतिपत्तेरिति भावः· यदि चात्र प्रथमा न स्यादिति·असंकरेणेत्यर्थः·तदाह यदाचित्रगुरिति· यौ ह्वानित्यादौ मथानुवादकं वचनं नियमेन तथात्रापीति भावः· भाष्ये थवा वक्ष्यतीति· एवं चोक्तेषु तेषु संकरेणैवं

अथवेति· असंकरं प्रथमाविधानं च प्रकारांतरेण प्रतिपादयति· यदाचित्रगुरित्येकत्वविशिष्टः प्रातिकार्थः प्रतिपिपादयिषितः तदा विभक्त्याविना सोन शक्यते प्रत्याययितुमिति प्रथमैकवचनं विधेयं एवं द्वित्वबहुत्वयोर्द्विवचनबहुवचनविधिः· परप्रधानेति· संख्येयप्रधानेत्यर्थः· एवमपीति· षष्ठ्यर्थस्यात्रभावात्· व्यभिचरतीति· लिंगांतरसंख्यांतरयोगेऽन्यलिंगसंख्यापरित्यागात्·

सेति भावः· षष्ठ्यर्थस्येति· अयं भावः· प्रथमायाः समभिव्याहृत प्रातिपदिकस्य चित्रगोरूपस्य प्रवृत्तिनिमित्ततदाश्रयरूपस्वार्थबोधन राम०
सामर्थ्येप्यन्तथाभूतसंबंधबोधे सामर्थ्यं नेतितद्बोधाय संबंधस्योक्तत्वेपि नुवादिकाषष्ठ्येव स्यात्र प्रथमा प्रातिपादिकार्थमात्राभावा ३८
दिति· लिंगांतरेति· एवं च षष्ठ्यर्थस्य चित्रगुरित्येवं रूपबहुव्रीहावव्यभिचारात्तत्रेनानियमेन षष्ठ्येव प्राप्नोतीत्यर्थ इति भावः॥ ॥

७०४

प्रातिपदिकार्थरूपत्वादिति· तत्र चाह्निमितत्वं हेतुः· एवं च प्रातिपदिकार्थत्वात्र छोधिका प्रथमेति भावः· एतत् ध्वनयितुमेवाभिहितःसोऽर्थ इत्युक्तं तेन च षष्ठ्यप्राप्तिबीजमप्युक्तं· अनभिहिते शेषएव षष्ठीविधानात्· अतएव घटशब्दान्न षष्ठी अन्यथा तत्रापि घटत्वसंबंधस्य नियमेन भानात्षष्ठी स्यात्· अंतर्भूत इत्यस्य प्रवृत्तिनिमित्तत्वेन तदाश्रयत्वं वा प्रतिपन्न इत्यर्थः· ननु षष्ठ्या एवापत्तिः कथं प्राप्तोदक

अभिहित इति· संबंधस्य प्रातिपदिकार्थरूपत्वात् षष्ठ्यर्थता नास्तीत्यर्थः· सर्व एवात्र संबंधोंतर्भूतत्वात्प्रातिपदिकार्थतां गत इति मत्वाह् इति· नतर्हीति· भवतिनात्वमिति· गोभिरन्यपदार्थस्य यः संबंधः स एव समासेंऽतर्भूतो न तु सर्वः· बहुव्रीहिरिति· भाष्यकारेण त्रिकतः शेषोग्रहत इत्ययमर्थः साधितो वार्त्तिककारेण तु वचनेन प्रतिपाद्यते॥

इत्यादौ द्वितीयादीनामप्यापत्तेरिति चेन्न· तेषु प्राप्तोदककर्मत्येव वोधः तत्र विशेष्येन न निरूपकत्ववाधेन विशेषणमादाय पर्यवसानमिति द्वितीयादि प्रयोजककर्मत्वादेर वोधेन तदप्राप्तेः षष्ठ्यर्थस्य तु षष्ठीप्रयोजकरूपेणैव भानमित्याशयात्· वचनेनेति· समानाधिकरणानामप्रथमार्थ इति वचनाभ्यां त्रिकतः शेषपक्षीयोर्थः प्रतिपाद्यत इत्यर्थः· शेषग्रहणे तु पदतोर्थतो वा शेषवोधकं स्यात्तत्रेफलाभावो दोषश्चेति वार्त्तिकतात्पर्यं·

कै०नि०२०२ अप्रवृत्तेरिति· स्येच भाषायामिति तु अनंतरस्येति न्यायेन तत्पुरुषे कृती सस्यैव बाधकमिति भावः उत्तरपदलोपार्थमिति· कंठेस्थ काल निवृत्त्यर्थमित्यर्थः· मुखस्यैवोपमानत्वेनोष्ट्रमुखशब्दस्योपमानपूर्वत्वं कथमत आह· अवयवधर्मेणेति· मुखगतोपमानत्वेनोष्ट्रस्यापि व्यवहारादिति भावः· वैयधिकरण्यमिति· वाक्ये समासे च सादृश्यसंबंधेनान्वयः इवशब्दस्य तु भासंबंधेनान्वयस्यैव द्योतक इति अभि

उच्चैर्मुख इति· उच्चैःशब्दस्याधिकरणप्रधानत्वाद्वैयधिकरण्यमिति वचनं· कंठेस्थ इति· सुपिस्थ इति कः· अमूर्धमस्तकादित्यलुक्· समासे ऽत्र सिद्धे वचनमुत्तरपदलोपार्थं· उष्ट्रमुख इवेति· अवयवधर्मेण समुदायस्य व्यपदेशात् उष्ट्रस्योपमानत्वेति उपमानपूर्वं उष्ट्रमुखशब्दः उपमानोपमेयवाचित्वात् पदयोर्वैयधिकरण्यमत्रेति वचनमुत्तरपदलोपार्थं च· समुदायविकारषष्ठ्या इति· समुदायावयवसंबंधे प्रकृतिविकारसंबंधे च या षष्ठी तदंताद्यस्य रंतेन तदंतस्य शब्दांतरेण सह बहुव्रीहिरित्यर्थः

मातः उपमानानीति सूत्रभाष्योक्तरीत्या सामानाधिकरण्यमस्त्येवेत्यत आह· उत्तरपदेति· समुदायविकारवाचकपदस्य षष्ठ्यंतस्योत्तरपदेन समास इत्यर्थं भ्रमं वारयति· समुदायावयवसंबंध इति· भाष्ये यथापंचमुक्तवंतोस्येति· अनेन त्रिकतः शोषद्रूत्यर्थे पि शेषग्रहणं प्रत्याख्यातं तुल्यन्यायादिति बोध्यम्॥ ॥ राम ३६

१९५

इदानीमनभिधाने सत्यपि समानाधिकरणेनापि स्यादिवचनारंभेऽन्यस्यापि कर्तव्यत्वमापादयति भाष्ये अथैतस्मिन्नित्यादिना· वचनपरिगणनं· वृत्त्याश्रयाणां परिगणनं· कष्टंश्रितमनेनेति· गत्यर्थेति वाऽऽदिकर्मणीति वा भावे क्तः· यदि कर्तरि कर्मणि वा क्तः स्यात् तदोत्तरवचनाभ्यामत्र समासः स्यादेव उष्ट्रखादादिवेति बोध्यं· मत्वर्थे वर्तमानमनेकमित्युक्ते सामानाधिकरण्यमपि लब्धमेवेति बोध्यं·

अथैतस्मिन्निति· अनभिधानमभ्युपगम्यापि यदि मंदबुद्धिव्युत्पादनाय परिगणनं क्रियते तदार्थपरिगणनमपि कर्तव्यं· वर्तिनेवर्तेः समासः स विद्यते यस्मिन्नर्थे स वर्ती· मत्वर्थग्रहणमिति· षष्ठ्यर्थः सप्तम्यर्थश्च मत्वर्थः॥ संख्येयेति·२
संख्येयस्यान्यार्थस्य चान्यपदार्थत्वात्सिद्धे समासे उत्तरसूत्रमनर्थकं स्यात् पदार्थेनेन मत्वर्थे समासस्तदा सार्थकमित्यर्थः

तथाचोत्तरस्यैति वाक्यं केनचित्संख्येयेति सूत्राभिप्रायतया व्याख्यातं तन्निरस्यति· भाष्ये केचिदिति· अत्र प्रथमांतसंख्यापदं समानाधिकरणेनापि स्यात् [illegible] एवं द्विदशा इत्यत्राप्युह्यं· अत्र पक्षे उत्तरस्य योगस्य यद्वचनं करणं तस्यार्थः फलमुपपन्नमित्यक्षरार्थः॥ ॥ ॥

कै०वि०२०२ अस्य कथमाबाधिमावश्यकत्वमभिप्रेत्य स्वयमाह-यद्यपीति कइति-तदेव दर्शयति-कर्मवचनेनेति-कर्मवचनेनेत्यस्यायमर्थः-प्रथमा
भिन्नविभक्त्यर्थे कर्मबोधकेन शब्देन प्रत्यासत्त्या कर्मवाचकस्य समास इति तेन व्यधिकरणेन दोषः-अन्यथा-मत्वर्थ इत्यस्यानाव-
श्यकत्वमिति-सूत्रेणैव सिद्धेरिति भावः-आद्यमेव स्विस्यादिरूपन्यस्यतीत्यंतः कैयटग्रंथस्तु चिंत्यः-अस्यान्य वार्तिककारीयत्वात्

व्याख्यानांतरमाह-अपर इति-कर्मवचनेनाप्रथमायाइति-प्रथमार्थं वर्जयित्वा सर्वत्रान्यपदार्थे कर्मवाच्चि समासो
भवतीत्यर्थः-इदं च वार्तिकमेवमुपपद्यते यदि मत्वर्थे बहुव्रीहिर्भवति अन्यथैतदनर्थकं स्यात्-आद्यमेव तदुप
क्तं व्याख्यानं-नहि वार्तिककाराः स्ववचनमेव ज्ञापकत्वेनोपन्यस्यति ऊढरथ इति-रथ शब्दः कर्मवचनः ऊढशब्देन
सामानाधिकरण्यात्-बहिरंगेति-वर्तिपदार्थनिमित्तां बहिरंगा बाह्यपदार्थापेक्षा तु बहिरंगेति नगृह्यते ऽसिद्धत्वादित्यर्थः-

लुप्ताख्याते पुंवद्वचनप्रामाण्यादिति समर्थसूत्रस्य वार्तिकस्य वार्तिकवचनप्रामाण्यादिति भाष्ये व्याख्यानात्-एवं च सर्वथापि चमुक्तंतोऽ राम०
स्मीतिं अस्य त्र समासवारणायानभिधानस्यावश्यकतया पंचभिर्मुक्तमस्य कष्टे देवेगत सत्रगते पश्येत्यादावप्यनभिधानमाश्रित्य वार्तिकानां शे ४०
षग्रहणस्य च प्रत्याख्यानमेव युक्तमिति भाष्याशयः-अव्ययानां चेत्यपि नवार्थे उञ्ज्ञेरादीनां वृत्तिविषये शक्तिमत्त्वाधानत्वांगीकारेण सूत्रेण सिद्धेः
अन्यान्यप्यनिष्टांशेनभिधानमाश्रित्य प्रत्याख्येयानीति दिक्-

७९६

अस्तीति तिङंतमेवेति भाष्ये सुबधिकार इति-अनपेक्ष्येति-सो प्रामाणिक इति तत्वं-एवं च तस्याति ङंतत्वात् प्रातिपदिकत्वेन सु
बंतत्वमिति सूत्रेणैव सिद्धमिति भावः-अन्यपदार्थविशेषणेनेति-अन्यपदार्थो विशेष्यते विशेषवत्स्थाप्यते ऽनेन ताहृशेन कूढइति श
ब्देनोत्तरं नोपपद्यते इत्यर्थः-दिगंतराणि-प्रकारांतराणि-विशेषणविशेष्यभावाभावात्विति-परिच्छेद्यपरिच्छेदकभावो विशेष्यविशेष

उपसर्गविभक्तीति-स्वरादिष्वितिश ब्दपाठमनपेक्ष्यैतदुक्तं-प्रतिवचनमिति-वर्तिपदार्थाच्च बहुत्वसंख्यायुक्ताः पृष्टास्तत्रैकसंख्या
युक्तेनान्यपदार्थविशेषणेन प्रतिवचनेनोपपद्यत इत्यर्थः-इष्टसमासस्यापनायदिगंतराणि निराकर्तुमुपन्यस्यति-एवं तर्हीति-प्रति
वचनमिति-कूढानामिति प्रतिवचनेन भाव्यं न तु कूढइत्यनेनेत्यर्थः-स्वरे चेति-अंतोदात्तः स्यात् आद्युदात्तश्चेष्यत इत्यर्थः-कः सब्र
ह्मचारीति-सुप्सुपेति समासं मन्यते-विशेषणविशेष्यभावाभावात्तु विशेषणसमासो नास्ति-कः सब्रह्मचारी तवेति-एकस्मिन्पृष्टे
एकवचनेन प्रतिवचनमुपपद्यते-

भाव इत्यभिमानः-वस्तुतो विषयताविशेषवत्वरूपमेव तत्र तन्निष्ठमिति तेनापि समास इति चिंत्यं॥ ॥ ॥

कै०वि०२०२ व्यधिकरणं प्राप्नोतीति· प्रश्नविशेषणं यो यिषः·· तत्र हेतुमाह· अहं कठ इति· यतो हि भिन्नत्वेन सामानाधिकरण्यमतस्तेन व्यधिकरण
मित्यर्थः· विशेषाभावमिति· प्रतिवचनानुपपत्तिपरिहाराय तस्य विशेषस्याभावमित्यर्थः· अनुकरणमिति· तएवं चतद्विषयोन्याय
इति मध्यमपदलोपी समासः·· यत्त्वनुकरणस्य गतित्वात्समास इति· तन्न· कृभ्वस्तियोगएव तत्सत्त्वात्·· भाष्ये अग्नौ करवाणीत्यस्य

अत्रापि पक्षे कठ इति प्रतिवचनं व्यधिकरणं प्राप्नोति· अहं कठ इति सामानाधिकरण्यं दृश्य
त इति विशेषाभावं मत्वाह· यथवेति· अग्नौ करवाणि न्यायेनेति· अग्नौ करवाणीति पद्वाक्यं तदनु
करणमेतत्· कर्मापीति· सकर्मकत्वात्करोतेः क्रियायाः· एवं कठ इति· नाहि ते यो कठत्वेन विना तस्य
कठत्वोपपत्तिः· तथा हि समाने ब्रह्मणि व्रतचारी सब्रह्मचारी कथ्यते तत न भवतस्येकचरणाध्ययनापे
क्षं सब्रह्मचारित्वं·

अग्नौ हविः करवाणीत्यर्थः· कर्त्रर्थं तु ज्ञात इति· कुरु इत्यत्र कर्तरि लोट् एवं च तात्पर्यतः प्रधानस्य कर्तुरेवानुज्ञा भवति इति भावः·· कर्मा रास०
पीति· सहितेषामिति कर्मकारकमित्यर्थः·· तदाह सकर्मकत्वादिति· दृष्टान्तान्तरमप्याह· भाष्ये यथौ वरव त्वपीति· दार्ष्टान्तिके मा हएव मिति· ४१
न हि तेषामिति· कठ इति· कठ इत्यस्य कठशाखाध्येतेत्यर्थादिति भावः· चरणे· शाखा· तथा च तस्य प्रश्नस्यार्थमिदमुत्तरमिति बोध्यं॥ ॥

१९७

नन्वसमासेन प्रश्ने इव समासेन प्रश्नेपि बहुवचनान्तमुत्तरं कुतो नेत्यत आह· भाष्ये न खल्वपीति· सब्रह्मचारिणः समासेन प्रतिनिर्दिष्टुं प्राधा
न्येन बोधयितुमशक्या अतः प्रश्नवाक्ये यत्प्रधानं तद्विषयं यथा कथंचिज्जिज्ञासानिवर्तकमुत्तरमिति तात्पर्यं· तदाह· वर्जिपदेति· कः समासा

न खल्वपीति· वर्जिपदार्थानामुपसर्जनत्वात्तदुपलक्षितस्यान्यपदार्थस्य प्राधान्याच्च किंसब्रह्मचारिशब्देन समासेन ते
षामभिधानाभावात्कठा इति बहुवचनान्तं प्रतिवचनेन कदाचिद्भवतीत्यर्थः· यदा तु के सब्रह्मचारिणस्येति वाक्येन प्रश्नः
क्रियते न तु समासेन तदा कठा इत्येन प्रतिवचनं· समासार्थ इति· वर्जिपदार्थव्यतिरिक्तेनान्यपदार्थेन भाव्यं· इह बहुत्वा
न्यथानुपपत्त्या क्रियायां च वर्जिपदार्थस्याप्यन्तर्भावादन्यपदार्थो नोपपद्यते· किं हितयोरिति· त्वत्तो यस्य हितदर्भमिति ह्या
प्यान्तस्यावयवावयविभावलक्षणः संबन्धो नास्ति· स्वस्वामिसंबन्धे चात्रानभिधानात् बहुव्रीहिर्न भवति· समासस्यानुपप
त्तिचोदनात्समासाभावात् द्विवचनप्रसंगो न चोदितः·

चेद्गति वाक्यं न कोपीत्यर्थाभिप्रायेण भगवान्विवृणोति· समासार्थो नोपपद्यत इति· वर्जिपदार्थस्याप्यन्तर्भावादिति· बहुत्वान्यथानुपपत्त्या क्रिया
यां वर्जिपदार्थस्याप्यन्वयादित्यर्थः· अन्यपदार्थशब्दस्यान्यपदस्यैवयोर्थः न तु स्वपदस्यापीत्यर्थ इति भावः· अत्र अर्धन्तीया इत्यत्र· द्विवचनं
स्यादिति कुतो नोक्तमत आह· समासस्येति·

कै॰वि॰२०२

अवयवेनविग्रहइति॰ अवयवार्थेनवाक्यमित्यर्थः॰ वर्तिपदार्थावयवइतियावत्॰ नन्वर्धस्यद्वयोऽव्ययस्यानुपपन्नं समुदायस्यावयवानतिरिक्ततया अर्धद्वयंचसमुदायइत्येवोचितमवयवेनविग्रहः समुदायः समासार्थइतिचायुक्तमतआह॰ समुदायावयवानां चेति॰ समुदायस्यान्यप

अवयवेनेति॰ अर्धस्यद्वयोऽवयवः समुदायः समासार्थः समुदायावयवानां चक्कदाचिदभेद
विवक्षाकदाचिद्भेदविवक्षायथाब्राह्मणानांसंघः संघीभवतिब्राह्मणाइति॰ अस्तिद्वितीयइति॰
द्वयोःपूर्वरणोद्वितीयः सच्चप्यात्मकस्यसमुदायस्यावयवोभवतीतितस्यतदवयवस्यसमुदा
यस्यसमासेनाभिधानाद्बहुवचनप्रसंगः॰ अथेतिनह्यत्रस्वस्वामिभावादिःसंबंधोस्तीतिभावः॰
एतच्चवार्त्तमिति॰ असारवाचीवार्त्तशब्दः मातापितृभ्यामेवपुत्रयोर्जन्यजनकभावः संबंधोनतुपर
स्यरेणकश्चिदित्यर्थः॰

इत्येवार्थोनतुसमस्यमानपदस्यसचावयवेभ्योभिन्नोत्रान्यपदार्थः अवयवगतबाहुल्यस्यचतत्रारोपाद्बहुवचनमितिभावः॰ द्विवचनप्रसंगइ रामं॰
ति॰ उद्भूतावयवभेदस्यसमुदायस्यसमासार्थत्वात्तत्रबहुवचनेऽभिनात्रापिद्विवचनंस्यादितिभावः॰ स्वस्वामीति॰ साक्षात्संबंधोपलक्षणं॰ क्वचिद्वा ४२
र्त्तशब्दस्ययुक्तपर्यायत्वदर्शनादाह॰ असारेति॰ अनेकार्थोयमितिभावः॰

१९८

अवस्थानादिनिमित्तइति॰ सर्वत्रसंबंधस्यक्रियाकारकभावपूर्वकत्वमितितुभयत्रापिकाल्पनिकोवयवावयविभावोव्यवहारनियामकइ तिभावः॰ यद्वासंबंधत्वेनसंबंधोसन्नपिविकल्पात्मकज्ञानविषयः पुरुषस्यचैतन्यमितिवत्षष्ठीप्रयोगनिमित्तमितिभावः॰ नार्धस्येति॰ एवंच

अत्रचेदिति॰ परस्परोपकाराभावेपियदिसमानोद्देशायित्वमात्रेणकाल्पनिकःसंबंधः तदार्धस्यद्वयायेकप्रदेशावस्था
नादिनिमित्तः संबंधोयुक्तइत्यर्थः॰ इहतर्हीति॰ अर्द्धतृतीयमनयोरितिद्वयोरेवसमासार्थत्वादानयनंस्यात्नार्धस्येत्य
र्थः॰ अस्तिसहायवाचीति॰ अस्तुसत्त्वएवेत्यर्थः॰ भवतिबहुव्रीहाविति॰ उपलक्षणार्थसहितयोर्द्वयोरानयनंभवि
ष्यतीत्यर्थः॰ संयोगसमवायलक्षणेसंबंधेयदाबहुव्रीहिस्तदातद्गुणसंविज्ञानंभवति शुक्लवाससालंबकर्णइति
स्वस्वामिभावादिकेतुसंबंधेबहुव्रीहौतद्गुणसंविज्ञानाभावोयथाचित्रगुरितिसंक्षेपेणविषयविभागः॥

द्विवचनप्रसंगोपिनोदितइतिबोध्यं॰ प्राप्येस्तिसहायेति॰ एवंचैकस्यैवान्यपदार्थत्वंनतुद्व्यवयवसमुदायस्येतिभावः॰ संयोगसमवायेवेति॰ एवंच प्रकृतेतद्गुणसंविज्ञानस्यवक्तुमशक्यत्वाल्लोहितोष्णीषमानयेत्यादौउपलक्षणार्थसाहित्यप्रयुक्तवचनादर्शनेनद्विवचनप्रसंगाद्दुष्टोयंपक्षइ
तिभावः॥ ॥

गो॰१

DR. BHAU DAJI डाक्टर भाऊदाजीइत्यस्यपुस्तकम्

१

कै०वि०२०२ अयमर्थ इति। प्राग्व्याख्यातं एतद्भाष्याक्षरार्थः। एवं च विग्रहे उद्भूतावयवभेदस्य समुदायस्य अन्यपदार्थत्वात् तादृश एव समास इति शङ्का इति
तन्निरासाय बहुवचनमेवेति तात्पर्यम्। भाष्ये कर्तव्यमर्धतृतीया इति। प्रयोक्तव्य इत्यर्थः। योवयव न स्तं समुदायं न व्यभिचरतीति यद्

द्विवचनप्रसंगाद्दुष्टोयं पक्ष इति मत्वाह। अथवेति। संख्यानामेयमिति। अयमर्थः। अर्धेन तृतीयमेषामिति बहुत्वसंख्याविशिष्टो
ऽन्यपदार्थो वाक्ये विद्युपात्त इति तं भाष्ये तस्यैव समासो वाचक इति अवश्यं प्राप्यं बहुत्वं यथा चन्द्रसाद इति बहुत्वसंख्यायुक्तः स
पी०स०३ मुदायः प्रतीयते घवखदिरपलाशा इति च तथा ऽर्धतृतीया इत्यर्थः। इह तर्हीति। अर्धस्य द्वयोश्च द्रोणयोर्यः समुदायः स समासार्थः
तत्रार्धस्य द्रोणत्वाभावात् द्रोणा इति नोपपद्यते इत्यर्थः। नैष दोष इति। अर्धेपि द्रोणत्वोपचारात् द्रोणशब्दस्य प्रवृत्तिरित्यर्थः। न क
र्तव्यमिति। स्वावयवस्य समुदायरूपोपचारो नान्यदीयेवयव इत्यर्थः। अर्धे द्रोणो द्रोणमिति। द्रोणेन विना स्वाभावादित्यर्थः॥
अर्धाढकमिति। चतुराढको द्रोणः तत्र अर्धं विनापि द्रोणे नैकाढकसद्भावे पर्यायस्य भावः॥

यच्च यद्बुद्धिस्तद्बुद्धिस्तद्बुद्धिं न व्यभिचरतीत्यर्थः। अन्यथा द्रोणत्वेऽभावद्धितत्वरूपो व्यभिचारोऽर्धद्रोणे प्रसज्येतेति तदसंगतिः स्पष्टैव। अर्धाढकं पुन राम०
र्व्यभिचरतीत्यस्य द्रोणमिति शेषः। अर्धाढके कृते द्रोण न विनेति। द्रोणबुध्या विनेत्यर्थः। द्रोणेन द्रोणबुध्या एकाढकसद्भावेन तद्बुद्धिसद्भावे॥ ॥३॥ ४३

७०९

संख्ययाव्ययास॥ ॥ आसन्नाभावान्वेति। अष्टन इत्यस्य बहुव्रीहौ निषेधात् सोपि बहुव्रीहित्वनिश्चायक इति भावः। कोयमिति भाष्य
स्य किं विग्रहः कोयमित्यर्थ इति तात्पर्यम्। कदाचिद्द्वयोर्वाच्ये इति। वा धिविषयत्वस्यैव विकल्पं वाशब्दो द्योतयतीत्यभिमानः। बहूनामानय
नमित्यस्य बहूनामानयनान्वय इत्यर्थ इति तात्पर्यम्। भाष्ये यदा द्वावानीयत इति। द्वावेवानयनान्वयित्वेन बुध्येते इति भावः। अनिर्ज्ञाते इ

संख्ययाव्य॥ ॥ द्वित्रा इति। बहुव्रीहिनिमित्तस्य उच्चोदर्शनादासन्नाभावाच्च निश्चितो बहुव्रीहित्वे विग्रहनिश्चयाय प्रश्नः
कोयं समास इति। स्वाभिप्रायं प्रकाशयितुमाह। कोस्येति। यदि तावदित्यत्र य एषामुपमुग्धानामिति तदा मत्वर्थत्वात्स
र्वेण बहुव्रीहिः सिद्धः समासान्तस्तु उच्च न सिध्यति असंख्येयवचित्वाद्बहुव्रीहेः। अथ द्वौ वा त्रयो वेति तदा पक्षे द्विवच
नप्रसंगः स्यादेवेति। विकल्पो वार्थ इति द्वित्रशब्दः कदाचिद्द्वयोर्वाचकः कदाचित्त्रयाणाम्। अनिर्ज्ञाते इति। केचिद्वचनमेतदित्याहु

ति। परस्परप्रतिक्षेपकद्विचनित्ववत्त इति बोधे निर्णीतसंख्यत्वाद्बहुवचनं भवतीति भावः। तदाह। केचिदिति। परस्परप्रतिक्षेपकत्वं
हि वार्थः। कदाचिद्द्वयो र्बोधः कदाचित्त्रयाणामिति अनिर्णीतसंख्यार्थकत्वाद्बहुवचनेन बहुवचनं साध्यमिति तदाशयः॥ ॥

कै०वि०२०२ अन्ये त्विति· संशयोत्रेति· अनिर्ज्ञातेदुत्वस्यानिश्चयेनाविज्ञातेदुत्वमर्थ इतिभावः तथाच संशयविषयेइतिफलितं· अर्थशब्देनात्रेति·प्रकर
णादितिभावः अंतर्भावितेति·संख्यांतो बहुव्रीहिः अतएवैकोद्वावित्युत्तरे· अन्यथा बहुविषयप्रश्नेतदुत्तरासंगतिरितिभावः वि
रुद्धानेकेति·विवल्पार्थएववाशब्दः क्रियाविषयत्वस्येवच विकल्पानन्तुबोधविषयत्वस्यापिसइतिभावः· विमर्शः· परस्पर

अन्येतुन्यायस्थितिइं मन्यंते· अयमर्थः संशयोत्रवार्थोनविकल्प[redacted]सचानियतसंख्याविमर्शीतिविमर्शविष
यबहुत्वसद्भावाद्बहुवचनं· अर्थशब्देनात्रसंख्येवोच्यते संख्येयामविज्ञातायामित्यर्थः कतिभवंतइति· अंत
र्भावितपूर्वसंख्याबहुत्वसंख्याइच्छातइतिबहुवचनं· द्वौवेति·विरुद्धानेकविषयत्वाद्विमर्शस्यपर्यायस्थि
तद्वित्वत्रित्वाधारवस्तुसंकलनयापंचाधिष्ठानत्वमुच्यते॥ ॥ ॥ ॥

प्रतिक्षेपः विकल्पेइयत्तानिर्धारणमितिभेदः यद्वासंशयएववार्थः अनेकविषयत्वात्अनेकविषयरूपत्वात्· विमर्शस्यसंशयस्ये राम०
त्यर्थः संशयस्येचविषयातिष्ठमित्यन्यत्रनिरूपितेपंचाधिष्ठानत्वमुच्यतइति·वाचइतिशेषः द्वित्रशब्दजन्योबोधोनियमेनपंचविषयइतिभावः ४४

८००

भाष्ये द्विशोर्ध्व इति· अत्रापिडजाख्याभावाभ्यां बहुव्रीहित्वस्यानिश्चयः· द्वौदशयेषामुन्मुग्धानामितिविग्रहेडजनुपपत्तिः संख्येयेसमासा
वर्तनात् तस्माद्विग्रहविषयएवात्रापिप्रश्नस्तत्रस्वपदविग्रहपरित्यागेनास्वपदविग्रहः कस्मादित्यतआह· अयंभावइति· नापिसंख्ये
यानामिति· तेषांबहुत्वात्· दशत्वावृत्तीति· यद्यपिक्रियाभ्यावृत्तिगणनेकृत्वसुच् एवंचदशत्वावृत्तीत्यसंगतंतथाप्यावृत्तिक्रियाजन्यग

द्विर्दशेति· अयंभावः द्वौदशेतिविग्रहोविरोधान्नक्रियतेतथाहिद्वित्वंदशसंख्यायाएकत्वान्नोपपद्यतेनापि
संख्येयानांतस्माद्विशब्देनदशत्वावृत्तिगताद्वित्वसंख्याप्रतिपाद्यतइतिसुजंतेनवाक्यंक्रियते· अत्रदूषणमा
ह· संख्यासमासइति· सुजंतस्यशब्दांतरत्वात्संख्यावाचित्वेनास्तीत्यर्थः द्विदशतावीति· द्विदशतोवर्गावित्यर्थः

णनमेनात्रेतिबोध्यं· दशत्वावृत्तीत्यस्यदशत्वावृत्तिजन्यगतेत्यर्थः यद्यपिसुजंतोव्यावृत्तिगतसंख्याबोधकस्तथापिसंख्यायाः संख्येय
स्यनाप्राधान्येनबोधकः संख्याशब्दउच्यतेनापितथाद्वित्वसंख्यावृत्तिकदशत्ववत्तइतिप्रतीतेरित्याह· सुजंतस्येति· शब्दांतरत्वात् सं
ख्यासंख्येयातिरिक्तबोधकत्वात्· वर्गाविति· पंचदशतौवर्गेवेतिनिपातनात्· वर्गगतद्वित्वप्रतिपादकतयाद्विशब्दः संख्यावाचीत्यर्थः·

कैं०कि०२०२

अभ्यावृत्तिसंख्याभिधायीति। अभ्यावृत्तिजन्मगतसंख्याभिधायीत्यर्थः। अभ्यावृत्तिश्च समासशक्त्येति द्विशब्दस्तद्गतसंख्यायामेव वर्ततइ
ति भावः। भाष्ये सुजंतत्वादित्युच्यतेइति। त्वया सुजंतत्वात्संख्येयप्रसिद्धिरुच्यते न च वक्तौ सुजंतमस्ति तस्मात्केन लेनैव समासः

न वेति। न हि त्वाक्योपमर्दे न समासः क्रियते लौकिके प्रयोगे द्वयोरपि नित्यत्वात्। अन्वाख्यानमात्रं तु शास्त्रेण क्रियते।
तत्राभ्यावृत्तिविषये सुच्प्रत्ययांतरेणाभ्यावृत्तिसंख्याभिधायी द्विशब्द इति संख्यावाचित्वात्समासोऽभवत्येव। न चात्रेति।
वृत्ताविर्त्यर्थः। अभिहितइति। शब्दशक्तिस्वाभाव्यात्समासः सुजर्थं प्रत्यायमतीत्यर्थः। इतरः। कार्यशब्ददर्शनमाश्रि[illegible]
त्याह। किंच भोइति। यथा चार्थे द्वंद्वस्य विधानात् द्वंद्वे चशब्दो न प्रयुज्यते। तथापद्यपि समासः सुजर्थे विधीयते तदा सु
च्प्रयोगः स्यान्नान्यथेति प्रश्नः। नखल्विति। नहि शब्दैरर्थाभिधाने नावानकं किंतु स्व।

सन्वासुजंतइति। संख्येति प्रसिद्धिरित्यर्थः। सुजर्थमिति। यद्युत्पत्तिगणेन द्विशब्दस्तामुत्पत्तिविशिष्टां क्रियामित्यर्थः। नहि शब्दैरिति। तत्र त
त्रार्थविशेषोपादानमुबुधबोधनायान्वाख्यानानिमित्तत्वेनाश्रीयते न तु शक्त्याधानायन्येनेवतासर्वत्र तदुपादानमावश्यकमिति भावः। राम० ४५

८०१

भाष्ये समासेन न तत्प्रतीतौ बीजमाह। यावता संख्ययोय। संख्येयेति। संख्येयत्वयोग्योयः स संख्यया संख्यायते गण्यते संख्येयश्च एवं य
दार्थसंख्यायाः प्रकृते नोत्तरपदार्थः स च संख्यारूपः संख्येयरूपो वा उभयथापि न द्व्यादिसंख्येयः। अद्यस्यैकत्वाद्वितीयस्य दशत्ववत्त्वात्। अ
तः सामर्थ्यात्क्रियाजन्मरूपः सोऽर्थो वाच्य इति सामर्थ्यादेव समासेनोक्त इति भावः। तदुक्तं यत्न्याचष्टे। क्रियाभ्यावृत्तीति। भाष्ये स च क्रियाभ्या
वृत्त्यर्थइति कर्मधारयः। संख्येयश्च क्रियाजन्मरूपोऽर्थ इत्यर्थः। स चोक्तइति। क्रियातज्जन्मरूपोऽर्थश्च समासेनोक्त इत्यर्थः। अनेन पंच

स चेति। क्रियाभ्यावृत्तिलक्षणेऽर्थे संख्येयो न तु दशसंख्यानपि तत्संख्यायुक्ताः। एतच्च पूर्वमुक्तं। वाक्ये तु सुच्प्रत्ययांतरेण क्रिया
भ्यावृत्तेरनवगमात्सुचः प्रयोगस्ततश्चास्वपदविग्रहः क्रियते द्विर्दश द्विर्दशा इति। अनेनैव न्यायेन द्वौ दश ता [illegible] विग्रहः अ
र्थान्यायसाम्यात्तु प्रतीयमानत्वाद्भाष्यकारेण पुनर्दर्शितः। तदुक्तं शब्दांतरत्वाद्वा [illegible] विशेषाय [illegible] दा। वृत्तिशब्दो न्यएवायमर्थांतर
निबंधनइति।

न्तत्वं पचतीत्यादौ क्रियोत्पत्तिः सुजाद्यर्थ इति बोधितं अत्रोक्तत्वादिति यदा तास्यैकार्थीभावकृतत्वेनेति संख्यपति अष्टधाद्युपस्थितिर्हि सः न त
त्कृतत्वमस्य। एवमन्यत्रापि दार्थादयोऽपि न तत्कृता इति बोध्यं। नन्वेवमपायुक्त्या वाक्येऽपि सुचः प्रयोगो न स्यादत आह। वाक्येत्विति। शब्दशक्तिस्वा
भाव्यादिति भावः। अनेनैवेति। वृत्तौ दशशब्दो दशदर्थकः सामर्थ्यात्तदुद्भूतावयवभेदो वर्ग एव समासार्थ इति नित्यबहुवचनांतत्वमिति भावः।

वै०सि०२०२ अधिका विंशतिर्येषामिति· किंचिदधिका विंशतिः संख्या येषामित्यर्थः· भाष्येवार्थश्चेति· सुजर्थस्तु न विशेष्य इति मनोक्तः· संख्याने इ
ति· द्वौ दश तौ विंशति रिति द्वौ दश तौ परिमाणस्येमे विंशतिरित्यस्य पथात छ्युसन्ते रिति भाव· संख्येयवाभि धायित्वादिति· द्विदशा इत्या
दावपि द्विरावृत्त दश तु संख्या वृत्त इत्यर्थो त्संख्येयमेवान्यपदार्थ इति भावः· द्वित्रा इत्यत्रापि द्वि त्र्यन्यतरा इति बोधात्· नार्थस्य प्राधा
न्यं अधिक विंशा इत्यादौ सर्वनाम संख्ययोरिति विंशतिशब्दस्य पूर्वनिपातः स्यादिति न शंक्यं· तस्य करणस्याति सत्वात्तत्र द्वित्रा इत्य

संख्येयमिति· अधिका विंशतिर्यासां ता अधिक विंशा गाव इति· संख्यानवृत्तित्वाद्विंशति शब्दस्य संख्येयमन्य पदार्थोपपद्यत इति भावः
दशाद्यर्थ इति· संख्याने संख्येये चेत्यर्थः· अधिकदशा इति· दशशब्देन संख्येयस्याभिधानादन्यपदार्था भावः तस्माद्दशाद्यर्थ सूत्रे कर्तव्यमेव·

त्र वार्थोन्यपदार्थः· अधिक विंशा इत्यादौ सर्वनाम च संख्येयमिति सर्वत्रान्यपदार्थ इत्येव सिद्धं उत्तपि संख्येये वर्तमान बहुव्रीहेरित्य
र्थेन सिद्ध अतिप्रसंगस्त्वनभिधानान्नेत्याशयेन पूर्वपक्षे विंशत्यादीनां संख्या संख्येयोभयपरतया सिद्धावपि दशादीनां संख्येयमात्रप रा म०
रतया अधिकदशा इत्यादि पूर्वेण सिध्यति इत्याह· भाष्येप्येकद्वि मित्यादि· यद्यपि बहुषु बहुवचनमिति सूत्रे एकद्वि बहु शब्दानां संख्या ४६
संख्येयोभयपरता भाष्ये उक्ता तथापि सौत्र प्रयोग विषयमेवेत दिति बोध्यं॥ ॥ ॥ ॥ ॥

८०२

सं२

ससंख्येति· तयाच संतीति क्रियाक्षेपाद्येसमीपे संति ते लभ्यंते अन्यथा प्रथमांत प्रेचपठेदित्यर्थः· एवं च पूर्वपदार्थ प्रधानोयमिति पूर्वेणान
सिद्धिरिति भावः· समासस्य समीपि प्रधानतया उक्तेत्वेन कस्य सामीप्यमर्थ इत्यपुक्तमित्यत आह· धर्मेणेति· समीपिशब्दात् ब्राह्मणादि

इदानीमव्ययं निरूप्यते बहुव्रीह्यव्ययीभावयोर्विषयविभाग प्रदर्शनार्थे· उपदशा इति· दशानां समीप इति सत्त्म्यास
मीपिप्राधान्ये बहुव्रीहिः· समीपप्राधान्ये अव्ययीभाव इति दर्शितं भवति· सामीप्यमिति· धर्मेण धर्मी लक्ष्यते· कस्य सामी
पं३२ प्यवानित्यर्थः· उपशब्दो हि समीपमात्र वाची उपकुंभादिषु दृष्ट इति तस्य समीपिवाचित्वं नास्ति· नापि दशशब्दस्य समासे
स्येति चेत्तदास्य वान्यपदार्थत्वमिति प्रश्नः· उपशब्दस्येति· आराच्छब्दवदनेका र्थत्वादुपशब्दस्य समीपवानर्थः·
सएवाह· यद्येवमिति· यदोपशब्दस्ये वासावर्थ इत्यर्थः· एवमव्यया सन्ना दूराधिक ग्रहणं स्यापितम्॥ ॥श्रीराम॥

त्वात् प्यजित्याशयः· आराच्छब्दवदिति· अनेकार्थत्वमात्रे दृष्टांतः· अत्र निपातस्यापुपस्यवाचकत्वं द्रष्टव्यं· अत एव तदर्थस्य विशेष्यतया भानं·

कै०वि०२०२ वार्थस्येति·संख्येयस्योपलक्षणमेतत्· अधिकदशाद्यर्थे त्वादिति भाष्यकृतोक्तं इदानीं वार्तिककार आह· मत्वर्थे इति· एवं च पदान्त
समासमानाधिकरणाद्वित्राद्विदशाद्यासिद्धिरिति भावः· द्वित्रान्यशेषत्वादेः परिनिष्ठितविभक्त्या समासे शेषग्रहणबोधितप्रथमान्तत्व
भावइत्यपि बोध्यं· कबभावार्थं चेति· अनंतरबहुव्रीह्यधिकारापेक्षानुक्तसमासोत्तरत्वरूपशेषत्वस्यैव भाष्ये वक्ष्यमाणत्वादिति भावः·

संख्याग्रहणं तु न कर्तव्यं· द्वित्राद्यादौ वार्थस्यान्यपदार्थत्वादित्याह तत्रेति· इदानीमेतदपि स्थापयन्नाह· मत्वर्थे
चेति· ननु मत्वर्थग्रहणं तत्र न करिष्यते द्वित्रा इति सिद्धये इत्याह· कबभावार्थं चेति· शेषाद्विभाषेत्यत्र शेषाधिकार
विहितो बहुव्रीहिर्गृह्यते अनेकमन्यपदार्थ इत्यत्रैव च शेषग्रहणमनुवर्तते नोत्तरेषु योगेषु॥ ॥ ॥

अनेन समासे तु शेषाधिकारस्य समासाभावान्नेति तात्पर्यं· शेषाधिकारेति· न च समानाधिकरणानामित्यादिवार्तिकप्रत्याख्यानरीत्या राम०
शेषग्रहणमपि प्रत्याख्यातमेवस्पष्टं चाकडारसूत्रादावुक्तं तत्कथमेतदर्थत्वलाभ इति वाच्यं· अनभिधानस्य दुर्ज्ञेयतया तदर्थमेतदर्थे ४७
च शेषग्रहणमावश्यकमित्याशयात्· प्रत्याख्यानं च प्रौढ्या अनभिधानमगतिरिति सन्नस्त्येवोक्तत्वात्॥ ॥२५॥ ॥ ॥

८०३

दिङ्नामान्यं॥ ॥तत्रतेनेति मध्यपतितसूत्रमतिक्रम्य योगद्वयस्य सहविचारे कारणमाह· तुल्यन्यायत्वादिति· भाष्ये सहयोगयोरिति सहे
न योगोऽस्येति विग्रहेण सपुत्र इति समास उच्यते तत्रान्यपदार्थ इत्येवेति सह शब्दस्य साहित्यमेवार्थस्तद्वान् पित्रादिस्तु सम

दिङ्नामान्यंतराले॥ ॥तुल्यन्यायत्वाद्योगद्वयस्य सहविचारः· दिक्समाससहयोगयोरि
ति· अशिष्य इति पूर्ववार्तिकोक्तमपेक्ष्यते· दक्षिणस्याश्च पूर्वस्याश्च दिशो यदंतरालं दिकू
सा दक्षिणपूर्वेत्युच्यते तत्रांतरालस्यान्यपदार्थत्वात्पूर्वेणैव सिद्धः समासः सपुत्र इत्यस्यापि
समासस्य पिता प्रधानमन्यपदार्थोऽभिधेय इति नार्थः सूत्रद्वयेनेत्यर्थः॥ ॥ ॥

सार्थ इति भावः· समानाधिकरणानामित्यस्य शेष इत्यस्य चापरामर्शेनेदं· अत एव वक्ष्यति मत्वर्थे वा पूर्वस्येति॥ ॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्

कै०वि०२०२ नारब्धव्यमिति॰कर्मधारये ऐवपुंवत्त्वमपि सिध्यतीतिभावः॰बहुव्रीहिसंज्ञेवेति॰ द्वंद्ववारणार्थंबहुव्रीहिविसानश्यकंतत्रएतदभावेत्र

अ यपुनरिति॰सूत्रारंभविशिष्टेकालइत्यर्थः॰तत्रारब्धेऽयमर्थोव्याख्यायते अंतरालेयानिदिङ्नामानिवर्तंतेतानिस
मस्यंते दक्षिणादीनांचसामीप्यादंतरालवर्तित्वंततश्चदक्षिणाचासौपूर्वेतिसामानाधिकरण्यात्पुंवद्भावःसिध्यति॰
सूत्रेत्वनारब्धेन्यपदार्थसंपादनायदक्षिणपूर्वाशब्दयोःस्वार्थएववृत्तिरभ्युपगंतव्याततोवैयधिकरण्ये॰ननुसामानधि
करण्येपिविशेषणसमासःसिध्यतीतिनारब्धव्यमिदं॰नैतदस्ति॰पूर्वपदप्रकृतिस्वरार्थंविभाषादिक्समासइतिविकल्पित
सर्वनामसंज्ञार्थंचबहुव्रीहिसंज्ञैवेष्टव्या॰नसिध्यतीति॰नहिसामानाधिकरण्यमात्रंप्रतिबहुव्रीहौपुंवद्भावः किंतुभाषितपुंस्क
त्वनिबंधनोपिसमानायांचाकृतौयद्भाषितपुंस्कंतस्यपुंवद्भावःभाषितपुंस्कशब्दस्यार्थःप्रवृत्तिनिमित्तलक्षणेनान्यपदार्थोभि
धेयः॰नशब्दः रा०प्र०

तिपदोक्तस्याभावात्प्रतिपदोक्तत्वार्थमेववाइदंकार्यमित्याशयः॰प्रवृत्तिनिमित्तलक्षणइति॰भाषितः पुमान्यस्मिन्नर्थइतिव्युत्पत्तेरितिभावः॰नशब्द ४८
इति॰तत्रत्वन्यपदार्थंयत्किंचिदर्थमादायस्यादेवभाषितपुंस्कत्वमितिभावः॥

८०४

विनाप्रवृत्तिनिमित्तेनेति॰शब्दातिरिक्तप्रवृत्तिनिमित्तेनेत्यर्थः॰यद्वाव्यक्तिमात्रबोधकस्ततोरूढ्येति॰दक्षिणादिशब्दएवतत्रप्रवृत्तिनि
मित्तंतदभावएववानतुव्यवस्थाविषयंप्रवृत्तिनिमित्तमित्यर्थः॰व्यवस्थाशब्दाविति भाष्यस्यापिव्यवस्थाविषयप्रवृत्तिनिमित्तका
वित्यर्थः॰नहिस्वाभिधेयापेक्षावधिनियमरूपव्यवस्थापकस्यापिप्रवृत्तिनिमित्तंभवति॰दिक्शब्दानांसर्वनामत्वमवश्यमेष्टव्यमि

दिक्शब्दाविति॰विनाप्रवृत्तिनिमित्तेनदिग्विशेषेरूढ्याप्रवृत्ताविसर्थः॰यदिपुनरिति॰ततश्चव्यवस्थाकृतौसमानायां
भाषितपुंस्कत्वस्योपपत्तिः॰कथंमानीति॰यदिप्रवृत्तिनिमित्ताश्रयेणदिशिवर्तंतेतेनतुरूढ्यातदादिक्शब्दत्वानुपपत्तिः॥

तितात्पर्यकस्ययदिपुनर्दिक्शब्दाअपिव्यवस्थाशब्दास्युरितिभाष्यस्यस्यात्तर्हिभाषितपुंस्कत्वमितिशेषः॰दिग्वाचकपूर्वादीनांपृथ्वीम
ध्यभागावधिकोदयाचलादिपर्यंतदेशरूपोपाधिविशिष्टदिशिप्रवृत्तिरितिभावः॰व्यवस्थाकृताविति॰व्यवस्थाविषयप्रवृत्तिनिमित्तेसमा
नेइत्यर्थः॰नतुरूढ्येति॰शब्दातिरिक्तप्रवृत्तिनिमित्तनिरपेक्षरूढ्येत्यर्थः॰प्रवृत्तिनिमित्तविशेषानपेक्षदिग्रूढशब्दत्वंहितत्त्वमितिभावः॥

कै०वि०२०२ विषयवशादिति। दिगादिरूपविषयवशादित्यर्थः। अस्मादिग्शब्दत्वमित्यनेनान्वयः। भाष्येयदा दिशइति। यदा दिग्वृत्तिर्व्यवस्थाविष
यप्रवृत्तिनिमित्तं वक्ष्यन्तीत्यर्थः। आकाशवदेकस्यैव दिग्रूपदार्थस्यौपाधिको भेदः उपाधिश्च पृथिवीमध्यं तस्मात्तस्याश्च चत्वारः पर्व
ताः एवं च तत्राप्युदयाचलसन्निहितत्वादिकमेव प्रवृत्तिनिमित्तं अवधिस्तु परं पृथ्वीमध्यमेकमेव एवं च पुंवत्त्वं सिद्धं दिक्शब्दत्वं च

यदा दिशइति। विषयवशात्प्रवृत्तिनिमित्तात्प्रयायामपि प्रवृत्तौ दिक्शब्दत्वं पूर्वादीनां संभवतीत्यर्थः। दिशि दृष्टइति। रू
ढिरूपेणतत्र प्रवृत्तइत्यर्थः। अत एवैंद्र्यादयो यौगिकत्वान्न दिक्शब्दाः। दक्षिणोत्तरपूर्वाणामिति। अत्र हि वैयधिकर
ण्यात्सुवद्भावो न प्राप्नोतीति अवश्यं वाच्यं सर्वनाम्न इति तेनैव दक्षिणपूर्वस्यादावपि भविष्यतीति नार्थो नेन सूत्रेणेत्यर्थः॥

विशेष्यतया दिग्बोधकशब्दत्वमेवेति अभिमानः। दिशि दृष्टइति। दिशि रूढ्या दृष्टइत्यर्थः। योदिशामिति। दिगातिरिक्तमर्थे प्रवृत्तिनिमित्ततया
पियोन्नाश्रयतइत्यर्थः। एवं चतत्रशब्दस्यैव प्रवृत्तिनिमित्तत्वे तन्मत्रिमात्रशक्ततयावासमानायामाकृतौ भाषितपुंस्कत्वाभावइति भावः। स
र्वनामत्वं तु भवत्येव पृथिवीमध्यान्तत्तत्पर्यंतदेशरूपोपाधिविशिष्टाद्दिशएवपूर्वादिशब्दवाच्यत्वेन व्यवस्थाविषयत्वात्तस्मात्तैरीतादृक् रा.म.
भाष्ये कवभावार्थो वेति। शेषाधिकारस्य बहुव्रीहावेव तद्विधेरिति भावः॥२६॥ ४९

८०५

तत्र तेनेदं॥ ॥युद्धक्रियायामेवेति। इदं च स्वोक्तोदाहरणविशेषाभिप्रायं। अत एव कर्णाकर्णि प्रथितमयशः इत्यादिप्रयोगाः सं
गच्छंते। अत एव भाष्ये क्रियाभिधानादित्येवोक्तं सिद्धः समासइति। पूर्वसूत्रेण कश्चित्तु पूर्वेणेतिपाठोपि। सरूपत्वादिति। विरूपा

तत्र तेनेदं॥ ॥क्रियाभिधानादिति। इतिकरणद्विवक्षार्थात्केशाकेशि दंडादंडीति समासोयुद्धक्रियायामेव भवति सा
चान्यपदार्थइति पूर्वेणसिद्धः समासइत्यर्थः। नवेति। केशेषु केशेषु च गृहीत्वेदं युद्धं दंडैश्च दंडैश्च प्रहृत्येदं युद्धमिति ग्र
हणे प्रहरणे च सह विवक्षितत्वात्सरूपत्वादेकविभक्तित्वाच्चैकशेषः प्राप्तो वचनसामर्थ्यात्समूहान्यथानुपपत्त्या स
मूहविषयया नमाबहुव्रीहिसंज्ञया नवकाशया बाध्यते। पूर्वयोगेण तु परत्वादेकशेषो न शक्यते बाधितुं। अ
न्यपदार्थापेक्षत्वात्तस्य बहिरंगत्वात्॥ रामरामराम
णांत्वनभिधानात्समासोनेतिभावः। समूहान्यथानुपपत्त्ये
ति। सुप्सुपेत्यधिकारात्तस्याः पदसमूहवृत्तित्वादिति भावः। अन्यपदार्थापेक्षत्वादिति। सुब्सुबपेक्षत्वादित्यपि बोध्यम्॥

कै॰वि॰२०२ पूर्वदीर्घार्थे चेति भाष्ये इति शब्दादिदमपि लभ्यमित्येके॰ पक्षांतरे त्विति॰ प्रत्याख्यानपक्षे त्वित्यर्थः॰ ननूपयुक्तादिति॰ इत्यभिमानइति
शेषः॰ उपयुक्तादन्यः शेष इत्यर्थस्य शेषादिति सूत्रे भाष्यकृतैव स्यापयिष्यमाणत्वात् आवश्यकत्वात् शेषाधिकारस्यादित्यप्यर्थ इति पूर्वं

पूर्वदीर्घार्थे चेति॰ तत्र तेन आइदमित्याकारप्रश्लेषेण पूर्वपदस्य दीर्घो विधीयते उत्तरपदस्य तु यस्येति
ति लोपेन भाव्यमिति प्रयोजनाभावादात्वाभावः अथेदानीमिति॰ एवं च मुष्टीमुष्टीत्यादि भवति॰ आकार
प्रश्लेषे तु मुष्टामुष्टीति स्यात्॰ कब्भावार्थे चेति॰ इच् कर्मव्यतिहारे कब्भावपक्षे सावकाशः॰ पक्षांतरे
तु परत्वाद्बाधित्वा कप्प्राप्नोति॰ शेषग्रहणेन च शेषाधिकारो गृह्यते तेन ननूपयुक्तादन्यः॥ ॥श्रीः॥

६।२२।ति२

सूत्रस्य कब्भावार्थे चेति वार्तिकात् ज्ञापते॰ तस्मात् कब्भावार्थे चेति अत्रैकदेशयुक्तिः नेयमिकरणात्सूत्रेणानसिध्यतीति अस्य रामः॥
सूत्रस्यावश्यकत्वे ऽनेनापि कब्भावः सिध्यतीत्याशयेन॰ ५०

८०६

चार्थे द्वंद्वः॥ ॥भाष्ये चार्थे इत्युच्यत इति॰ उभयत्रापि साहित्यं समं हो विशेष्यः स च समाहारे नुद्भूतावयवभेदो न्यत्र तु विपरीत इ
त्याशयेनेदं यद्यपि चार्थे सत्संभूतो विशेषणं च तथापि चार्थे इत्यस्य तत्सदृशो इत्यर्थ इति बोध्यं॰ पूर्वपक्ष्याह॰ पाठेनापीति॰ अपि
ना पाठेन तस्याः कर्तुमशक्यत्वं सूचितं॰ स्वरादिचाद्योराकृतिगणत्वात् अभिधेयवत् विशेष्यवल्लिंगादिकं वक्तव्यं विशेष्यस्य
चार्थस्य लिंगादिराहित्यात्तत्कर्तुमशक्यमिति भावः॰ नेदं भाष्यं समाहारविषयेत त्रनपुंसकत्वैकवचनयोर्नियतत्वात्तस्मादितरे

॥ ॥चार्थे द्वंद्वः॥ ॥चार्थे इत्युच्यत इति॰ यदि समाहारेतरेतरयोगयोरित्युच्यते तदा न दोषः स्यात्॰ प्राक्समासादि
ति॰ वाक्ये चशब्देन द्योत्यस्यार्थस्य लिंगसंख्ये न स्तः समासस्य तु वाचकत्वात्तदर्थस्य लिंगसंख्याभ्यां योग इत्यर्थः॰ श्रि
तो भवति समास इति॰ समासशब्देन समासार्थश्चार्थ उच्यते॰ तस्य समुच्चितद्रव्याश्रये लिंगसंख्ये भविष्यत इत्यर्थः॥

तरयोगविषयं तत्र तत्र चार्थस्य विशेष्यत्वे संगच्छते नान्यथेति बोध्यं॰ समुच्चितद्रव्याश्रये इति॰ समाहारे तु लिंगं वार्तिकं॰ वचनम
पि द्वंद्वश्चेत्यादौ एकवचनशब्देन योगतः समाहारस्य निर्देशात् ज्ञापकसिद्धमिति इतरेतरयोगविषय एव पूर्वपक्षसिद्धांताविति
भावः॰ एवं चेतरेतरयोगे समाहारो द्रव्येणाभेदमापन्न एवोच्यत इत्याहुः॥ ॥राम॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥

कै०वि०२०२ चार्थसद्भावादिति॰ अत एव तद्विग्रहे चस्य प्रयोगः याज्ञिकत्वसमानाधिकरणे वैयाकरणत्वे मान्याज्ञिक इति बोध इति भावः॰ सच वाक्ये च शब्दबलात्समासे समासबलादिति बोध्यं॰ वैयाकरणशब्दस्यैवेति॰ अभ्यर्हितत्वापेक्षमीमांसायान्तु अल्पाच्तरत्वाद्याज्ञिकशब्दस्यैव सत्स्यादिति बो

याज्ञिकश्चायमिति॰ एकस्मिन्धर्मिण्यनेकधर्मसमुच्चयाच्चार्थसद्भावाद्द्वंद्वसंज्ञाप्रसंगस्तत्रश्चाभ्यर्हितत्वाद्वैयाकरणशब्दस्यैव पूर्वनिपातः स्यात् तत्पुरुषेतु कारणत्वं तद्वदनियमः परं कार्यं सेत्यायं दोषः॰ एकसंज्ञाधिकारे तु विशेषविहितत्वात्तत्पुरुषसंज्ञैव भवतीति दोषाभावः॰ अशेषत्वादिति॰ विशेषणमित्यन्वोपयुक्तत्वादित्यर्थः॰ उपास्नातादयः पंचतीर्थविशेषास्तां अत्रे त्वंगं तु शक्यं वास्ततः कृताकृते सुकृतदुष्कृते त्वं मातापोनतापयतइत्यर्थः॰ तीर्थस्नानप्रशंसेयं॰ कृतं तीर्थं संतापयत्यकृतं त्वनिष्टफलहेतुत्वेन॰ कृताकृतेइत्येतदत्रोदाहरणं अत्र केनेनन्विशिष्टेनानिमिति समासविधानादशेषत्वाद्द्वंद्वप्रसंगः॰ कर्मसा
मान्यंच कृताकृतयोरेकमधिकरणं मत्वा प्रश्नः॥

ध्यं॰ विशेषेति॰ चार्थद्वति॰ व्यधिकरणधर्मबोधके सावकाशं भाष्योऽशेष
त्वादिति॰ समासघटकपदबोध्यप्रधानार्थस्यैव चार्थसंबंधित्वे द्वंद्वः प्रधानाप्रधानयोरितिन्यायादिसाशयो न गूढः॰ सुकृतदुष्कृते इति॰ रा०म० ५१
कृताकृतशब्दयोस्तयोरूढिरिति भावः॰ नन्वत्रैव व्यधिकरणत्वात्तत्पुरुषेकेनानिमित्यस्य प्राप्तिरतआह॰ कर्मसामान्येति॰ कर्मसामान्यस्य विशेषाश्रय
त्वादिति भावः॥ ॥
८०७

भिन्ने॰ धर्मोधर्मलक्षणे॰ समुच्चिते मातापरामिति॰ क्रियायां समुच्चिते॰ केचित्तु कृताकृते इत्यस्य पापपुण्ये क्रमेण कृताकृत इत्यर्थमाहुः॰ अतिप्रसंग इति॰ द्वंद्वसंज्ञातिप्रसंग इत्यर्थः॰ गामश्वं पुरुषं पशुमिति वाक्येपि परस्परसाहित्यरूपेतरेतरयोगे पदानां वृत्ते द्वंद्वसं

अन्यच्छिन्नमिति॰ तत्रश्च वैयधिकरण्यात्तत्पुरुषाभावाद्वेषत्वमेव न त्वत्रैकं कर्माभिधेयत्वेन विवक्षितं किं तर्हि भिन्ने कर्मणी समुच्चिते॰ चार्थे द्वंद्ववचनइति॰ चार्थानुवादेन द्वंद्वविधानात्स्य तस्य चानिषेधविषये सद्भावादतिप्रसंग इत्य र्थः॰ दुर्मदीति॰ दुःखेन योमाद्यति सयथा सुरयानत्यति एवं यमोगवादीन्पमान इत्यर्थः॰ तत्र नयनक्रियायां गवादीनां समुच्चयाच्चार्थसद्भावादस्ति द्वंद्वप्राप्तिः॰ इंद्र इति॰ इंद्रादीनां लोकपालत्वात् स्यमानपालनक्रियायां समुच्चयोस्ति॰ सिद्धंत्विति न्यासांतरेणातिप्रसंगपरिहारः॰ युगपदेकेनेन शब्देनाधिकरणमभिधेयं द्वंद्ववाच्यं समुदायरूपं पदोच्यते तदा द्वंद्वः गामश्वमित्यादौ तु परस्परनिरपेक्षास्वतंत्रा गवादयो भिन्नै॰ रेव शब्दैः पृथक् प्रत्याय्यंत इति युगपच्छावित्वाभावात् द्वंद्वाभावः॰

ज्ञास्यादिति भावः॰ दुःखेनेति॰ क्लेशेनेत्यर्थः॰ अल्पपानेन मदानुत्पत्तिर्यस्येति फलितं॰ सुरायाइति शेषषष्ठी॰ सुरयेत्यर्थः॰ इंद्रादीनामिति॰ भा
ष्ये लोकानां पालकाइत्यध्याहार्यमिति भावः॥

कै०वि०२०२ धवखदिरयोरित्यत्रापि सहविवक्षास्यादत आह येर्था इति युगपदनुभवाभावादिति परस्परवज्ञान सदृशज्ञानसमर्पणाय शब्दप्रयोग इति भावः विप्रतिषिद्धत्वादेव युगपदभिधानानुपपत्तौ प्रश्नानुपपत्तिरत आह आरादिति तच्च दूरसमीपयोर्वर्त्तते पुरेति चिरातीतभविष्यदासन्नयोर्वर्त्तते सुखप्रतिघातेनेत्यादिना सुखप्रतिबंधिकायास्तन्नाशिकायाश्च सामग्र्यादुःखज

नकीभूताविति एकैकेनशब्देनार्थद्वयस्याभिधानात्सामानाधिकरण्यमस्ति विप्रतिषिद्धेषु चेति येर्थाऽविरुद्धास्तेषां भव त्वेवैकेन शब्देनाभिधानं विरुद्धानां तु सहानवस्थानाद्युगपदनुभवाभावात्सहविवक्षाभावाद्युगपद्वाचिता नोपपद्यत इत्य र्थः आरात्पुरादीनां विरुद्धार्थाभिधानं दृष्टमुपेक्षते किं कारणमिति सुखप्रतिघातेनेति पुरादयस्तु युगपद्विरुद्धार्थाभिधा यिनो नैवाभ्युपगम्यंते दर्शनीया माता इति वृत्तावेकार्थीभावान्मात्रर्थवृत्तित्वाद्दर्शनीयाशब्दस्य सामानाधिकरण्यमत्रास्ति

नकत्वं दुःखप्रतिबंधिकायास्तन्नाशिकायाश्च सुखजनकत्वं सच्चिते दुःखसुखजनकसामग्र्या नियमेन सुखदुःखप्रतिबंधकत्वादि चेत्सच्चिते एतेन भार्यो राज्ञो गर्गो इतिगर्गा एतः सुखव्यवहार इत्यपास्तं षष्ठीसमासे कथं सामानाधिकरण्यमत आह वृत्ताविति अयं भावः सामाना रामं० ५२
नाधिकरण्येनाभिधित्सयतयोरद्रव्योपस्थापकत्वेनात्रापि पृथक्पूर्वपदेनस्वार्थानुपस्थितेरिति

९०८

नदोष इति अन्यथैवरीत्या विरूपाणामपीत्येकशेषोपि वारणीयः द्वंद्वारंभसामर्थ्येन वाक्यीयस्य समानार्थत्वस्यैवाश्रयणादिति बोध्यं ननु अत्र पक्षे पद्धौ चेत्येव वाक्यं समासार्थमिति तत्रापि सामानाधिकरण्यमस्त्येवेत्यत आह लौकिकं चेति स्वातंत्र्येणार्थबोधाय प्र युक्तमित्यर्थः इदं च लौकिकं वृत्तिसमानार्थकमेवेति भावः शब्दानां स्वरूपतो विप्रतिषिद्धत्वाभावादाह विप्रतिषिद्धार्था इति तदप्यु

क्तमयमपीति वृत्तौ सामानाधिकरण्यस्याव्यभिचाराभावाद्यदि वाक्यविषयं सामानाधिकरण्यमाश्रीयते तदा पद्धौ म ध्वावित्यत्रापि न दोषः लौकिकं च यद्वाक्यं प्रयोगार्थं तत्र सामानाधिकरण्यमाश्रीयते न तु लौकिके प्रक्रियावाक्ये पद्धौ च म द्वौ चेति विप्रतिषिद्धा इति विप्रतिषिद्धार्था इत्यर्थः परस्परपरिहारेण सर्वेषामर्थानां शब्दैरभिधानात् अन्यत्रोभयार्थ मिति एकस्मिन्नर्थे वर्गतेर्थादर्थान्तरस्य निवृत्तिः इहापीति विरुद्धानामप्यर्थानामेकशब्दाभिधेयता यात्राभिरोधात् न भाति यद्वा जन्ममरणयोर्विरुद्धयोरप्येकसंज्ञासंप्रत्ययाय क्रियते तदा तत्र द्वन्द्वो वाच्यत्वं तमोर्थ व त्येव ॥ ॥

पपादयति परस्परेति भाव्येनिवर्त्तयतीति बुद्धित इति शेषः ननु वृत्तौ तात्पर्यं चेद्यथोहवादः अपोहश्च तदितरभेदस्त द्वाच्यान चेन्निवृत्तिर्दु लभेत्यत आह एकस्मिन्निति विरुद्धानामिति नहि सहानुभवासंभवः शब्दास्तद्बोधे प्रतिबंधक इति भावः एकासंज्ञेति एकोवाचकः शब्द इत्यर्थः

DR. BHAU DAJI MEMORIAL

वै०वि०२०२ ननु वाच्यः क्रमो न वाच्य प्रतीतिर्यौगपद्यनिरोधीत्यत आह अभिधानक्रमेति । अभिधेयक्रमः अभिधेयज्ञानक्रमः । क्रमवदर्थावग
मादिति । क्रमवतोऽर्थावगमस्य सत्त्वादित्यर्थः । भाष्ये प्लक्षशब्दः सार्थको निवृत्त इति । अर्थेन सह निवृत्त इत्यर्थः । स्वार्थे क्व तनु तस्य
निवृत्तावपि एकेन शब्देन समासरूपप्रातिपदिकेन द्वौ बोधितौ वितिद्विवचनं भविष्यतीति चेन्न समासस्य समुदेशस्त्रावपि

इदानीं युगपद्वाचितायां असंभवं प्रतिपादयति एवमपीति । अभिधानक्रमादभिधेयक्रमोऽवतिष्ठते यथा गुणवृद्धी वृद्धिगुण
विति । ततश्च शब्दक्रमोऽक्रमवदर्थावगमान्न संभवत्येकेकेनानेकस्याभिधानमित्यर्थः । न्यग्रोधशब्द इति । न्यग्रोधार्थप्रतिपत्तिका
ले यदि प्लक्षार्थस्यानवगतिः स्यात्तदा न्यग्रोधशब्दस्यैकार्थत्वादेकवचनं स्यात् तस्माद्द्विवचने बहुवचनान्यथानुपपत्त्या प्लक्ष
न्यग्रोधाविलादवेकैकेनानेकार्थाभिधायीत्यभ्युपगंतव्यं । एवं युक्त्या युगपद्वाचितां प्रसाध्यागमेन प्रसाधयति । विग्रहे चेति । ॥ ॥

प्लक्षादीनामवयवत एव बोधेन एकप्रातिपदिकन्यंजे बोधविषयत्वाभावद्भुत्यभिमानात् तस्मादिति । विनिगमनाविरहादुभयोर रा म०
प्यनेकार्थत्वमित्याशयः आगमेन । अनाशंकनीयप्रमादवेदवाक्येन । एतेन द्यावेत्यादावपि द्विवचनानुपपत्तेस्तुल्यत्वात् सर्वस्मात् विशेषद् ५३
त्यपास्तं ॥ ॥

८०१

भाष्ये द्यावाहेति । द्यावा ह क्षामा प्रथमे ऋतेनेति मंत्रस्यमिदं । ह शब्दोऽसमासद्योतकः । इतीतरापेक्षयोभयत्रापि द्विवचनं प्रथमे द्यु शब्दे
न द्वितीये चिदस्मै शब्देन व्यवधानात् समासाभावः प्रधाने द्यावापृथिव्याविस्याद्यमंत्रार्थः । यथोक्तं स चितेके मुतिकन्यायं उत्कृष्टेति । एवं च

द्यावेति । द्योशब्दो द्यावापृथिव्योर्वर्तत इति ततः परस्य प्रथमाद्विवचनस्य सुपां सुलुगित्याकारो गोतो णिदिति गोशब्दस्यौकारांतो
पलक्षणार्थत्वाण्णित्त्वाद्वृद्धिरावादेशश्च । एवं पृथिवीशब्दोऽपि द्यावापृथिव्यौ वर्त्तत इति प्रथमाद्विवचने वा छंदसीति पूर्वसवर्णदीर्घः सं
नमेतेइ इति । द्विवचनांतेन सामानाधिकरण्यात् पृथिवी इतीति पदकारैरीद्विवचनाश्रयप्रगृह्यसंज्ञानिबंधनस्य प्रकृतिभावस्याभिधा
नाच्च द्व्यर्थत्वं पृथिवीशब्दस्यावसीयते । किमेतदिति । यथोक्रमप्रतिपद्यमिति । उपो द्रुलकमिति । उद्रुष्टबलकमुद्रुलकं प्रत्य
क्षं तत्समीपमनुमानमुपोद्रुलकं आगमस्येहानुमानत्वेनोपन्यासात् । विग्रहे चेति । साहचर्यादिनिमित्ताश्रयेण नानेपि शा
ब्दानामनेकार्थाभिधायित्वं यदा दृश्यते । न दा समासे शब्दांतराणां वाक्ये दृष्टानामपि दर्शनादसंभावनानवकार्थेत्यर्थः ॥ ॥

युगपदधिकरणवचनतायाः सत्त्वस्येदमनुमानमनुमापकमित्यर्थः । साहचर्यादीति । द्यावा ह क्षामेति वाक्ये परस्परसाहचर्यमीद्द्या
वा चिदस्मै पृथिवी सन्नमतीति ह चर्येणद्विवचनानुपपत्त्या च तथा कल्पनाश्रीयते चेत् किं समासे वक्तव्यमित्यर्थः ॥ ॥ ॥

कै०वि०२०२ द्वंद्वेनेति· द्वंद्वरूपसमुदायेनोद्भूतावयवभेदसमूहो रूपोऽर्थः लक्षादिशब्दक्रमोच्चारणेन यद्यपि क्रमेणावबुध्यते तथापि द्वंद्वरूपैकप्रातिपदिकजन्यबोधविषयतामापन्नो यः सत्वेन द्विवचनाद्युपपत्तेर्युगपद्वचनेऽभानाभाव इति भावः एवं चैकं न वादी स्वमते द्विवचनादिकमुपपाद्य युगपदधिकरणवचनतावादं दूषयति तु तन्मतमनुवदति· लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थ इति· इतितव मतमिति शेषः· यदि तर्हीति· यद्येवं स्वीकुरुषे इत्यर्थः· यत्तु लघुविवरणे लक्षः लक्षशब्दघटितो द्वंद्वरूपः समुदाय इत्यर्थः· द्व्यर्थः

॥ युगपद्वाच्यत्वाभावे द्विवचनबहुवचनासिद्धिदोषपरिहर्तुमाह· समुदायादिति· द्वंद्वेन समुदायरूपोऽर्थोऽभिधीयत इति द्विवचनबहुवचनप्रसिद्धिः नैकार्थ्यमिति· उद्भूतावयवभेदः समुदायोऽभिधेयो न तु तिरोहितावयवभेद इत्यर्थः· बहुवचनप्रसंग इति· एकैकेन युगपदनेकस्यार्थाभिधानात्· याभ्यामेवेति· नात्र चत्वारोऽर्थाः किं तर्हि द्वावेवार्थावित्यर्थः

द्व्यवयवसमुदायार्थः एवं न्यग्रोधोऽपीत्यपि व्याख्येयमिति· तन्न· न्यग्रोधोऽपीत्यंशस्य वैयर्थ्यापत्तेः यदि तर्हीत्यादेरनुत्थानापत्तेश्च· न च प्रागुक्ताशयमविदुषो युगपद्वचनतावादिनोऽयं पूर्वपक्ष इति वाच्यं तत्समाधानकाले पूर्वोक्तस्वाशयप्रकटनेनैव समाधानस्योचितत्वेन याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोऽपीत्यादितत्समाधानपरग्रंथासंगतेः तद्द्व्यर्थत्वाश्रयेण युगपदधिकरणवचनतावादिन एवैतत्स्वपक्षे सिद्धांतित्वप्रतीतेः राम० ५४

८१०

नन्वेवं लक्षन्यग्रोधयोरुभयार्थत्वमिति वदतोऽन्यवाचकत्वमसिद्धमत आह· लौकिकादिति· ननु स्वस्यान्यरूपत्वाभावेन लक्षन्यग्रोधत्वादिस्यु

अन्यवाचकेनेति· लौकिकात्प्रयोगाद्धि शब्दानामर्थावधारणं तत्र यथा घटशब्दः पटार्थं न प्रत्याययति तथा लक्षन्यग्रोधशब्दौ परस्परार्थस्य प्रत्यायकौ न युक्तावित्यर्थः· लक्षस्येति· लक्षशब्दस्य न्यग्रोधार्थत्वान्न्यग्रोधशब्दस्य लक्षार्थाभिधायित्वात्स्वार्थाभिधानान्नास्त्यर्थान्तराभिधायित्वं· लोकप्रसिद्ध्यास्त्यर्थान्तराभिधायित्वमुच्यते· वृत्तिविषये त्वेकैकस्य द्व्यर्थाभिधायित्वार्थाभ्युपगतोऽभवतः लक्षोऽपि न्यग्रोध इति· न्यग्रोधशब्दवाच्य इत्यर्थः· एवं न्यग्रोधोऽपि लक्षशब्दवाच्य इत्यर्थः· कारणादिति· शब्दार्थावसायहेतुर्लौकिकव्यवहारोऽत्र कारणशब्देन विवक्षितः· न च लोके व्यवहारे लक्षशब्दस्य न्यग्रोधाभिधायित्वं प्रतीतं॥ ॥

एवं न्नमत आह· लक्षशब्दस्येति· भाष्ये लक्षशब्दस्य न्यग्रोधार्थत्वे कथमिति प्रश्नोपपादकं· यावतेति· यत इत्यर्थः· तद्याचष्टे· शब्दार्थावसायेति· शब्दार्थसंबंधग्रहणेत्यर्थः

कै०वि०२०२ प्लक्षेपिन्यग्रोधशब्दो दृश्यत इत्युक्तं तत्र दर्शनमुपपादयति लोकव्यवहारे प्लक्षेति पूर्वोक्तेन शब्दप्रयोगक्रमेणार्थज्ञानक्रमादुभयोः क्रि

इतरः शब्दप्रवृत्तिनिमित्तं शब्दप्रयोगस्य कारणमिति मत्वाह कारणादिति प्रक्षरणं वि
स्तारेणावस्थानं न्यग्रोहणमधःशाखावस्थापनं इतरः स्वाभिप्रायं प्रकाशयति द
र्शनमिति लोकव्यवहार इत्यर्थः प्लक्षेपीति लोकव्यवहारे प्लक्षन्यग्रोधौ दृश्येतामि
त्युभयोः क्रियान्वयात् द्विवचनदर्शनाच्च तुल्यं हीति तुल्यो लोकव्यवहार इत्यर्थः त
द्विषयं चेति द्वंद्वावयवानामेवानेकार्थाभिधायित्वं न केवलानामित्यर्थः॥ ॥

यान्वयो द्विवचनं च न स्यादित्यभिमानः भाष्ये तुल्यं हि कारणमिति दर्शनरूपं कारणमपि तुल्यमित्यर्थस्तदाह तुल्यो लोक इति पुनर्भाष्ये शंकते न
वै लोक इति रा०म० ५५

८११

किं युक्तमेतदिति युक्तं पुनरित्यत्र काक्वा प्रश्नो व्यंग्य इति भावः भिन्नरूपत्वादिति प्लक्षो दृश्यतामित्यादौ सविभक्तिकसमासे निर्विभक्तिकमित्य

युक्तं पुनरिति किं युक्तमेतदित्यर्थः बाधमिति भिन्नरूपत्वाद्भिन्नशक्तित्वाच्च अश्वः शोण इति
यथाश्वादन्यत्र शोणादयो न वर्तन्ते तथा विना द्वंद्वात्प्लक्षादयो न्यग्रोधाद्यर्थान्न भवंतीत्यर्थः
यदि तर्हीति ननु ताद्विषयं चेत्युक्ते कोस्य दोषस्यावसरः एवं मन्यते परस्परसन्निधानेन यदा द्व
योरपि सामर्थ्यमाहितं तदान्यतरवियोगेपि सामर्थ्यहानाभावो यथा वह्निसंपादितपाकजरूपादिस्तद्‌द्र
व्यो निवृत्तेपि वह्नौ

र्थः भिन्नशक्तित्वादिति तत्र भिन्नोपस्थितिजनिका शक्तिः समासे एकोपस्थितिजनिकासेत्यर्थः भाष्ये प्लक्षेणान्यग्रोधप्रयोग इति प्लक्षशब्दे
न न्यग्रोधरूपार्थस्योक्तत्वान्न्यग्रोधशब्दप्रयोगो नोपपद्यत इत्यर्थः

वै॰वि॰२०२ युगपदभिधानमनुक्तिश्चविरुद्धेत्यतआह॰ न्यग्रोधशब्देति॰ भारोद्यंत्रिति॰ इतरसन्निधानेएवशक्त्याविर्भावोनतुकेवलस्यापीति भावः॰ किमिमौ लक्ष्यावेवेतिभाष्यस्यमुख्यौ लक्ष्याविस्यर्थः॰ तत्कुतइति॰ तस्मात्न्यग्रोधप्रतीतिरेवनस्यादतोन्यग्रोधशब्दप्रयो

अनुक्तइति॰ न्यग्रोधशब्दप्रयोगमंतरेणेत्यर्थः॰ उक्तंह्येनतत्॰ द्वंद्वावयवानामेवानेकार्थाभिधायित्वंन केवलानां यथावह्निसन्निधावेवताम्रद्रवद्रूपंभवतिनतुतद्विनिवृत्तौ॰ सहभूतावितिभारोद्यंतवत्स स्यरशक्त्याविर्भावात्॰ आद्यमकल्पिकाविति॰ लोकव्यवहारेपदोच्चारणमात्रात्तदर्थावसायान्मुख्या वित्यर्थः॰ कौस्विदिति॰ तत्सहचरीतगुणक्रियादर्शनात्तद्रूपारोपाद्गौणावित्यर्थः॰ यथोक्तेयदिप्रक्षरतीत्या दिसंदेहः स्यादिति॰ उपक्रमेसंदेहोगौणस्यार्थस्यसंभवेमात्रेणतुनेमुख्यार्थसंभवेगौणस्यपरामर्शएवा

गत्रावश्यकइतिबोध्यं॰ गौणस्याप्यस्यास्तन्यग्रोधावित्याद्येलोकव्यवहारेपरस्यप्रसिद्धत्वान्मुख्यसमकक्षतयाभाष्येसंदेहउक्तइत्यन्ये॰ रामं॰ ५६

८९२

प्रतीताविति॰ समुदायेनद्वयोरुपस्थितिरित्येवानुभवोनतुप्रत्येकंद्व्यर्थतानुभवइत्यर्थः॰ समासस्यचानेकार्थेति॰ अनेकार्थबोधकत्वादित्यर्थः॰ उद्भूतावयवभेदसमुदायाभिधानशक्तिरुभयोः पर्यायात्क्रमप्रयोगवद्धिरपिपदैः क्रमेणैकैवबुद्धिः समूहालंबनज्ञानवदितिभावः॰

भाष्यकारः सूत्रन्यासंस्थापयितुमाह॰ इयमितिदुःखेति॰ प्रतीतावनुपारोहात्दुरुपपादेति॰ प्रमाणाभावात्॰ वृद्धव्यवहारा द्धिशब्दार्थावसायोनचतत्रलक्षप्लाक्षस्यन्यग्रोधाभिधायित्वंदृश्यते॰ नचगौणार्थत्वंप्लक्षशब्दस्यन्यग्रोधशब्देनैवन्यग्रोधस्य प्रतिपादितत्वात्॰ नचलक्षन्यग्रोधावित्युक्तेऽर्थद्वयप्रतीतेरावृत्तिः यथाप्लक्षन्यग्रोधौप्लक्षन्यग्रोधाविति॰ समासस्यचानेकार्थाभिधा यित्वात्ततःपरयोर्द्विवचनबहुवचनयोरुपपत्तिरितिद्विवचनबहुवचनान्यथानुपपत्त्यापिनास्तियुगपद्भावितार्थप्रतिपत्तिः॰ लिंगदर्शन मपिनिराकुर्वन्नाह॰ यच्चापीति॰ एकवचनस्यस्थानेद्विवचनमित्यर्थः॰ येनकृतोर्थइति॰ अर्थशब्दसंनिधानादुत्तरपदलोपीसमास आश्रीयतइत्यर्थः॰

द्विवचनमित्यर्थइति॰ अतएवपृथिवीत्यस्यप्रगृह्यत्वोपपत्तिरितिभावः॰ द्वितीयबोधस्तुएकत्रक्षमापदेनअपरत्रद्यावापदेनअत एवसंनमेतइतिद्विवचनोपपत्तिः॰ देवदत्तश्चयज्ञदत्तश्चतिष्ठतइतिवत्॥ ॥ ॥ ॥

वै॰वि॰२०२ परस्परनिरपेक्षा इति· न्यग्रोधश्छिद्यतां प्लक्षश्चेत्युक्ते न्यग्रोधस्यच्छेदनान्वये प्लक्षापेक्षाया अभावमात्रेण परस्परनिरपेक्षत्वमित्यर्थः नन्वेवं
वतोऽक्रूरस्य रहन्यमान इत्यादौ कथं समासप्रसंगो बाधितो न त आह· तत्र चेनेति· चेनाप्यचेनापीति· चं विनापीत्यर्थः क्वचित्तु विनापि चेने
त्येव पाठः ननु समुच्चये सामर्थ्यात्कथं समासप्राप्तिरत आह· सामर्थ्यं हीति· इदं तु चिंत्यं· कृतः सर्वोपि तद्धितक्रियेत्यादौ समासापत्तेः किंच क्रि

ननु चेनार्थस्य कृतत्वमुत्पादनं वा स्यात्प्रकाशनं वा तत्रोत्पादनं तावन्नोपपद्यते नहि शब्दैरर्थो उत्पाद्यंते· यथोक्तं· नहि शब्दकृतेन
नामार्थेन भवितव्यं इति· अथ प्रकाशनं तदा समएवातिप्रसंग इति मत्वाह कृतेति· कः पुनरिति· समुच्चय इति· यदा परस्परनिरपेक्षाः
पदार्थाः क्रियायां समुच्चीयंते तदा समुच्चयः यथा गामश्वं पुरुषमित्यादौ वाक्ये परस्परानपेक्षा गवादयो नयनक्रियया संबध्यं
ते· तत्र चेन कृतोर्थ इत्यवधारणमर्थग्रहणसामर्थ्यादाश्रीयते चेनैव यः प्रकाशितोर्थस्तत्र द्वंद्वो गामश्वमित्यत्र तु चेनाप्यचेनापि स
मुच्चयावगमान्नासौ चेनैव प्रकाशित इत्युच्यते· सामर्थ्यं ह्येकक्रियाद्वारकं दध्योदनादिवत्त्वादितिना सामर्थ्यात्समासपरिहारो वाच्यः

याद्वारके सामर्थ्ये दध्योदनादाविव सामर्थ्यस्य द्वारभूताया क्रियायाः पृथक्प्रयोगानापत्तेः किंचैवं सति सूत्रस्य चार्थपदावग्रहमुक्ता पुनस्तदर्थे रामं॰ ५७
प्रश्ने समुच्चयो लुखा संगतिरेव गर्भार्थे न सोत्रेण तदप्रतीतेः किं च गामश्वं पुरुषं पशुमित्यत्र सर्वत्र नैरपेक्ष्ये समुच्चयोपि कथं· समुच्चये एकत्र
सापेक्षत्वात्·

८९३

भाष्ये प्लक्षश्चेत्युक्ते इति· न्यग्रोधो दृश्यतामित्युपक्रमो कौतुन प्लक्षश्चेति गम्यत इति भावः· न्यग्रोधश्चेत्युक्ते इति· प्लक्षो दृश्यतामि
त्युपक्रम्य न्यग्रोधश्चेत्युक्ते इत्यर्थः· अन्वाचये सलोपश्चेत्युक्ते इति पाठः सापेक्षो यमिति· प्रधानीभूतक्रियमेत्यर्थः· तदस्य पदा
र्थिति· इतरस्येत्यस्य तदेत्यादिः· भिन्नकक्षतया· भिन्नक्रियान्वयितया· तत्रैव सामर्थ्याभावे युक्तं तरमाह· अनेकस्य पदस्येति· इ

प्लक्षश्चेत्युक्त इति· न्यग्रोधो दृश्यतामित्युपक्रम्य यदा प्लक्षश्चेत्युच्यते तदा न्यग्रोधश्चेति गम्यते यदा चैकस्य प्रा
धान्यं तदा इतरस्य तदनुरोधेन क्रियया संबंधाद्भिन्नकक्ष्यतया नास्ति परस्परेण सामर्थ्यमिति अन्वाचये समासा
भावः प्रधानाभिधायि पदं चार्थेन वर्त्तते अपि तु प्रधानमेवेति अनेकं पदस्य चार्थवृत्तित्वासंभवाद्द्वंद्वाभावः इत स्पष्टे
रेतरयोगः परस्परापेक्षाणामेकस्मिन्नर्थे समन्वये सति भवतीति परस्परसहितता चशब्देनैव द्योत्यत इति तत्र समासो भवति·

दं समुच्चयेपि बोध्यं· एवं च समुच्चयेप्यनेकस्य चार्थवृत्तित्वाभावात्समासपरिहार इति प्रागुक्तमसंगतमेवेति बोध्यं· परस्परापेक्षाण
मिति· एतेन व्यपेक्षा सामर्थ्यवादे द्वंद्वानुपपत्तिरपास्ता· परस्परान्वयित्ववदितरान्वयिपरस्परापेक्षत्वस्यापि व्यपेक्षात्वात्तच्च प्रकृतेस्त्येवेति

DR. BHAU DAJI MEMORIAL

वि०२०२ एतद्विपर्ययश्च समुच्चयादौ दर्शित एव· परस्परापेक्षा एगमित्यनेन समुच्चयादि लक्षणमुक्तं· अत एव भाष्ये लक्षणश्चेत्युक्ते· अ
पि चानेन समुच्चये साहित्यं विशेषणं मित्युक्तं· न्यग्रोधसहितः प्लक्ष इति हितदर्थः· अतोपि तत्र न समासः· चार्थ प्राधान्य एव तत्स
मासप्रवृत्तेः· इतरेतरयोगस्य प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यत एतत् प्लक्षोपि न्यग्रोधसहायो न्यग्रोधोपि प्लक्षसहाय इति आकारः
प्रदर्शितः· अनेनोद्भूतावयवभेदसाहित्यस्य विशेष्यतेति दर्शितं· एवं च समुच्चयान्वाचययोश्चकारो द्योतकः· अत्यपी सुवाच
कस्तत्र तदर्थस्याविशेष्यत्वादिति बोध्यं· तस्मात् ग्राममश्वमित्यादौ न समुच्चयः· विनिगमनाविरहेण सर्वेषां परस्परसाहित्यावगतेः·
अहरहः शब्देन तथैव प्रतीतेः· चार्थसाहित्यावगतिसद्भावेन समासप्राप्तिशंकां· उत्तरं तु चशब्देन साहित्ये वाक्ये यत्र प्राधान्ये
न भासते वक्तौ चाभावे न च समासेन तत्र समासशास्त्रप्रवृत्तिः· च कृतार्थ वर्त्तमानानेकसुबंतसत्वात् ग्राममश्वमित्यादौ तु अहरहः
शब्देन साहित्यं गम्यते न तु चेनेति भाष्यार्थः· समुच्चयेपि शाब्दबोधे एकत्रैव साहित्यं बुध्यते एकोनरं चयोगात् इत्यनेक सुबंतस्य राम०
प्रधानभूतचार्थेन त्वभावात् समासाभाव इत्यपमर्थश्च भगवता समुच्चयान्वाचयस्य रूपनिरूपणेनैव दर्शितः· अत एव सन्नियो ५८
गशिष्टपरिभाषापि न्यायसिद्धेति भाष्यतात्पर्यं· इंद्रस्य रूपावरुणइत्यादावपि परस्परसाहित्यैनैव लोकपालत्वं बुध्यत इति बोध्यं·

८१४

तत्रापीति· परं त्वनुद्भूतावयवभेदत्वमिति भावः· भाष्ये समाहारेपीति पृष्ठवाक्यं· अत्र प्लक्षोपि न्यग्रोधसहाय इत्यादि तु उच्यते· अनुद्भूता
वयवभेदसाहित्यावगतिरीतिर्विशेषो न्वद्भूतावयवभेदमेव साहित्यं समाहारशब्देनोच्यते· तदाह· क्रियत इति· द्वंद्वं द्वंद्व इति शेषः· सूत्रा

समाहारेपीति· तत्रापि परस्परसहितत्वावगमात्· द्वंद्वैकवद्भाव इति· युगपदधिकरणवचन
तायां द्वंद्वस्तु वक्तव्यः स्यात्· एकैकस्यानेकार्थत्वात्· न च विषयविभागार्थौ सौ वक्तव्यः· प्रयो
गदर्शनात् द्विषयविभागस्य सिद्धत्वात्· दशादिभिरिति· आदिशब्देन विंशत्यादयो गृह्यंते·
विंशत्याद्यर्थ एव चायं विचारो दशशब्देन तु द्वंद्वेन कश्चिद्दोषः॥ ॥श्रीरामः॥

एवं प्रयोजनांतरमाह· तत्रायमपीति· द्वंद्वैकवद्भाव इति ग्रंथेन पक्षांतरगौरवं प्रदर्श्य तद्दूषयन्नाह· युगपदिति· न च विषये तेन यमार्थमित्यर्थः·
वस्तुतो द्वंद्वैकवद्भिन्नस्य सर्वो द्वंद्वो विभाषयैकवदिति वचनेन कार्यमित्येवार्थ इति न दोषः· न कश्चिद्दोष इति· एकादशादीनां नित्यबहुवचनांतत्वा
दिति भावः·

कै०कि०२०२ न केवलाप्रकृतिरिति समयाद्वचनमिष्यत एवात आह· द्विवचनमिति· उभयोः संख्यापरत्वे द्विवचने संख्येयपरत्वे बहुवचनं प्रा
प्नोति इष्यते त्वेकवचनमिति भावः· षष्ठीसमास इति· सहस्राणां शतमिति विग्रहः· संख्याया अल्पीयस इति शतस्य पूर्वनिपातः·
तदस्मिन्नधिकमिति सूत्रे भाष्ये ध्वनितमेतत्· भाष्ये स्तु तर्हि द्वंद्व इत्यस्य लोपीत्यर्थः· पूर्वं सिद्धं त्विति वार्त्तिकोक्ते स्तदभावक

वचनमिति· द्विवचनं बहुवचनं चेत्यर्थः· सिद्धं त्विति· शाकपार्थिवादित्वात्· शतसहस्रमिति· षष्ठीसमासः· सर्वो ह्रीति· ति
ष्यपुनर्वस्वोरित्यत्र बहुवचनग्रहणेनैतत् ज्ञापिते· लिंगमशिष्यमिति· सनपुंसकमिति न कर्त्तव्यमित्यर्थः॥ ॥

त्यने मानाभावात्· तिष्यपुनर्वस्वोरिति· एकविंशत्यादावितरेतरयोगस्तु न· अनभिधानादिति बोध्यं· द्वंद्व तत्पुरुषाभ्यां स्वरभेदश्चि
ष्यत एवेति केचित्· परे तु तत्पुरुषत्वे स्वरो न सिध्यतीत्याशंक्यास्तु तर्हि द्वंद्व इति भाष्योक्तेः स्वरभेदो नेष्टः· उपक्रमे कार्ये समासो रा०म०
द्वंद्व इति सिद्धान्ते त्वत्र द्वंद्व एवेत्येवार्थः· सिद्धं त्विति सिद्धान्ते केरेशमुक्तिरित्याहुः॥ ॥२६॥ ॥७॥ ॥ ७ ५६

८९५

उपसर्जनं पूर्वं॥ ॥विपर्ययप्रयोग इति· पदयोर्विपर्ययेण प्रयोग इत्यर्थः· सूत्रे प्रसारव्याने उत्तरग्रंथानुसारेण माशंक्याह· इ

उपसर्जनं पूर्वं॥ ॥परप्रयोगनिवृत्त्यर्थमिति· वाक्यवत्समासे पदानामनियते प्रयोगे प्राप्ते नियमार्थमे
तदित्यर्थः· न वेति· नित्येषु शब्देषु प्रयोगसंकरे स्थिते गव्यादिप्रयोगनिवारणाय दं शास्त्रं इह तु वि
पर्ययप्रयोगो नैव दृश्यत इ तिवृत्तन्निवृत्त्यर्थेन यत्नेनेत्यर्थः· इदानीमारभ्ये सूत्रे दोषमुद्भावयति
अथ यत्रेति· राज्ञः पुरुषस्येति द्वयोरपि षष्ठीति समासशास्त्रे प्रथमानिर्दिष्टत्वादुपसर्जनत्वात्
र्वनिपाताविनियमप्रसंगः॥ ॥

दानीमिति·॥ ॥श्रीराम॥ ॥कृष्ण कृष्ण कृष्ण॥ ॥श्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्री

वै०सि०२०२ नभिद्यते इति॰ वाक्यापेक्षया ऽप्रधानस्वरूपभेदवान्न भवतीत्यर्थः॰ तदाह॰ राजापेक्षया न व्यतिरिच्यत इति॰ व्यतिरेको ऽत्र भेदमूल
कसंबंध एवं च राजनिरूपितभेदनिबंधनसंबंधवान्न भवतीत्यर्थः॰ विशेषणनिष्ठ एव संबंध इति भावः॥ ॥परे तु षष्ठीसूत्रे ते
न समस्यत इत्यस्मिन्प्रत्यासत्त्या ऽयमनुवर्तते न समाससत्त्वनिरूपितसंबंधार्थकषष्ठी विगृह्यत इति तदेव षष्ठ्यंतं प्रथमानिर्दिष्टं
नप्रधानमिति॰ एवं चार्थात्पूरणगुणेति सूत्रस्य समानाधिकरणेनेत्यपि प्रत्याख्यातप्रायमेवं॰ समानाधिकरणेन षष्ठीसे

अर्थभेदादिति॰ उपसर्जनसंज्ञा ऽन्वर्थत्वादप्रधानस्यैव भवति॰ पुरुषश्चात्र राजापेक्षया प्रधानमेवेति पुरु
षार्थो न भिद्यते राजापेक्षया न व्यतिरिच्यत इत्यर्थः॰ न चेदमिति॰ अबुधभ्रांतिनिराकरणायाश्रितमेवेत्यर्थः॥ ॥

मासप्राप्तेः षष्ठीति सूत्रे प्रत्यासत्त्या ऽश्रयणादर्थाभेदादिति भाष्यस्यायमर्थः॰ अर्थस्य पुरुषस्य राज्ञा भेदाभावाद्राजनिरूपितभेदनिबं
धनसंबंधवत्त्वाभावात्॰ किंतु ऽनादिनिरूपितसंबंधवत्त्वादिति संबंधस्य विशेषणनिष्ठत्वादित्याहुः॰ यत्तु अर्थभेदादिति॰ अप्रधा राम०
नपदोपसर्जनपदयोरिति शेष इत्याहुः॰ तन्न॰ प्रथमानिर्दिष्टमिति सूत्रस्य भाष्यविरोधात्॰ बाह्यसंबंधिनिरूपिता प्राधान्यस्यात्रापि स ६०
त्त्वात्पूर्वकालसिद्धान्तयोः पर्यायतापत्त्या ऽप्रामाणिकत्वस्वीकारश्चेति॥ ॥३०॥ ३१॥३२॥३३॥

८१६

अल्पाच्तरं॥ ॥तरपः श्रवणाद्विचारानुपपत्तिमाशंक्याह॰ किमिति॰ तंत्रेतरनिर्देशो प्लक्षन्यग्रोधावित्यादिसिध्यर्थ यत्किंचिदपेक्षया
ल्पाच्त्वमतिशयस्तु पाजापेक्षया अतंत्रत्वेत्वस्त्वमेवो पाजापेक्षयेति बोध्यं॰ अत एव शंखदुंदुभिवीणानामित्यस्य सिध्यपेक्षे त

अल्पाच्तरं॥ ॥किमयमिति॰ किं तरबर्थः प्रकर्ष आश्रीयते अथ स्वार्थ एव निपातनात्तरः कृत इति प्रश्नः॰ द्वयो
रिति॰ प्लक्षन्यग्रोधावित्यादावेव स्यात्॰ न्यग्रोधशब्दस्यात्यल्पाच्त्वात्॰ तदपेक्षया प्लक्षशब्दस्याल्पाच्तरत्वात्॰ ब
हुषु तु सन्निहितेषु द्विवचनोपपदत्वाभावात्तरपो नुत्पत्तिरिति तत्राभियमप्रसंगः॰ ततश्च शंखदुंदुभिवीणानां
मित्यत्र दुंदुभिशब्दस्यापि कदाचित्पूर्वनिपातः स्यात्॰

त्रोत्पन्नः॰ द्वयोरित्यस्याविवक्षा वदतिशयस्याप्यविवक्षोचितत्वात् इत्याहुः॰ आद्ये दुंदुभिशब्दस्यापीति॰ न चैतत्सत्त्वाभावेपि द्वंद्वघटकस्य
प्रवृत्त्या दुंदुभिशब्दस्यैव पूर्वनिपातः प्राप्नोतीत्यपि रसंगत इति वाच्यं॰ पूर्वयोः द्वंद्वे कृते तेन वीणाशब्देन द्वंद्वे तस्य पूर्वनिपाताप्राप्त्या तदुक्तेः॰
ततश्च नियमस्याह॰ कदाचिदिति॰

कैं०वि०२०२

अथातंत्रमिति भाष्याशयमाह· अतंत्र इति· अल्पाच्त्वेति· परत्वादस्यैव प्रवृत्तेरिति भावः॥ मृदंगशंखतूणवा इति· पक्षद्वयेपि भाष्योक्तरीत्यैव साध्यं· अतंत्रपक्षे त्वारोपितातिशयेतरपूपारायणे दृष्टार्थः स्वरितादित्सूत्रेनुदात्तानामिति बहुवचननिर्देश

अतंत्रे तु तरपि दुंदुभिशब्दापेक्षया अल्पाच्त्वसद्भावाद्वंशखवीणशब्दयोरन्यतरस्य पूर्वनिपातो भवति न तु दुंदुभिशब्दस्येति दोषाभावः॥ मृदंगशंखतूणवा इति· शंखशब्दस्याल्पाच्त्वात् पूर्वनिपातः प्राप्नोति· तंत्रे तु तरपि पूर्वोक्तेन न्यायेन बहुष्वनियमादेतद्रूपं सिध्यति· यदेतादिति· तंत्रे दोषप्रसंगात् प्रयोजनाभावात् तरनिर्देशो न कर्तव्य इत्यर्थः· अतंत्रे तु तस्मिंस्तरपः स्वार्थिकत्वज्ञापनमेव तरनिर्देशस्य प्रयोजनं॥ ॥

वद्·तंत्रे तरनिर्देशे बहुषु नियमाय भाष्ये उक्तं· आत्स्यामिति वक्ष्यामीति· यतः कृतश्च सर्वस्याप्यल्पाच्त्वात्सामर्थ्यादतिशयप्रतीतिरेवं चद्वयोरित्यंशाभावात् शंखदुंदुभीत्यादिसिद्धिः· एवं च द्वयोरित्यंशत्यागपूर्वकमतिशयो विवक्षित इति तात्पर्यं· मृदंगेत्यादौ तरपाणो समासे तु शंखस्यैव पूर्वनिपात इति बोध्यमिति परे· राम० ६१

८१७

नियतद्रव्येति· जातिप्राधान्ये हि तदाश्रितसर्वव्यक्तीनां विनिगमनाविरहेणान्तरीयकत्वाद्बोध इति भावः· तदालक्षणेति· एतदुदाहरणावच्छिन्नभित्तज्ञात्यवच्छिन्नैकैकव्यक्तिस्वरूपाचारितार्थत्वात् एकस्य युगपदवधिद्वयावधिभंगाप्रसंभवाच्चैतस्यावधित्वे एकस्यैव

शंखतूणवादीति· नियतद्रव्यविवक्षायां जातिपरत्वाभावादेकवद्भावाभावः· तूर्यांगानामित्यपि न भवति· शंखस्यातूर्यांगत्वात् इत्येके· तूर्यशिल्पोपजीविनएव तूर्यांगत्वेन गृह्यंते· तेषां हि मुख्यं तूर्यांगत्वमित्यपरे· अथ यत्रेति· यदि जातिपदार्थपक्ष आश्रीयते तदालक्षणत्वस्याभावादेकस्यैव नियमे सति शेषाणामनियमेन भाव्यं· अथ व्यक्तिपक्षस्तदा पुनः पुनर्लक्षणप्रवृत्त्या सर्वेषां नियमेन भाव्यमिति भावः पृच्छति· उत्तरं तु लक्ष्यदर्शनवशाज्जातिपक्षाश्रयं· छि उद्गयनस्यावित्यि उत्तरायणस्यो· लौकिकप्रयोगदर्शनपरमिदं· मातापितराविति· गर्भधारणादिना पित्रपेक्षया मातात्र

वचनाच्च पुनस्तत्रैवाप्रवृत्तेरिति भावः· व्यक्तिपक्ष इति· एतदुदाहरणावच्छिन्न तत्तद्व्यक्तिविषयकलक्षणभेदेन तेषामचारितार्थ्यात्पुनः प्रवृत्तिरस्त्येवेति भावः· वस्तुतो वाचनिकमेवेदं· जातिपक्षेप्याकृत्यभिन्ने तज्जात्याश्रयसर्वविषयकत्वसंभवात्· उद्गयनस्याविस्स्यानुपयोगादाह· लौकिकेति·॥ ॥

कै०वि०२०२ वेददर्शनेति। ब्राह्मणोस्य मुखमासीदित्यादि वेददर्शनं। अल्पीयस्त्वाद् इत्यनुचितमत आह। अर्थस्येति। एतच्चेति। अत एवतत्सूत्रोक्तात्वेकादशोत्यैव बहुव्रीहौ द्वित्राः इत्यादिसिद्धिश्चेत्याहुः॥ ॥३४॥ ॥सप्तमी॥ ॥यदा विश्वस्येति। देव इत्युपक्रमे तस्य तत्संभवः। विश्वं दे

श्रद्धामेधे इति। सत्यां श्रद्धायां मेधा क्रियाकारिणी मेधेति श्रद्धाया अभ्यर्हितत्वं। लघ्वक्षरादपीति। पूर्वविप्रतिषेधेन। दीक्षातपसी इति। दीक्षार्थं तपश्चरणमिति दीक्षाया अभ्यर्हितत्वं स्वरूपेण वा। वर्णानामिति। वेददर्शनाश्रयेणोत्पत्तिक्रमेण वर्णानामानुपूर्व्यं। अल्पीयस इति। अर्थस्य वाचिकाया इति शेषः। एतच्च द्वंद्वविषयमित्याहुः। द्व्येकयोरिति तु सौत्रो निर्देशः॥ ॥ सप्तमी॥ ॥विश्वदेव इति। यदा विश्वस्य विशेष्यत्वं तदेदमुदाहरणं विशेषणत्वे तु सूत्रेणैव सिद्धः पूर्वनिपातः। द्विपुत्र इति। दिक्प्रदर्शनमेतत्। अत्र हि विशेषणत्वादेव सिद्धः संख्यायाः पूर्वनिपातः तस्मात् द्विशुक्ल इत्याद्युदाहरणं। परत्वात्संख्याया इति। शब्दपरविप्रतिषेधात्। एवमर्थमेव च संख्या सर्वनाम्नोरिति न कृतं॥ ॥ ॥

वोपस्येति विग्रहः नसंज्ञायामिति कप्प्रतिषेधः। न। द्विशुक्ल इति। द्वौ शुक्लगुणकौ यस्येत्यर्थः। अत्र हि द्वयोर्गुणवाचित्वादनियमो विशेषणत्वस्य पुत्रभार्याशब्दावपि गुणवचनाविति भाष्याशयः। जन्यपुंस्त्वधर्मयोगः स्त्रीत्वयोर्गुणत्वोदित्यन्ये॥ ॥३५॥ ॥राम०

डाक्टर भाऊदाजी इत्यासां स्मारकम्
BHAU DAJI MEMORIAL

राम० ६२

८१८

कै०वि०२०२ निष्ठा॥ ॥यदयमिति भाष्ये। बहुव्रीहौ आच्छादनभिन्नजात्यादिभ्यः परमुत्तरपदं क्तांतमंतोदात्तं क्तादीन् न नञ्पूर्वत्वेति सूत्रार्थः॥ ॥३६॥ ॥ ॥३७॥ ॥कडाराः कर्मधारये॥ ॥कडारशब्दस्येति। बहुवचनसामर्थ्यादजहल्लक्षणया छत्रिण इतिवदाश्रयणीयेत्यर्थः॥ ॥छ॥

निष्ठा॥ ॥प्रतिषेधेत्विति। अकृतमितप्रतिपन्ना इति क्तादीनामंतोदात्तत्वप्रतिषेधादंतोदात्तविधानाद् ज्ञापितः परनिपातोपि न स्यादित्यर्थः। नवेति। उत्तरपदांतोदात्तत्वेप्रसक्ते प्रतिषेधः क्रियते यदि च परनिपातः ततस्तत्प्रसंगो नान्यथा॥ ॥कडाराः॥ ॥बहुवचननिर्देशादिति। कडारशब्दस्यैकत्वादेकवचने कर्तव्ये साहचर्यादारोपितकडाररूपगडुलादिशब्दगतबहुत्वापेक्षो बहुवचननिर्देशो यथा छत्रिणो यांतीति॥ ॥३८॥ ॥छ॥ ॥छ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य द्वितीयपादे द्वितीयमाह्निके पादश्च द्वितीयः

॥ ॥३८॥ ॥इति शिवभट्टसुतसतीगर्भजनागोजीभट्टविरचिते भाष्यप्रदीपोद्योते द्वितीयाध्यायस्य द्वितीयपादे द्वितीयमाह्निकं ॥ ॥पादश्चायं द्वितीयः समाप्तः॥२॥ ॥श्रीराम॥ ॥छ॥ ॥श्रीकृष्ण॥ ॥शुभमस्तु॥ ४६० ॥दुर्गायै नमः॥

राम० ६३

८१९

इति द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः

अथ द्वितीयाध्यायस्य तृतीयपादप्रारंभः

के०वि०२०३ श्रीगणेशायनमः॥ ॥अनभिहिते॥ ॥स्ववाच्येति॰प्रयोजक कर्त्रेत्यर्थः॰करणभूतये त्यर्थो वा स्वशब्देनारंभवादी स्वरूपार्थयोः प्रसि

श्रीगणेशायनमः॥ ॥अनभिहिते॥ ॥प्रत्याख्यानवादी स्ववाचानभिहितशब्दार्थमारंभवादिनं संजल्पयितुं पृच्छति॰किमिद(ं)
मिति॰ अभिहर्वस्तावद्धातिर्बंधनोच्चारणप्रतिपादने षु वर्त्तते अभ्याभिधानीमादत्त इत्यत्र बंधनवृत्तिः अभिहितःश्लोक इत्युच्चारण
वृत्तिः अभिहितोर्थ इति प्रतिपादनवृत्तिः हिनोतेरपि गति वृध्यर्थस्याभिहितमिति भवति॰ तत्र वक्ष्यमाणानां कर्मादीनामर्थानां बं
धनार्थ चतुष्टयासंभवात्प्रतिपादनवचनएवाभिहितशब्द आश्रयणीयः ततः प्रयोजनाभावादनर्थकं सूत्रमिति भावः॰ पूर्वोक्तेनाभि
प्रायेणाह॰ उक्तमिति॰ प्रतिपादितमित्यर्थः॰ यथा उक्तार्थानामप्रयोग इति यावद्रूपादिति॰ यावत्तावद्वृत्ते निपाताविभिन्नार्थत्वं प्रति
पादयतः अभिहितवचनमिति॰ अर्थप्रत्यायनायलोके शब्दः प्रयुज्यते सच्चार्थो यदा शब्दांतरेण प्रतिपादितो भवति तदा प्रयो
जनाभावात् शब्दांतरस्य प्रयोगेण न भाव्यं॰ आक्षिनिकोचादिभिरप्यवगतेर्थे शब्दो न प्रयुज्यते॰ किंपुनः शब्दांतरेण प्रतिपादितेर्थे॰ रा म०

द्वत्वेपितस्यानेकार्थत्वात्सिद्धं त्वभिमतमर्थं तन्मुखेन वाचयितव्यास्सूत्रं प्रत्याख्यातुं प्रश्न इति भावः॰ अर्थचतुष्टयासंभवादिति॰ तद्विषयत्वासंभवादित्य १
र्थः॰

८२०

सं२

भाष्ये विहितस्याभावादभिहिते इति॰ लौकिके प्रयोगे लाघवानादरेण भवत्येव तथा प्रयोगः॰ विहितस्य तु नेत्याशयेन तदुक्तं न संभव
तीति॰ताभ्यामिति शेषः कृत्यापित्तद्धितस्यान्यापेनोत्सर्गभावाघ्नर्थविशेषणमत आह॰ उत्सर्ग इति॰ विरोधकाभावादिति॰ परदेशरोध

यमस्त्यामिति॰ यमंतेनांतेन चेत्यर्थः॰ यन्नोस्तुलुप्तत्वादर्थाभिधानं न संभवति॰ न्याय्योत्पत्तिरिति॰ उत्सर्गः पूर्वाचार्यप्रसि
द्धान्याय्य उच्यते बहुवचनोदाहरणं गार्ग्यो गार्ग्याविति तत्र यञो वपरदेशस्याव वृध्धत्वादणुत्पत्त्यभावात् बहुवचने तु यञो लु
प्तत्वाद्विरोधकाभावादुक्तार्थानामप्रयोगेणाणुत्पत्तिः प्रतिपाद्या सप्तपर्ण इति॰ वीप्सायां विषये द्विर्वचनमुच्यते अस्ति चेह वीप्सा स
प्त सप्त पर्णान्यस्येति समासे न तु शब्दशक्तिस्वाभाव्याद्वीप्सावगमितत्वाद्द्विर्वचनाभावः आरंभवादी दूषयति अन्यथा साध्यसिद्धिं प्र
तिपादयितुमाह॰ यत्नावदिति॰

काभावादित्यर्थः॰ अण इति॰ इमुदे पलक्षणमिन्न इति बोध्यं॰ सप्तपर्णशब्दे समासेद्विस्वाभावात्कथं वीप्सावगतिस्तत्राह॰ सामासेन सिति॰ ननु स
र्वथोक्तार्थानामप्रयोग इति न्याये सति सूत्रारंभानुपपादनात्किंप्रयोजनविदितिग्रंथेनात आह॰ आरंभवादीति॰ तथा च तन्न्यायफलाभावेन तन्न्याय
सत्वेन मानमित्यभिमानः॰

कैं०वि०२०३ भाष्ये न चात्रास्तिनेति। वर्त्तिपदार्थानामन्यपदार्थेन संसृष्टत्वात् पृथक्त्वाभावेन बहिर्भूतास्तिसामानाधिकरण्याभाव इति भावः। यत्तु कैयटेना स्वार्थस्य तत्रैवान्यपदार्थे एवान्तर्भूतत्वादित्युक्तं तदनुपयुक्तं बहुव्रीहावस्वार्थानं तर्भावस्यम तु प्रसक्तेर्भाष्ये उक्तत्वात्। तत्र हित द्धितार्थद्विगुवपेक्षया पंचगुरित्यादौ बहुव्रीहेरंतरंगत्वमुक्तं विशिष्टस्य षष्ठ्यर्थस्य तद्धितार्थत्वादस्वार्थौ वश्यापेक्ष्यो द्विगुत्वो। षष्ठ्यर्थमा

न चात्रास्तिनेति। वर्त्तिपदयोरन्यपदार्थउपसंक्रांतत्वादस्वार्थस्य तत्रैवांतर्भूतत्वात्स्वार्थस्य संसृष्टत्वादस्तिसामानाधिक रण्याभावः। यदा त्वन्यपदार्थेनन्तद्भूता प्रतिपिपादयिषितास्तदा चित्रगुमानितिभवत्येव। न चैतदिति। समर्थानां प्रथमादस्य धिकारादपत्यवद्वाचिनः षष्ठ्यंतात्सत्यमेन भाव्यं न त्वपत्यवाचिनः। यत्र गोस्तुलुकि कृते प्रकृतिरेवापत्यार्थाभिधायिनीति अत एव भवतीत्यर्थः। यदत्रेति। वीप्स्यमानार्थाभिधायिनः पदस्य द्विर्वचनं विधीयते पदार्थस्य च वीप्स्यायोगान्न चात्र पर्वशब्दस्य प्रयोगः

त्रापेक्षस्तु बहुव्रीहिरिति कैयटः। स्वार्थस्य संसृष्टत्वादिति। अन्यपदार्थेनेति शेषः। स्वार्थो वर्त्तिपदार्थः। अत्रोपसंक्रांतत्वं हेतुः सन्नि यमेन विशेषणत्वं। भाष्ये द्वितीयमर्थमुपसंक्रांतमिति तस्य तस्याप्यसमिति सत्यस्य द्वितीयपदवाच्यमर्थमित्यर्थ इत्याशयेनाह। सम र्थानामिति। न चात्रेति। सप्तपर्णशब्दस्तु तादृशो वृक्षविशेषे रूढ इति भावः। भाष्ये पंक्तौ पंक्ताविति। अष्टापदं शारिफलमित्यमरः॥ ॥ रा म० २

८२१

भा व २

पूर्वाचार्येति। स्वमते तु विकरणं द्योतकम् इति अभिमानः। वस्तुतो बहूकचोरविद्योतकत्वात् द्योतकविषयेप्यपंन्यायः द्योतकविषयेपि एके न द्योतिते उक्तार्थानामिति न्यायेनापरद्योतकौ इति बोध्यं। भाष्यकारस्त्विति। येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवाद इति लक्षण

स्यमोक्तत्वादिति। भावकर्मकर्त्तारो विकरणार्था इति पूर्वाचार्यदर्शनमाश्रित्येदमुक्तं अत्राप्यन्यथासिद्धिमाह। तन्त्विति। ततश्चो क्तत्वस्य दृष्टांताभावाद्धेतुत्वं नानादेशत्वादिति। विरोधो बाधकारणं न विशेषविधानमेव वार्त्तिककारस्य चेदं दर्शनं। भाष्यकारस्तु विरोधाभावेपि विशेषविधानमात्रेणैव बाधकत्वमन्यत्राबोचत्। तत्कदानं यदधिदानस्य विरोधाभावेपि लोके बाधकं दृश्यते तदेव अमादिदृष्टांतावष्टंभेन हेतुत्वमुक्तस्यस्यापितं इदानीमारंभवादीपक्षांतरमाश्रयिष्यामीति पृच्छति। किं पुनरिति। आहोस्विदत्रेति। अदूषी द्वावित्यभिहितेपि प्रत्ययेन द्वित्वे द्विशब्दस्य प्रयोगदर्शनात् अमादिभिरभिहिते शबादिनिवृत्त्यर्थः कर्त्तव्यः सन्नित्यर्थः॥ ॥

नुसारेण तत्र कौंडिन्यन्यायमूलकेन सत्यपि संभवे बाधनमिति तद्भावः तन्मतेप्ययं न्याय आवश्यकः। यथोक्तसमासेनाभिहितः सुजर्थे इ निद्विदशाइत्यादौ सुज्वेति। इदानीमिति। दृष्टांतानामन्यथासिद्धिपरिहारेजात इत्यर्थः।

कै॰वि॰२०३ अन्यस्य त्विति· शास्त्रविते हि स्येत्यर्थः· लौकिके प्रयोगे लाघवानादरादिति भावः· एवमेवव्यातिलुनीतइत्यत्रापि समावेशः· तत्र पूर्वेभा
स्तने पदं ततः स्यष्टं तस्त्रीतीतयेभानि प्रयोगोपि· अपूर्वाविलत्राद्विवचनं तु विरुद्धमित्यपेक्षयानुवादकविभक्तेर्न्याय्यत्वात्कृतं विहितं न
स्यात्· न भवितुमर्हतीत्यर्थः· अर्हे कृत्यतृचश्चेति चादर्हे लिङ्· एकत्वादीनामिति· संख्या वाक्यविभक्तिद्वेविधानयोरेकवाक्यत्वपक्षे
एकत्वादीनां विशेष्यत्वमवलम्ब्येत्यर्थः· आदिना द्वित्वादि· तदाह· कर्मणीति· एकस्य पदिति· एकत्वस्याप्रयोगत्कर्मेत्यर्थः· अनेकयोरिति

प्रत्याख्यानवाद्याह· इहाकर्तुमइति· अपूर्वो द्विवित्यादौ तु गतार्थस्यापि शब्दस्य लोके प्रयोगो दृश्यते· अन्यस्य तु गतार्थस्य प्रयोगाभावः द्वि॰
प्रयोजनाभावादेव सिद्धः· इदानीमेकत्वादीनां विभक्त्यर्थत्वमाश्रित्य सूत्रं समर्थयितुमाह· अनभिहितत्विति· कर्मणि द्वितीयेत्यादेर्बहु
षु बहुवचनमित्यादिनैकवाक्यता· तत्रायदैकत्वादीनि विशेषणानि कर्मादीनि विशेष्याणि· एकस्यत्कर्मत्वाद्द्वितीयैकवचनमिति तदा
कर्मद्वितीयार्थः संपद्यते·

षष्ठीति भावः· परं त्विदं चिंत्यं· बहुच्छित्यत्र सप्तमी दर्शनेन ह्येकयोरित्यस्यापि सप्तमीत्वोचित्यात्· तस्मात्प्रातिप राम॰
दिकार्थस्यैकत्वे सति तत्कृतकर्मशक्तौ द्वितीयैकवचनमित्यर्थमुचितः· अपंच संख्यांते चतुर्थः प्रातिपदिकार्थ इति पक्षे· त्रिकपक्षे तु कर्मणि द्वि
तीया भवतीत्येवार्थो स्य सूत्रस्य ततः कर्मण एकत्वे तदेकवचनमित्यर्थः संख्याबोधकस्य इदमेवाभिप्रेत्याग्रे एतन्मते कर्मण एकत्वे इत्यादिके ३
मेणार्थं दर्शयिष्यति भगवानित्याहुः·

८२२

नार्थ इति· प्रधानार्थस्योक्तत्वेन विशेषणीभूतार्थो नुक्तावपि तेन न्यायेनातिप्रसंगविरहात् तन्मात्रबोधनस्य प्रथमयासिद्धत्वाच्चेति भावः

त्वमेक…

तच्चयदाकृदादिभिरभिहितं भवति तदागतार्थत्वात् द्वितीयायाः प्राप्तिरेव नास्तीति नार्थो नभिहिताधिकारे
ण· यदा तु कर्मादीनां विशेषणत्वादीनां विशेष्यत्वं कर्मण्येकत्वादि तत्र द्वितीयेति तदेकत्वादयो विभक्त्य
र्थाः संपद्यंते तेन चाभिहितेष्वपि कृदादिभिः कर्मादिष्वनभिहितत्वादिति तदभिधानाय द्वितीयादीनां प्रसंगे तन्नि
वारणाय कर्तव्यो नभिहिताधिकारः· कर्मणि द्वितीयेत्यादौ कर्मादीनां श्रुतत्वात्तेषामेव विभक्त्यर्थत्वेन न्या
य्यमिति मत्वा प्रकृति· कः पुनरिति·॥ श्री ॥श्रीश्रीराम॥ श्री ॥श्री श्री श्री श्री श्री श्रीरामराम·

तदभिधानायेति उक्तार्थानामिति न्यायस्तु प्रधानार्थविषय इति भावः· तेषामेवेति· तथा च संख्याया विभक्त्यर्थत्वमसंभावितमिति भावः

वै०वि०२०३ सप्तमीनिर्देशा इति· ननु द्वितीयायाः सूत्रेश्रुतत्वात्तदपेक्षैव सप्तमी उचिता न त्वेकत्वापेक्षया· किंच संख्यायाः प्रायेण विशेषणत्वस्यैव दृष्टत्वादेकत्वविशिष्टे कर्मणीत्येवार्थ उचित इति चेन्न· कारकस्य प्रातिपदिकार्थत्वेन तत्र विधानानुपयोगात् शुद्धनियमार्थत्वापेक्षया एकत्वविशेषणतया विधित्वद्वारा अर्थनियमस्यापि सिद्धिरिति विधित्वापत्त्यैवान्वय उचित इत्याशयात्· तत्र पक्षे यथा प्रातिपदिके नोक्ते द्वितीयादयो भवंति तथा तत्रापि अभिहितेपि स्युरित्येतदर्थं सूत्रं आवश्यकः एकत्वादय इत्यस्यत्तेएवेत्यर्थः· एवं च संख्यारहितं चतुष्कं प्रातिपदिकार्थ इति पक्षे सूत्रमावश्यकमुत्सृष्टं भवति· तदितरपक्षेषु च न कर्त्तव्यमिति· पंचकपक्षेपि सूत्रमावश्यकमिति बहुधाप्रति सूत्रेभा

एकत्वादय इति· कर्मणि द्वितीयेत्यादि सप्तमीनिर्देश एकत्वाद्यपेक्षः कर्मणि पदे कत्वादितत्र द्वितीयेति न त्वभिधेय प्रतिपादनाय·॥·

ष्यकैयटयोः स्पष्टं· पंचकपक्षे सुपां द्योतकत्वाद्वचकद्योतकयोर्द्योतकयोश्च समुच्चयेपि दृष्टत्वादन्याभिहितेपि स्यादतः सूत्रमावश्यकः वस्तुतस्तु एकत्वादयो विभक्त्यर्था इत्यस्य सूत्रे प्राधान्येन विभक्तिद्योत्यत्वेन बोधिता इत्यर्थः एवं कर्मादयो विभक्त्यर्था इत्यस्यापि मद्योपि द्योतकविषयोक्तिर्चिह्नर्बहुष्वसु बहुमितन्यायेन समावेशो दृष्टस्तथापि प्रकृते तत्लक्ष्यानुसारादुक्तार्थानामिति वाश्रीयते· परं तु अयं न्यायः सूत्रोक्तप्रधानविषय इति भावः उक्तार्थानामिति न्यायस्य द्योतकविषयेपि संचारो दृश्यते धिपरीतिस्तत्रेभाष्ये अपृपोद्धविसत्वादौ व्यभिचारश्च तत्रैवोक्तः॥ रा०म० ४

८२३

ननु प्राधान्यादेकत्वादीनामेव निमित्तत्वं न कर्मादीनामत आह· कर्माद्यभिहितानामिति· माभूवन्निति· वाक्यसमाप्ताविति शब्दः भाष्येतेष

निमित्तत्वायेति· कर्माद्यभिहितानामेकत्वादीनामपि विभक्त्यर्थत्वेपारं पर्येण कर्मादीनां निमित्तभावोस्त्येवेत्यभिप्रायेणैतदुक्तं· अभिहित इति· यदा वक्ष्यमाणनो कर्मादीनां विभक्त्यर्थत्वं तदा प्रातिपदिकार्थेनापि प्रथमार्थे सभाव्यं तस्य च प्रातिपदिके नैवोक्तत्वाद्दृष्टे इत्यादौ प्रथमा न प्राप्नोति· एकत्वादीनां तु विभक्त्यर्थत्वेन तदभिधानाय प्रथमा प्रवर्त्तत एवेति दोषाभावः प्रत्याख्यानवाद्याह· न कश्चिदिति· न च नसामर्थ्यात्प्रातिपदिके नोक्तेपि तदर्थे प्रथमा भविष्यति· द्वितीयादयस्त्वनभिहिते कर्मादौ सावकाशत्वादभिहिते न भविष्यंति॥ ॥

भिहितेषु सामर्थ्यादिति· सामर्थ्यमत्रोक्तार्थानामप्रयोगस्वरूपं स्वपेक्षेनायं दोष इत्याह· एकत्वादीनां त्विति· द्वितीयादिषु वैषम्यं दर्शयति· द्वितीयादयस्त्विति·

Dr. BHAU DAJI MEMORIAL

कै०वि०२०३ अनभिहितैकत्वाद्यभिधानाद्येति॰ प्रातिपदिकार्थसूत्रे उपस्थितानभिहित इत्यस्य प्रातिपदिकार्थविशेषणत्वासंभवेनैकत्वादिविशे
षणत्वमिति भावः॰ कर्तुरेकत्वमिति॰ येपि क्रियायामेवेति॰ कारकगतसंख्यामारोप्य तत्रैवेति॰ अर्थसंख्यान्वय इति यदंतितेषाम
पि आरोपमूलत्वया साक्षप्रायेवेति बोध्यं॰ अन्यथा तिङर्थाश्रयगताया उक्तत्वेपि चैत्रत्वविशिष्टरूपनामार्थगताया अनुक्तत्वेन
तदसंगतिरेव स्यात्॰ न च क्रियायाः स्वलए कत्वेन तदारोपानपेक्षत्वेन कर्तृगतैकत्वस्य कथमुक्तत्वं तस्यापि साधनेच्छिता...

तिङोक्तादिति॰ अनभिहितैकत्वाद्यभिधानाय तत्र विभक्तिविधानं पचतीति च कर्तुरेकत्वे तिङाभिहितमिति प्रथमान
स्यादित्यर्थः॰ परिगणनं चेति॰ तिङ् कृत्तद्धितसमासैरित्येतत्॰ अत्र च तिङास्यैकत्वस्याभिधानमिति प्रथमाया अप्रसंगः॰

बुद्धिनिमित्तकेन तदनारोपेसत्वात् अन्यथा पचत इत्यादौ द्विवचनाद्यनापत्तिः मम तु आरोपितयाप्युत्तरसंख्यया पूर्वसंख्याया बाधान्न
दोषः॰ आवृत्तिगतसंख्यारोपेण सहस्रदक्षिणत्वादिवत्॰ एवं च द्वित्वाद्यभान बुद्धौ द्रव्यस्य निःसंख्यत्वाभावेन साधनैकत्वमवगत रा.म०
मेवेति भाष्याशयात्॰ ननु तिङ् सुपोर्युगपत्प्रवृत्तेर्वक्तुं शक्यत्वेन तिङोक्त इत्यसंगतमत आह॰ भाष्ये परिगणनं चेति॰ तथा च ति
ङ्कृदित्यादि परिगणनं बोधितापवादविषयपर्यालोचनायाति उत्सर्गप्रवृत्तिः इत्यर्थः॥ ॥श्रीः॥ ५

८२४

अस्तिर्भवंतीपर इत्यस्य न्यायसिद्धत्वमाह॰ सर्वत्र चेति॰ द्व्येकयोरिति सूत्रस्यान्यत्र सावकाशत्वात् तस्मान्यासिद्धिमाशंक्या
ह॰ प्रातिपदिकार्थसूत्रेणेति॰ अभिहिते प्रथमाभाव इति भाष्यस्याभिहिते प्रथमाया भानस्य प्रवृत्तेः स्वमांगीकारादिस्य

आरंभवाद्याह॰ न कश्चिदिति॰ सर्वत्र च पदमपेक्षितक्रियापदमेव प्रयुज्यते॰ उच्यते चेति॰ प्रातिपदिकार्थसूत्रेणेत्यर्थः॰
भवंतीपर इति॰ लट्पर इत्यर्थः॰ तन्नश्च व क्ष इत्सत्रापि तिङैकत्वस्याभिधानादनवकाशत्वान्निङाभिहिते पवैकत्वादौ प्र
थमा भवति॰ एवमारंभवादी स्वपक्षे दोषं परिहृत्य परपक्षे तमुद्भावयति॰ नवेवेति॰ भीष्ममिति॰ भीष्मादिविशेषणविशिष्टस्य
कटस्य करोतिक्रियपेक्षितनमत्वात्कर्मत्वं तत्र च कटशब्दादुत्पन्नया द्वितीययाभिहितमिति भीष्मादिभ्यो द्वितीयाया अप्रसंगात्
प्रथमा प्राप्नोति॰ आरंभवादिनस्तु परिगणनारंभात् कटशब्दादुत्पन्नया द्वितीययाभिहितेपि कर्मणि भीष्मादिभ्यो द्वितीया सिध्यतीति

र्थः॰ भाव्यादीनामपि कर्मत्वाभक्षणं प्रथमाप्राप्तिरत आह॰ विशेषणविशिष्टस्य कटस्येति॰ प्रधानगतकर्मत्वोक्तौ विशिष्टगतमपि
तदुक्तमेव विशिष्टस्य नदयेस्ययातिरिक्तत्वाभावादिति शंक्या किंतु रभिमानः॰ आरंभे दोषाभावमाह॰ आरंभवादिन स्विति॥ ॥

कौ०वि०२०३ सामर्थ्यादिति॰ भीष्मादिपदानामपि द्वितीयोत्पादकसामर्थ्यसत्वादित्यर्थः॰ विशिष्टस्य कर्मत्वे विशेषणस्यापि द्वितीयोत्पादककर्मत्वश
क्तिरूपसामर्थ्यवत्वं अन्यथा विशिष्टे कर्मे युक्तिव्याघातः॰ तच्च न कटपदोत्तरद्वितीययाभिहितमिति भावः॰ तदाह॰ तत्र च यथेत्यादिना
विशिष्टगतैककर्मत्वप्रतिपादने क्रियमाणे प्रयोगस्त्वप्रतिपादनं च नोभयत्र द्वितीयां विनेति भावः॰ अत्र पक्षे भीष्मपदात् कर्मत्वाद्यना

कर्मविशेषत्विति॰ भीष्मादिपुक्तकटसंबंधिकर्मत्वं प्रतिपाद्यं॰ तत्र च यथा कटशब्देन भीष्मत्वादीनामनभिधानात्तदभिधाना
य भीष्मादिशब्दप्रयोगस्तथा द्वितीयापि तेभ्यो भविष्यति॰ न ह्यन्यथा तद्विशिष्टत्वेन कटस्य प्रत्याययितुं शक्यते॰॥ ॥श्री॰

लिंगितपदुद्गुणस्यैवोपस्थिति रितरस्य तद्विशिष्टप्रतीतौ पश्चाद्विशिष्टस्यैककर्मत्वशक्तिमत्तयोपस्थितिस्तथोपस्थितौ च भीष्मादु
त्तरद्वितीयापि सहकारिणीति तात्पर्यं॰ तदाह॰ न ह्यन्यथेति॰ तद्विशिष्टत्वं कटस्य स्वेतरविशिष्टस्य कर्मत्वं चेति शेषः॰ यथा कटं करोती रामः
त्यत्र विशिष्टकर्मत्वेन प्रतीयते एवं भीष्मः कटं करोतीत्यत्रापि विभिन्नविभक्तित्वाद्विशिष्टाप्रतीत्या तत्र प्रतीयत इति भावः॥ ॥श्री॰ ६

८३५

पश्चादिति॰ तथा च न विशिष्टस्य कर्मत्वं किंतु क्रियायां कर्मत्वेनान्वितयोर्मनसा विशेषणविशेष्यभावबोध इति भाव इत्येके॥ ॥
परे तु साक्षात्फलाश्रयादेरिव द्रव्यद्वारा फलाश्रयादेरपि कर्मत्वादिकमेवं च भीष्मस्यापि पृथक्कर्मशक्तिविशिष्टस्यैव बोधनं भीष्मप
दात् द्रव्येणाभेदान्वयात्तु तस्याः शक्तेर्नीकार्यबोधे विशिष्याग्रहः॰ भीष्मकटयोर्बोधश्च विशेषणविशेष्यभावेनैककारककाले भा
वेनान्वय इत्यस्य च साक्षात्त्वशक्तिनियामकाश्रयद्वारा नेत्यर्थान्नतद्विरोधः॰ न देवध्वनयन्नेयट आह॰ क्रियायां पृथक्सर्वेषां कर्म

त्वं वेति॰ यद्यत्करोति क्रियया तदिष्टतमं तत्सर्वं कर्म द्रव्यं गुणश्च न ह्यसौ कटमात्रेण संतुष्यति॰ तत्र क
रोतिक्रियायां पृथक्सर्वेषां कर्मत्वे प्रत्येकं द्वितीयोत्पत्तिः॰ पश्चात्तेकवाक्यतया विशेषणविशेष्यभावः॰

त्वे प्रत्येकं द्वितीयोत्पत्तिः॰ पश्चात्तेकवाक्यतया विशेषणविशेष्यभाव इति॰ पश्चादित्यस्य द्वितीयोत्पत्त्यनंतरमित्यर्थः॰ अक्षरस्वारस्यात॰
पृथक्सर्वेषां कर्मत्वे इत्यस्य च साक्षात्परंपरया वेति शेषः॰ द्रव्यगुणयोः करोतिना संबंध इत्यत्रापि स एव शेषः पूरणीयः॰ संबंधश्च तदर्थ
फलाश्रयत्वरूपः॰ एतेनात्र पक्षे प्रथमं सर्वेषां भावनान्वयः पश्चात्सार्थिकः परस्परं मनसा विशेषणविशेष्यभावबोध इति परास्तं॰ ज्ञा
नद्वयकल्पनागौरवात् ज्ञानं तु मनाक्चैकवाक्यतेति कैयटेन शाब्दस्यैव विशेष्यविशेषणभावस्य स्वीकाराच्चेत्याहुः॥ ॥रामराम॥

कै०वि०२०३ क्रियांतरे॰ तद्विशेषेऽध्यासनशयनादिरूपे॰ ईप्सिततमत्वादिति॰ साक्षात्क्रियान्वय्येव ईप्सिततमं एवं करणसंज्ञापि साधकतमत्वाद्द्रव्य
स्यैवेत्यादि बोध्यं॰ परं त्विदं चिंत्यं॰ अश्वेन यथा दीपिकया व्रजतीत्यादौ सर्वेषां करणत्वानापत्त्या कारकांतरापेक्षया च प्रकर्षेण तुल्य
कक्षायामपीति स्वयमेवोक्तत्वात् गां पयो दोग्धीत्यादावकथितसूत्रभाष्यासंगतेश्चेति दिक्॰ अथ चेति॰ सामानाधिकरण्येनान्वयेनैकस्य

यद्यपि गुणद्रव्ययोः करोतिना संबंधस्तथापि तमभुत्वात्प्रकर्षस्याश्रितत्वात्तद्द्रव्यस्यैव क्रियांतरउपयोक्ष्य
माणत्वादीप्सिततमत्वात्तस्यैव कर्मसंज्ञा न गुणस्येति मत्वाह॰ अथ चेति॰ तत्सामानाधिकरण्यादिति॰ भीष्मा
दीनां स्वयमकर्मत्वेपि विशेष्यसंबंधिन्यैव विभक्त्या भाव्यं॰ तदेकयोगक्षेमत्वात्॰ केवलानां च प्रातिपदिकानां पर
श्चेति नियमादप्रयोगार्हत्वात्॰ ततो यथेश्वरसुहृदः स्वयं निर्धना अपि न दीयेन धनेन तत्फलभाजः एवं गुणा अपि॰

पदस्यैव विशेष्यतयैकार्थबोधकत्वं यदि भिन्नशक्तिकत्वं स्यात्तदा शक्तिभेदेनार्थस्यापि भेदादेकार्थत्वं भज्येत तस्माद्विशेष्यसमानशक्तिकत्वं तद राम
भिन्नविशेषणानामिति नियमात्तत्समानविभक्तिकत्वमेव फलाश्रयत्वादिवत्तद्वत्समानाधिकरणत्वमपि विभक्त्युत्पत्तौ नियामकमिति॰ ७
तदुपपादयति ततो यथेति॰ यथा मैत्री भंगभियासधनो निर्धनस्य स्वधनेन स्वसमानं वा सालंकारादीन्करोति एवं सामानाधिकरण्यभंगभि
यास्वशक्तितत्रारोप्य स्वसमानविभक्तिकत्वं संपादयतीति भावः॰

८२६

नन्वेवमेव स्थतः कट इत्यादावपि भीष्मादिभ्यो द्वितीया स्यादत आह॰ भाष्येऽस्ति खल्वपीति॰ भीष्मादिगुणगतमित्यस्य तद्गुणविशिष्टगत
मित्यर्थः॰ गुणगतं कर्मत्वमिति भाष्ये कर्मशब्दः शक्तिपर इति भावः॰ अयं भावः॰ कृत्स्नधातोरुत्पत्त्या प्रकृतिगतकर्मभावात्तद्गतेन तत्रा
भिधातव्ये यद्यप्रकृतिवाच्यक्रियानिरूपितकर्मत्वशक्तिमत्तत्सर्वगतास्याभिधीयत इति युक्तं॰ द्वितीयायाः प्रातिपदिकाद्युत्पत्त्या स्वप्रकृ

त्यर्थस्येन द्वितीयायां वै धर्म्यं दर्शयति॰ अस्ति खल्वपीति॰ अनवयवेनेति॰ साकल्येन॰ सर्वमिति॰ भीष्मादिगुणगतमपीत्यर्थः॰
कटस्यमिति॰ प्रातिपदिकार्थगतायाएव कर्मशक्तेर्वाचिका द्वितीयेत्यर्थः॰ न कर्मविशेषा इति॰ भीष्मादिगुणगतकर्मत्वमभिधा
तुं न शक्तमित्यर्थः॰ एवं युक्त्या प्रत्याख्यानवादी स्वपक्षे दोषं परिहृत्य परपक्षे दूषणमाह॰ तवैवेति॰ एष दोष इति॰ वक्ष्यमाणः॰
प्रातिपदिके नोक्ता इति॰ अनभिहिते कर्त्राद्यभिधानाय तत्र विभक्तिविधानं तानि चैकादिभिरेवोक्तानीति प्रथमायाः अप्राप्तिः॰

तिभूतप्रातिपदिकार्थकर्मत्वलाभात्तदेव बोध्यं नान्यदिति॰ भीष्मकटमित्यादौ आरंभवादे पूर्वोक्तप्रथमाप्राप्तिरूपदोषाभावात् एष इत्यनुपप ॥
न्नमत आह॰ वक्ष्यमाण इति॰ तिङभिहिते वचनसामर्थ्याद्दोषपरिहारेपि प्रकृत्यभिहिते दोषः॰ तथा नभिहिते कर्त्रादिके च क्षत इत्यादौ तस्या
श्चारितार्थ्यादित्याह॰ अनभिहिते कर्त्रादीति॰ एवं पश्यत्यादौ द्वितीया तु कर्मणोनभिहितत्वादेकेनोक्तेपि भविष्यतीति तत्त्वात्प्रथमाभावापत्तिः

कै०वि०२०३ ननु कर्मादीनां विभक्त्यर्थत्वे एकत्वादीनां निमित्तत्वं कथमत आह उपपादयति· प्रातिपदिकार्थगतैकत्वादिविशिष्टे कर्मणीति· सामानाधि
करण्यसंबंधेनैकत्वविशिष्टकर्मशक्ता विभक्त्यर्थः· वाचिकेति· बोधिकेत्यर्थः· द्योतकत्वपक्षस्येवोचितत्वात्· एकत्वादीनां विशेषणतये

आरंभवादी परस्य तुल्यदोषतामाह· कर्मादिष्वपीति· यस्यापि कर्मादयो विभक्त्यर्थास्तेनापि एकवाक्यता बहुषु बहुवचनमित्यादेः
कर्मणि द्वितीयेत्यादीनां चाभ्युपगंतव्या· गुणप्रधानभाव एव तु तस्य विपरीतः· तत्र प्रातिपदिकार्थगतैकत्वादिविशिष्टे कर्मणि द्वि
तीयेत्येवमादिर्वाक्यार्थस्तस्य संपद्यते· कर्मण एकत्व इति· नन्वेकत्वादीनां विशेषणत्वमभिधानीयकर्मादीनां च विशेष्यत्वं
तत्र कस्मात्कर्मणो विशेषणत्वं प्रतिपाद्यते नैष दोषः· प्रातिपदिकार्थस्यैकत्वे सति तद्विशिष्टस्य कर्मणो वाचिका द्वितीयेत्ये
षमत्रार्थो विवक्षितः· तत्र च प्रातिपदिकार्थव्यतिरेकेणान्येषामेकत्वादीनां विशेषणमतानामभावादेकद्वित्वादौ भवतोपि प्रथमान

वभानात्· एवं चैकत्वविशिष्टे प्रातिपदिकार्थे प्रथमेत्यर्थे तदपेक्षयातिरिक्ते यत्रैकत्वं वृक्षद्वित्यादौ तत्रैव स्यात् न त्वेक इत्यादावित्याह· तत रा०म०
श्चेति· उक्तार्थानामित्यस्य प्रधानार्थविषयत्वादेकत्वे उक्तेपि प्रधानकर्माभिधानाभावाद्द्वितीयादीनामनन्वयतैपि सिद्धिरिति तदनापत्तिर्नाकारि:· ८

८२०

एतद्वाक्यं हरिणाप्येवमेव व्याख्यातमित्याह· तदुक्तमिति· निमित्तं· प्रवृत्तिनिमित्तं· द्व एकत्वे इति· द्वयोरपि तयोर्व्याख्यानयोर्द्वित्वादौ विवेक
रूपेणभानान्न बोधावत्त्यनुभवविरोधौ· इयं च कल्पना शब्दशक्त्याश्रयेत्याह· एवं शब्देति· अत्रापि पक्षे प्रातिपदिके नैकत्वविशिष्टद्र

व्यसंतीति· व्यतिरिक्तानीत्यर्थः· तदुक्तं हरिणा· निमित्तमेक इत्यत्र विभक्त्याभिधीयते· तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तत
इति· यथा शतमित्यत्र प्रवृत्तिनिमित्तं शतसंख्यान्यान्यानुविभक्तिवाच्या प्रातिपदिकार्थगतैकत्वसंख्या· तथैक इत्यत्रापि निमि
त्तविभक्तिवाच्ये द्व एकत्वे· एवं शब्दशक्त्याश्रयेणैकत्वादिभेदेन समाधायाभेदपक्षेपि समाधातुमाह· अथ वेति· गुणोपसर्जनं द्रव्यं प्रा
तिपदिकेनाभिधीयते· द्रव्योपसर्जनस्तु गुणो विभक्त्यर्थः· यथा शौक्ल्यमिति गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दाद्द्रव्योपसर्जनेनेतस्मि
न्नेव गुणे भावप्रत्ययः· यत्स्यो सावितीति· यस्मिन्द्रव्येस्थिते एकत्वादिको गुणस्तस्य द्रव्यस्यानुक्ता एकत्वादयः प्राधान्येनेति भावः॥

व्याभिधानाद्दोषस्तदवस्थोत आह· गुणोपसर्जनमिति· द्रव्योपसर्जन इति· गुणगुणिनोरभेदाच्छ्वेतः पट इति सामानाधिकरण्यम्॥॥

ननु प्रातिपदिकस्यैकत्वादिविशिष्टे शक्तत्वात्तेनैव द्रव्यं विशेषयितुं शक्यं किं तत्र विभक्त्येत्यत आह केवलस्येति अयं भावः व्युत्पत्तिव्यवहारा लुप्तक्रियः व्युत्पत्तिव्यवहारश्च विभक्त्यन्तेनैवेति विभक्तिसमभिव्याहृतेन गृहीतायाः शक्तेस्तदभावेनुद्बोधात्पदार्थानुपस्थित्या संख्याप्रविशेषितं एवं च पदार्थोपस्थित्यन्यथानुपपत्त्याऽभिहितेऽपि विभक्त्युत्पत्तिरिति लोकव्यवहारे प्रयुज्यमानानामेव साधुत्वं साधु

संख्यमविशेषितमिति केवलस्य प्रातिपदिकस्य प्रयोगाभावात्प्रथमायाश्चाभावे एकादिशब्दानुच्चारणेन तत् एवं पुंस्त्वप्रथमोत्पत्तिं प्रतिपाद्य वचनेन प्रतिपादयितुमाह अथवेति समयादिति परश्चेत्यस्मात्प्रत्ययपरेव प्रकृतिः प्रयोक्तव्या न केवलेत्येवं रूपादित्यर्थः कर्मादीनामिति कर्मण्येव द्वितीयेत्येवं द्वितीयादीनां नियतत्वात् षष्ठात ही इति कर्माद्यभावः शेष इति भावः अशेषत्वादिति प्रातिपदिकार्थस्य प्रथमानिधातुपयोगात्तस्य चाव्यतिरिक्तस्येह सद्भावात्

त्वान्वाख्यायकमिदं शास्त्रमिति व्युत्पत्तिव्यवहारे एव किं मन्त्रमिति न शंक्यं भाष्येन नियोगत इति न नियमत इत्यर्थः प्रातिपदिकार्थस्याशेषत्वात्कथं तत्र षष्ठीत्यत आह कर्मादीति तावन्मात्रमेव शेष इत्यभिमानः अव्यतिरिक्तस्येति अतिरिक्ते न विशिष्टो व्यतिरिक्तं तद्भिन्नस्य स्वस्वत्वार्थः एवं च कारकप्रातिपदिकार्थव्यतिरिक्तः शेष इति नात्र षष्ठी तदतिरिक्तस्य कस्याप्यप्रतीतेरिति भावः॥ ॥राम॥ रा म० ६

अर्थाभावेपि समयपरिपालनाय विभक्तौ कथमर्थतो व्यवस्थेत्यत आह सामर्थ्यादिति तदेवोपपादयति एक इत्यत्रेति विरुद्धविभक्त्यपेक्षयानुवादकविभक्तिर्न्याय्येति भावः पक्षद्वयेपि दोषाभावप्रतिपादनात्संख्यासुबर्थ इति दर्शने सूत्रे कार्यदर्शनान्तरे नैतास्पृष्टं तत्तत्रं भपक्षे परिगणनादिप्रवृत्तिं बोधयितुमाह तदेवमिति संख्याविभक्त्यर्थ इति सूत्रे प्राधान्यात्तस्या विभक्तियोत्यताकारकं तु तद्विशेषणत्वेन तयेति

अर्थतोव्यवस्थेति सामर्थ्यादित्यर्थः एक इत्यत्रैकमेवैकत्वं तच्च प्रातिपदिकेनाभिहितमित्यप्राप्तासमयवशेन प्राप्यते तत्र पथ्यासमयश्च पालितो भवति एकत्वानुगुणं चान्यत्र तदभिधाने द्विष्टसामर्थ्यं वचनं भवति तथा कर्तव्यमित्यर्थः तदेवं संख्याविभक्त्यर्थ इति दर्शनाभिप्रायेण सूत्रस्थापितं औपगव इति अपत्यापत्यवत्संबंधस्य तद्धितेनोक्तत्वात्षष्ठी न भवति चित्रगुरिति समासेन स्वस्वामिसंबंधस्याभिधानात्षष्ठ्यभावः

दर्शने त्यर्थः भाष्ये तिङ् क्रियते कट इति नचात्र संख्याकारकयोरुभयोरप्युक्तेः संख्याविभक्त्यर्थ इति पक्षेपि नेदमनभिहिताधिकारप्रयोजनमिति तिङ्ग्रहणं व्यर्थमिति वाच्यं संख्यायाः क्रियायामेवान्वयेन कारकगते संख्यायाः शब्देनानभिधानादित्याशयः एवं च पचत्योदनं देवदत्त इत्यादौ तिङोक्तायाः एकत्वादयः इति प्रथमान प्राप्नोतीति पूर्वोक्तसाधर्म्येकदेशयुक्तिरिति पथ्या कथं चित्व्याख्येयमिति तिस्रश्चिते तिङ्कृत्तद्धितसमासयोः किंस्मिश्चिदिमत्यर्थः विधानादाह अपत्यापत्यवदिति तद्धितोक्तत्वादिति तद्धितोक्तत्वादित्यर्थः॥

वि०२०३ नन्वेतयोः संबंधस्य प्रातिपदिकार्थत्वेनाशेषत्वान्न षष्ठीप्राप्तिः कारकप्रातिपदिकार्थव्यतिरिक्तो हि तत्र शेषः न च कर्मादिव्यतिरिक्त एव शे
ष इत्याशयेनैतेउदाहरणे। यद्वा संबंधोन प्रातिपदिकार्थः प्रवृत्तिनिमित्तत्तदाश्रयभिन्नत्वादिति वाच्यं। घटपदात् घट घटत्वयोः संबंध
स्य भानेन तत्र षष्ठ्या दुर्वारतापत्तेः तत्र हि नैतदन्यतमेनाभिधानमिति चेत् सत्यं वाक्येऽस्य संबंधस्य षष्ठ्यर्थत्वं दृष्टं ऽत्रापि प्रातिपदिकार्थ
त्वमित्यभिमानात्। किंच कातर्हि स्यात् शेषलक्षणा षष्ठी अशेषत्वा　　समया ग्रामं द्वितीयैवेत्यग्रिमग्रंथेन कटं भीष्ममित्यादौ अभिहितत्वाद
प्राप्तद्वितीयासाधनार्थं परिगणनमित्येतत्त्वं उन परेण परिगणनप्रत्याख्यानवदेतयोरुदाहरणत्वाभावस्याधिकथनेन तद्धितसमास
ग्रहणमधिकमित्यर्थस्यापि कथनात् अनेकमन्यपदार्थ इति सूत्रे भाष्ये प्यनयोरनुदाहरणत्वं सूचितं। न च शतेन क्रीतः शत्यः प्राप्तमुदकं
येप्राप्तोदक इत्यादि तद्धितसमासोदाहरणमिति वाच्यं। प्राप्तोदक इत्यादौ प्राप्तोदककर्मत्वादिप्रकारेणैव बोधः तत्र विशेष्यतन्निरूपकत्व
बाधेन विशेषणमादाय तत्सर्वयसानमिति द्वितीयादिप्रयोजककर्मत्वादेः शब्दाद्बोधेन द्वितीयाद्यप्राप्तेः एवं च विशेषणत्वव्यत्यासोपिन।
उपजीव्यस्यैकधर्मिबोधकत्वरूपसामानाधिकरण्यस्य च न बाधः चित्रगुरित्यादौ चित्राणां गवामयमित्यादौ यथा तस्य षष्ठीप्रयोजकतात थात्रापि
स्यात्तेनैव रूपेण भानादिति बोध्यं। एवं यथा क्रीतशब्दे धातुना क्रियोपस्थापनेन तेन रूपेण शब्देनेति नत दर्थ इतर कारकान्वयः इदं च केवं कर्मणा
ेत्यत्र भाष्ये ध्वनितं। अत एव तदर्थ कर्मणो विभक्तिप्राप्तियोग्यता। एवम संप्रतमित्यादिनिपातैरपि न तेन रूपेण त्रियायाः कारकस्य चोक्तिरिति न
तदन्वयिनि विभक्तिप्रसक्तिः अत एव निपातेनाभिहितत्वात् न तदनुत्पत्तिरिति चिंत्यमेव। नारद इत्यबोधि स इत्यत्रापि नारद इतीत्यनेन न श्रीछष्ठीपद्मानानु
कारानुवादोन्न तत्र द्वितीयादि प्रसक्तिरित्यलं।

१०

८२९

DR BHAU DAJI MEMORIAL

परिगणनफलमाह भाष्ये उत्सर्गे ह्रीति। तदाचष्टे। सामान्येनेति। एकयोगक्षेमत्वादिति। एकार्थबोधकत्वस्यैव सामानाधिकरण्यपदार्थत्वादि
ति भावः। भाष्ये कर्मादीनामभावादिति। अनभिहितकर्मादीनामभावादित्यर्थः अन्येति। प्रथमेत्यर्थः एतमभिसंबंधं सामानाधिकरण्य
रूपमितरसंबंधावच्छिन्नविशेष्यविशेषणभावः सामानाधिकरण्यं द्वितीयाभविष्यतीति। अस्याशय उक्तः तस्मान्नार्थ इति।

उत्सर्ग इति। अनभिहित इति सामान्येनोच्यमाने इत्यर्थः यत्र बहूनि प्रातिपदिकानि समानाधि
करणानि विवक्षितानि तत्रैकयोगक्षेमत्वादेकतेउत्पन्नया द्वितीयया सर्वप्रातिपदिकार्थगतं कर्मत्व
मभिहितमित्यन्येभ्यो द्वितीया न स्यात् परिगणनमंतरेणाप्येनं दोषं परिहर्तुं पृच्छति। कातर्हीति॥　॥

भीष्मादिभ्यो द्वितीयादेः प्रकारांतरेण वारणात् व्यावर्त्यांतरस्याभावाच्चेति भावः यत्तु एतद्वलेन निपातेनाप्यभिधानमिति वदंति त
दयुक्तं उक्तरीत्या निष्फलं च। विभक्त्यर्थमदन्चयेनेन समासविधायकासंगतिश्चेति दिक्॥　॥　॥श्रीराम॥

कैं०वि०२०३ तन्निराकरणायेति· न[illegible]नु परिगणनप्रत्याख्यानमूलकोयं दोषः घञः कृत्वेन परिगणनेपि दोषतादवस्थ्यादिति भावः· नास्तीति· अभिहि
तत्वावच्छिन्नप्रतियोगि[illegible]ताको भेदो नास्तीत्यर्थः· ननु क्रियाभेदे शक्तेर्भिन्नत्वात् तदादिनिरूपितस्याभिहितत्वेपि आसिनिरूपितस्याभिहित
त्प२ त्वासिद्धिरित आह· द्र[illegible]चेति· तद्व्यतिरेकेणेति· गुणसमृद्धो द्रव्यमिति भावः· नचैतावता प्रत्यक्षमिति· शक्तेरतीन्द्रियत्वादित्यर्थः· स्वरू

आसिक्रियापा२ अनभिहित इति प[illegible]र्युदासे प्रसज्यप्रतिषेधे च दोषदर्शनात्तन्निराकरणाय दोषोद्भावनं कुर्वन्नाह· द्रूयोरिति· आस्यात् आस्यत इत्यत्र
सदि क्रियायां शक्ते[illegible]र्नाधिकरणे प्रादुर्भाव्यंत आन्यतरेण सदि प्रत्ययेन घञाभिहितमपि त्वभिहितेनेति सप्तमी न प्राप्नोति· अभिहिताद
न्यत्रेत्यत्रापि पक्षे [illegible]हितत्वादधिकरणस्याभिहितादन्यत्वं नास्तीति न प्राप्नोति· द्रव्यं च कारकं मन्यन्ते· तद्व्यतिरेकेण शक्तिसद्भावे प्रमा
णाभावात्· न तावत् [illegible]प्रत्यक्षं द्रव्यव्यतिरिक्तस्वरूपपरिच्छेदि समुपजायते· द्रव्यस्वरूपातिरेकेण शक्तिरूपानुपलंभात्· प्रत्यक्षाप्रवृ
त्तौ च तत्सर्वकस्यानु[illegible]मानस्यापि शक्तिसद्भावे नास्ति प्रवृत्तिः कार्यं च द्रव्यस्वरूपायत्तमेवेति कार्यव्यतिरेकादपि नास्ति शक्तिसद्भाव

येति· शक्तिस्वरूपेत्यर्थः[illegible]अत एव संबंधस्य दुर्ग्रहत्वात् तत्सर्वकमनुमानमपि नेत्याह· तत्सर्वकस्येति· ननु यथा दाहके सत्यपि दाहादिकार्यस्य राम०
कादाचित्कत्वानुपपत्त्या [illegible]शक्तिरवगम्यते तद्वदिहाप्यस्तु अत आह· कार्यं चेति· द्रव्यस्वरूपेति· न तु तद्व्यतिरिक्तशक्त्यायत्तमित्यर्थः॥ ॥ ११

८३०

शक्तिसाधनपक्षं चेति· [illegible]कस्यैव परस्परविरुद्धकर्तृकर्मादिव्यपदेशः शक्तिं गमयति· एकं चैकनिरूपितशक्तेरभिधाने तद्भिन्नान्तरस्या
नुक्तत्वमेवेत्येतदाशय[illegible]पर्युदासपक्षे कुत इति प्रश्नानुपपत्तिरत आह· प्रसज्येति· द्रव्यं कारकमित्यपि बोध्यं· एकैवासनक्रियेति· त
था च तन्निरूपिता श[illegible]क्तेरस्यैवैषि पक्षे वेति भावः· प्रत्यभिज्ञैकत्वावगतेः कथमन्यत्वमत आह· भिन्नपदेति· प्रत्यभिज्ञा

पर्युदासे [illegible]शक्तिसाधनपक्षं चाश्रित्याह· न वेति· प्रसज्यप्रतिषेधवाद्याह· कुतोनुरवत्विति· पर्युदासमा
श्रित्याह· [illegible]अनभिहिते हीति· पर्युदासेपि दूषणमाह· यद्यपि तावदिति· आसन आस्त इत्यत्रैकैवासनक्रि
या तस्या [illegible]अधिकरणं त्वप्यभिहितमिति सप्तम्या अप्राप्तिरित्यर्थः· अत्राप्यन्यत्वमिति· भिन्नपदप्रत्यायितयोभि
न्नेआसन [illegible]रूपेइत्यर्थः· एकपदोपात्ते क्रियासाधनसंबंधे अनेन विभक्तयो निवार्यन्ते न तु वाक्योपात्ते॥ ॥

तु साजात्यनिबंधनेति [illegible]वः· नन्वेवमनभिहित इति सूत्रं व्यर्थमत आह· एकपदेति· अत एव गोष्ठाय हंति कृतं कटमानय भीमाद्भिनेतीत्यादौ
चतुर्थ्यादयः इति भावः· त[illegible]था च पदभेदकृतभेदमर्थे आरोप्य तन्निरूपितशक्तिभेदो पीत्यपि प्रायः॥ ॥ ॥

कै०वि०२०३ एकस्येत्यस्यार्थमाह· आसनमिस्यत्रेति· आसनत्वसिध्यनुपपत्तिलक्षणसामर्थ्येनासिसाधनत्वमाह· आस्यतइति· आस्तेरिति स्वोक्तस्य
व्याख्यानं संनिधीयत इति· अस्मिन्निति· प्रत्ययार्थत्वेन निर्दिष्टवस्तुनआसिक्रियासन्निधानमंतरेण सत्वोनेयोगादासिक्रियासाधनत्वं
भवति स्वप्रकृतिकल्युटं तार्थद्वारेत्यर्थः· अएकस्मान्नासेरिति भाष्ये आसिः शीतेरप्युपलक्षणं· नन्वेवं ल्युट्प्रकृतिभूता सिक्रियापास्ति

आसिः साधनमिति· आसनमित्यत्र याआसिक्रिया तस्याआसिक्रियासाधनं· कथमेतदिति चेत्· उच्यते· आ
स्यतेऽस्मिन्निस्यासनमुच्यते· यदिआसनेक्रियासे सन्निधीयते ततस्तदपेक्षं तदासनमुच्यते· एवं साम
र्थ्यादासेरासिः कर्त्ता भवति· नन्वेवं सत्यासनमित्यत्र याआसिक्रिया साअन्यस्याआसिक्रियायाः साधनं
भवति न त्वन्यस्याअन्या· एवं तर्ह्यर्थांतरे स्ययं थस्यतासर्थ॥ ॥ ॥ ॥ ॥

उं· तोपात्ताआसिक्रियासाधनमितिभाष्योक्तं नसिद्धमित्याशंकते· नन्विति· केचित्तु आसनक्रियाआस्तेऽस्मिन्नासनमिति व्युत्पत्तिः प्रकृतिभूत रा.प्र०
आसिरस्त्यर्थः· तदर्थस्यापि लोके प्रयोगदर्शनात्· एवं शेतिरपितिष्ठत्यर्थो जलाशयइत्यादौ उभयत्राप्यासिग्रहणमुपलक्षणं· एवं च भाष्ये स १२
यंजसमेवेत्याहुः॥ ॥

८३१

वस्तुमात्रमिति· नासादिक्रियाधिकरणत्वेन तद्बोध्यः किंत्वासनत्वेनेत्यर्थः· तदेवाह· अनुद्भूतशक्तिकमिति· शब्दव्युत्पत्तयेइति· अनुलोमादि
वद्गूढएवेत्यर्थः· अतएव पङ्कजइत्यादौ केनेति कर्त्राकांक्षावत्· आसनमित्युक्तेन तदाकांक्षा अतएवआसिः साधनमित्यस्य साधनांत

तदयमत्र परमार्थः· आसनशयनकरणापादानसंप्रदानादिशब्दैरासनादिक्रियायोग्यं वस्तुमात्रमनुद्भूतशक्तिकमभि
धीयते· तत्र शक्त्युद्भव प्रतिपादनाय विभक्तिरवश्यं साध्या· ततश्चासिः साधनमिति साधनांतरनिरासः क्रियते· शब्द
व्युत्पत्तये केवलमत्रासिक्रियोपादीयतइत्यर्थः· सर्वकालश्च प्रत्ययइति· कालविशेषानुपादानेन ल्युटो विधानात्· बा
ह्यमिति· देवदत्तादिकमित्यर्थः· किंपुनरिति· यदिद्रव्यं साधनं तदा तदेकमेव न त्वभिहितमिति पूर्वोक्तः परिहारो न सं
गच्छते· अथ शक्तिः साधनं तदा तस्याभेदाद्दभिहितत्वानभिहितत्वे संभवाद्भवति समाधानमिति मन्वानस्य प्रश्नः· आश्रित
त्वाच्छक्तिरेवात्र गुणशब्देन विवक्षिता॥

रनिरासेतात्पर्यमुक्तं· प्रयोजनं वदन्विचारस्य प्रकृते संगतिमाह· यदिद्रव्यमिति· अत्र द्रव्यमित्यस्य शक्तमनाविष्टं द्रव्यमित्यर्थः॥ ॥राम०

कै०वि०२०३ ननु वृक्षशब्दोपात्तस्याधिकरणत्वेपि यच्छब्दोपात्तस्या कर्तृत्वं भविष्यति शब्दभेदेन भेदात् अत आह अपंभाव इति शब्दभेदमात्रेणार्थभेदासिद्धिरिति भावः वृक्षे देवदत्तस्तिष्ठति वृक्षं पश्येत्यादौ दोषाभावं द्रव्यमिति शक्तिरहितं शुद्धं द्रव्यमित्यर्थः तन्निबंधनेति एकरूपत्वनि

सएव पश्चूति किं पुनरिति गुणइत्याहेति अपंभावः यदि द्रव्यं साधनं स्यात् तदा तस्यैकरू
पत्वात्तन्निबंधनाबाधितप्रत्यभिज्ञाविषयत्वान्नानार्थक्रियाकारणनिबंधनो व्यपदे
शभेदो न स्यात् दृश्यते चासाविति नाना शक्तिसद्भावावगमः सिद्धः॥ ॥ राम॥

बंधनेत्यर्थः नानार्थक्रियेति अर्थक्रियाभिरूप्यित भिन्नकारणत्वनिबंधन इत्यर्थः नाना शक्तीति एवं च प्रसज्यप्रतिषेधेपि न दोष इति ध्वनि रा.म०
ते अन्नहि पक्षेऽभिहिता यां शक्तौ नेत्यर्थः तत्र या शक्तिरभिहिता न स्यां माभूत् सा यः या त्वनभिहिता तद्योतनाय स्यादेव प्रत्यय इति बोध्यम्॥ १३

८३२

सूत्रं प्रत्याख्यातुमिति एकत्वादयो विभक्त्यर्था इति पक्षेपीत्यर्थः भाष्येन वकाशत्वादिति नन्वेवं कृतः कट इत्यादावेव न कटं करोतीत्यादौ विप्र
त्र किं विनिगमकमिति चेन्न नमात्रग्रहणेनानभिहितविभक्त्यर्थाभिव्येप्रथमाया अप्रवृत्तेः कृत इत्यादौ तद्धटकप्रत्ययेनाभिधानेनाधि
क्याभान इति भावः अस्तिर्भवंतीपर इति प्रथमाया अपि कर्मणि द्वितीयेत्यादि साहचर्येण क्रियायोगए न प्रवृत्तेरिति भावः ज्ञानं च सत इति बु

सूत्रं प्रत्याख्यातुमाह अनभिहितवचनमिति क्रियते कटः कृतः कट इत्यादिषु द्वितीयादिनिवारणायानभिहिताधिकारः क्रियते यदि चा
त्र द्वितीयादयः स्युस्ततः प्रथमा निरवकाशैव स्यात्तस्मादनवकाशत्वात्प्रथमेन द्वितीयादीनां बाधिका भविष्यतीति नार्थोनभिहिताधि
कारेणेत्यर्थः वृक्ष इति क्रियापदमत्र नश्रूयत इति विभक्त्यंतराप्राप्तिं मन्यते अस्तिर्भवंतीपर इति ज्ञातं वस्तु प्रतिपादयितुं शब्दः प्रयुज्यते
ज्ञानं च सत इति यत्र क्रियापदांतरस्याप्रयोगस्तत्रौत्सर्गतः सत्ताप्रतीतिरित्यस्तीति क्रियापदानुषंगात् कर्तरि चतीया प्रसंगादनवकाशाप्र
थमेत्यर्थः विप्रतिषेधाद्धेति सावकाशत्वमुभ्युपगम्येदमुच्यते षष्ठीति क्रियाकारकसंबंधसद्भावात्॥ ॥ ॥

द्विसत इत्यर्थः प्यनवकाशत्वमुक्तो विप्रतिषेधोपन्यासोसंगत इत्याह सावकाशत्वमुभ्युपगम्येति नीलमिदं न तु रक्तमित्यादौ रक्तत्वादिनिवृत्ति
परे वाक्ये सत्ताया अनावश्यकत्वाद् अस्तिर्भवंतीपर इत्यस्याभावात्साहचर्यं च सर्वत्र न व्यवस्थापकमित्यभिमानः चैतंङ कोक्तिरिति तात्पर्यं अनेन
वस्तुतो निरवकाशत्वमेवेति सूचितं उक्तरीत्यानत्रापि सत्ताक्षेपात् अत एवाति उक्तसमानाधिकरणे प्रथमेति न्यासः संगच्छत इति बोध्यं स्पष्टं चेदं प्रातिपदि

कै०चि०२०३ भाष्ये अशेषत्वादिति । अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थे संपन्न इत्यनेन कमितिसूत्रोक्तसंख्याप्रातिपदिकार्थत्वेन प्रातिपादिकार्थका
रकव्यतिरिक्तत्वरूपशेषत्वाभावादिति भावः । षष्ठी प्राप्नोतीति । न च कृत्वा नामिति विभक्तेन षष्ठीनिषेधात्कथं तत्प्राप्तिः । न च नात्रोभयप्राप्तिः
तदधिकाराभावेऽभयप्राप्तेरपि सत्वादिति वाच्यं । एकसूत्रपक्षे दोषाभावात् । योगविभागस्तु भाष्यकृता वक्ष्यते न वार्त्तिककारेण । यद्ये

अशेषत्वादिति । प्रातिपदिकार्थस्य व्यतिरेकाभावात् । कर्त्तव्यः कट इति । प्रथमां परत्वाद्बाधि
त्वा कर्तृकर्मणोः कृतीति षष्ठी प्राप्नोतीति तद्बाधनार्थो नभिहिताधिकारः ॥ ॥ रामवृ

कस्मादयद इति । प्राधान्येन विभक्तियोग्यासंख्यैव कारकं तु तद्विशेषणत्वेन न तदेवं सूत्रं कार्यमित्यर्थः । एवमग्रेपि व्याख्येयं । उक्तार्थानामितिन्या राम०
यः शास्त्रोपात्तप्रभामार्थविषय एव कारकस्य प्राधान्येन तत्त्वेतुव्यर्थं । ननु तदापि द्योतकसमावेशस्य दृष्टत्वात्कृतः कट इत्यादौ क्रियापते कट इत्या १४
दौ चत द्वारणापस आवश्यक इति चेन्न । आद्ये विशेष्यत्वेन भाने न तस्य द्योत्यत्वासंभवात् । अंते क्रियाप्रति तस्य विशेषणत्वेपि कटपदार्थतत्त्वाभा
वेन तदुत्तरा इतीमा द्योत्यत्वाप्रसंभवाच्चेति दिक् ॥ ॥१॥

८३३

कर्मणि द्वितीया ॥ ॥ सामीप्यसंबंध इति । समयाशब्दशक्यस्यापि सामीप्यस्य तत्प्रधानार्थनिरूपितं संबंधत्वमपि । यथा राज्ञः स्वमित्यत्र स्वत्वस्ये
ति भावः । सामीप्यानंतर्यास्पद्दीनां न षष्ठ्यर्थत्वमिति तु समभिव्याहृतपदार्थभिन्नसामीप्यादिपरं । उपर्यर्थे वर्त्तते इति । उपरि सामीप्ये वर्त्तत इ

कर्मणि ॥ ॥ समया ग्राममिति । सामीप्यसंबंधे षष्ठ्यां प्राप्तायां द्वितीया विधिः एवं निकषायोगे हा शब्दः शोकादिवृत्तिरिति तद्यो
गे षष्ठ्येव प्राप्नोति । अभितो ग्राममिति । पर्यभिभ्यां चेति तसिलंतावभितः परितः शब्दावुभयतः सर्वत इत्यनयोरर्थयोर्वर्त्तेते । तद्यो
गेपि षष्ठ्येव प्राप्नोति । अभिसुख्यवृत्तिरपि विभक्तिप्रतिरूपको निपातोऽभितः शब्दोऽस्ति सोपीह गृह्यते तद्योगेपि षष्ठी प्राप्नोति । अ
धोऽधो ग्राममिति । उपर्यध्यधसः सामीप्य इति द्विर्वचनमधिशब्दोऽत्रोपर्यर्थे वर्त्तत इति षष्ठी प्राप्नोति ॥ ॥ ॥

त्वार्थः ॥ ॥ रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम ॥ ॥ ॥

कै०वि०२०३

संबोधनेति॰ संबोधनविभक्तेः पदांतरानपेक्षत्वादित्यर्थः॰ उभसर्वैद्रत्येताभ्यामिति भाष्यस्य एतत्प्रकृतिकाभ्यामित्यर्थः॰ उभशब्दात्तसोऽनुत्पत्त्यास्यायुक्तत्वं परिहरन्नुक्तस्यार्थस्य वार्त्तिकाद्यपाठात्मलक्षणं दर्शयति उभसर्वयोरिति॰ ननु वृत्तिविषये पूर्वमेवाय चः प्रवृत्ते रुभय

धिग्जाल्मिति॰ धिक्शब्दस्य निंदार्थत्वात्तद्योगे षष्ठ्याः प्राप्तिः हा तातेत्यादौ त्वंतरंगत्वात्संबोधनविभक्तिरेव भवति॰ उभसर्वतसोरिति॰ उभसर्वयोस्तसाविति षष्ठीसमासः॰ उभयशब्दान्न भवत्यो भशब्दस्य लुक्करणमुभशब्द इत्युभयशब्दो गृह्यते॰ द्विवचनटाब्विषयत्वादुभशब्दस्य तसंतस्याभावात्॰ इत्थलदूति॰ इशियहणं प्रयोगानुसरणार्थं देवदत्तं प्रतीति॰ प्रयत्न प्राप्तौ ति॰ प्रतिशब्दश्चात्र क्रियाविशेषक उपसर्गो न तु कर्मप्रवचनीय इत्युदाहृतं केनचित्किंचित्स्मृतमिति दर्शयेनानेकस्यत्वयन्यासः॥

प्रकृतिकत्वं नतस इत्यत आह॰ उभयेति॰ उभेति तद्घटितोभयशब्दलाक्षणिकमिति भावः॰ ननु कर्मप्रेति॰ अन्यथा कर्मप्रवचनीययुक्ते इत्येवं सिद्धत्वादित्यर्थः॥ ॥२॥ रामं० १५

८३४

तृतीया च॥ ॥अस्योदाहरणे अग्निहोत्रशब्दो हविःपरस्तत्र द्वितीयातत्समानाधिकरण्यं वा गृहशब्दादनेन तु तृतीयापि विरुद्धविभक्तत्वं न विरुद्धत्वाच्च सामानाधिकरण्यमिति सूत्रमतं भाष्यमतं च॰ एवं तर्हि तृतीयापि सिद्धत्वादेवं भाष्यस्योक्तिप्रत्युक्तिक्रमेण पूर्वपक्षयुक्तित्वात्॰ न तु जुहोतेः प्रीणनार्थत्वे अग्निहोत्रशब्दस्याग्न्यर्थत्वे करणत्वात्तृतीयासिद्धिमाशंक्याह॰ देवतेति॰ अग्निहोत्रशब्दो हविःपरः न द्वितो

तृतीया च॥ ॥किमर्थमिति॰ अंतरेणाप्येतत्सूत्रं द्वितीयातृतीये सिद्धे इति प्रश्नः॰ तृतीयेति॰ देवतोद्देशेनाग्नौ हविःप्रक्षेपो जुहोत्यर्थः॰ तत्र यवाग्वां द्वितीया प्राप्तेति तृतीया विधीयते॰ अथ द्वितीयेति॰ किमप्राप्ता द्वितीया चकारेण विधीयते अथ तृतीयया मा बाधीति पक्षे चकारेणाभ्यनुज्ञायत इति प्रश्नः॰

षणं यवाग्वारिति भावः॰ यद्यपि अग्नौ हविरिति चिंत्यं॰ पदे जुहोति अग्नौ जुहोतीत्यादि श्रुतिविरोधात्॰ तस्माद्देवे आधारे प्रक्षेप इत्येव युक्तं तथापि प्रकृताभिप्रायमेतत्॰ तत्र यवाग्वाः कर्मत्वाद्द्वितीया प्राप्तेत्यर्थः॰ चकारेण द्वितीयाया विधानात्प्रश्नानुपपत्तिमाशंक्याह॰ किमप्राप्तेति॰

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

वै०वि०२०३ प्रयोजनांतरसिद्ध्येतस्यावश्यकत्वादसत्वेतस्मिन्नदस्ययुक्तमतआह· नहीति· एवंचबुद्धावसतितस्मिन्नुपायांतरपरंसूत्रमितिभा
वः· एवंतर्हितृतीयापीत्यादिभाष्यंपूर्वपक्षयुक्तिः· अर्थभेदात्सामान्ययुक्तेतिस्फुटत्वाद्भाष्येनोक्तं· अग्निष्विति· बहुवचनेनसामानाधिकरण्या
वगतिरर्थांतरासंभवात्प्रीणात्यर्थत्वमित्यर्थः· यत्तुमीमांसकाअग्निहोत्रशब्दस्यकर्मनामधेयत्वंतत्प्रख्यन्यायात् सएषयज्ञःपंच

असत्वेतस्मिन्निति· नहिपाणिनेःसूत्रकरणकालेकात्यायनवचनस्यभावः· अग्निहोत्रमिति· अग्नि
र्ज्वलितइत्यर्थः· अग्निंप्रीणातीति· अग्निषुहूयमानेष्वितिप्रीणात्यर्थेजुहोतेःप्रयोगदर्शनात्॥ ॥

विधोऽग्निहोत्रंदर्शपूर्णमासावितिदर्शनाच्च· एवंचकरणभूतेहोमेसमानाधिकरणस्याग्निहोत्रस्यकरणत्वात्तृतीयायांप्राप्तायांपक्षेद्वि राम०
तीयार्थमिदं· यवाग्वाअपिकरणत्वादेवतृतीयासिद्धेति· तन्नसूत्रानुगुणंनापिभाष्यानुगुणंकर्मणीत्यनुवृत्तेः· पाणिनीयमतेवचनरूपत्वे
नजैमिनीयन्यायरूपत्वेनतद्बाधकतायाअस्याउचितत्वाच्च· एवंचयवाग्वाग्निहोत्रंजुहोतीत्यादिवाक्येनामधेयत्वाभावोऽतएवयवागू १६
मग्निहोत्रंजुहोतीत्यादिसिद्धिरितिदिक्॥ ॥३॥

८३५

अंतराअंतरेणयुक्ते॥ ॥अंतरेणेतितृतीयांतानिप्रायेणप्रश्नेदृष्ट्वाह· अंतरेति· गतशब्दोज्ञातार्थकइतिभावः· बहिरंगत्वादि

अंतराअंतरेणयुक्ते॥ ॥अंतरेणगतेनेति· अंतरशब्दोत्रविशेषवाचीविशेषेणज्ञातेनकिंतेप्रयो
जनमितिवाक्यार्थः· लक्षणप्रतिपदोक्तयोरिति· तृतीयांतौलाक्षणिकौविभक्तिप्रतिरूपकस्तुनिपातः
प्रतिपदोक्तः· दृष्टापचारइति· दृष्टव्यभिचारः· निपातस्यापिभावात्· अंतराशब्दइति· नन्वंतराश
ब्दोप्यनिपातस्तथावंतोस्ति अंतरायांपुरिवसतीतितत्कथमसावदृष्टापचारः· एवंतर्हिटाबंतस्यला
क्षणिकत्वात्तस्त्रीत्वापेक्षटाबाश्रयत्वाद्बहिरंगत्वाच्चाग्रहणंमन्यते॥ ॥ ॥

ति· अर्थकृतबहिरंगत्वस्यानाश्रयणंचिंत्यमिदम्॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामरामरा

कै०वि०२·३ लाक्षणिकत्वेन परिहारे तेनैवान्तरेण त्वस्य व्याख्यातौ भाष्यानुपपत्तिस्तदवस्था पूर्वस्माद्विशेषश्चेत्स्यात् आह · अथवेति · साहचर्यम
त्र सादृश्यं · कोऽन्यः सहाय इति भाष्ये प्रयोगे इति शेषः · यथा कार्ये सदृशस्यैव सहायत्वं तथा प्रयोगेपीति भावः · परस्परेति · अंतरासा
हचर्यादंतरेण त्वस्यत्तीयांतित्तस्य साहचर्यात्तद्दृष्टांते नेमे वेति निपातयोरेव ग्रहणसिद्धिरिति भावः · नच परस्परसाहचर्यादनव्ययो

अथवा परस्परसाहचर्यान्निपातयोर्ग्रहणमिति वाच्यं · अप्रधान इति ·
युष्मदस्मदर्थस्याविशेषणत्वादप्राधान्यं कमंडलोस्तु विशेष्यत्वात्प्रधानता ·

रेवग्रहणं कुतो नेति वाच्यं · व्याख्यानात् · पत्त्वव्यययोः स्वरादौ चादौ वा पाठेन परस्परसाहचर्यसंभवेप्यनव्यययोः पाठाभावात्साह राम०
चर्यस्य वक्तुमशक्यत्वादिति · तन्न · उक्तभाष्येणासादृश्यस्य सह प्रयोगे नियामकता या उक्तत्वात् वस्तुतस्तु युक्तग्रहणात्संबंधिनि ९७
मित्तस्य साकांक्षयोरेवैतयोर्ग्रहणं · नचैटावत्ता ; तराशब्दस्य था अनाकाङ्क्षादेशत्वेन परिधानीयत्वेनैव चैतेनैवाधादिति भाष्याशयः ॥०

८३६

अस्य योद्वितीयेनेति · द्वितीयशब्दोत्र सहायवाची · मध्ये इत्यर्थे केनांतरेणेत्यादिना कमंडलोरपि योगात्तस्यानुपपत्तिरत आह
अंतरेति · अंतरेत्यादेर्मध्यवर्तीत्यर्थः · नतु कमंडलोरिति · अभेदस्य सत्त्वेपि तस्य षष्ठीप्रयोजकत्वाभावेन तदपवादद्वितीयाप्र
योजकत्वमपीति भावः · आधारार्थत्वादिति · आधारपरतंत्रत्वादित्यर्थः · तस्य तत्परतंत्रत्वे समानन्यायेनाधेयपरतंत्रआधा

कः पुनरिति · अंतरांतरेणशब्दाभ्यामाधेयप्रधानमध्यवचनाभ्यां युष्मदर्थस्यैवाधेयस्य योगो न तु कमंडलोरिति मत्वा प्रश्नः ·
यत्नादिति · मध्ये इत्येतस्मिन्नर्थे तयोर्वर्तनाद्द्वयोरपि ताभ्यां योगोस्ति आधारार्थत्वाद्याधेयस्य कमंडलोः अंतरा तदिति ·
अत्र भाष्यकारेण मध्यमात्रवचनो अंतराशब्दः प्रयुक्तो न त्वाधाररूपमध्यवाची अन्यथा तत्स्थानमिति तस्य मानाधिकर
ण्यं न स्यात् · कमंडलुयोगप्रतिपादनाय चैवं प्रयोगः · लौकिके तु प्रयोगे मध्यउद्भूताधारशक्तिके मध्ये अंतराशब्दो वर्तते ·

रइति कमंडलोरपि तद्योग इति भावः · नत्वाधाररूपेति · आधारशक्तिप्रधानेत्यर्थः · तत्स्थानमिति · अन्यथा तत्रस्थानमिति वक्तव्यं स्या
दिति भावः · कमंडलुयोगेति · अत्यंतभेदप्रतिपादनद्वारेत्यर्थः · उद्भूताधारेति · तस्य चाधेयेनाधाराधेयभावेनैवान्वये साधुत्वं न तु के
वलभेदान्वये इति भावः ॥

के०वि०२०२ उपपदविभक्तेरिति न्यायमूलकं न वाचनिकमित्याह। सा चेति। क्रियाद्वारक इति। सर्वत्र संबंधस्य षष्ठीं विधिक्रियापि याकारकभावमूलकत्वा
त्। यथा स्वत्वं क्रयादिनिबंधनमिति भावः। युक्तिरत्र शिथिला। सर्वत्र प्रथमायाः प्रापत्तेर्युष्मदाद्यर्थे पि सत्त्वात् कर्तृत्वव्यभिचारात्। न चैवं स
त्याग्नेः ने प्रथमा। न्यायानुगतेर्थे किं कुर्मस्तस्माद्वचनमेवेदं अत एव नमस्यति देवानित्यत्र नेन न्यायेन द्वितीयां च स्यतिमाष्यकृत्। तत्र हि क्रि

उपपदविभक्तेरिति। अस्तीति क्रियानुषंगात्कर्मंउलोः कर्तृत्वं न त्वतिङाभिहितमिति प्र
थमाकारकविभक्तिः सा चांतरंगा क्रियाकारकयोः संबंधस्यांतरंगत्वात्। उपपदार्थे
न तु क्रियाद्वारकः संबंध इति तन्निमित्ता बहिरंगा विभक्तिः॥ ॥रामरामरामराम

याकारकभावेनैवान्वयात् इत्यन्ये। नन्वविशेषणे संबंधस्योद्भूततया प्रतीतेस्तत्रैव षष्ठ्यपवादत्वेन संबंधार्थिके बाहिद्वितीयेति वाच्यं। प्र राम०
थमापवादत्वस्यापि संभवे इत्याशयात्। उपपदविभक्तेरितिवचनात् षष्ठ्यपवादत्वेमेवन प्रथमापवादत्वमित्यत्र राशयः। प्रथमाया अपि १८
कारकविभक्तित्वं क्रियाजनकेर्थे तस्या अपि विधानादिति बोध्यं। न द्रुकंकर्मंउलोः कर्तृत्वं तिङाभिहितमिति। ॥ ॥४॥ ॥श्रीराम

८३१

कालाध्वनो॥ ॥लाद्यर्थमित्यत्र लादिभिरभिधानं यथा स्यादिति भाष्ये पाठमभिप्रेत्याह। ननु कर्मणीति। अकर्मकधातुभिर्योग इति तु न वि
धायकमिति प्रागेव निरूपितं। लाद्यर्थमित्यत्र भाष्ये पाठांतरं लादिभिरभिहिते द्वितीया मा भूदिति। तत्स्वयुक्तं। प्रकारांतरेण तत्प्राप्तेरभावात्।
नन्विदं वार्तिकं सकर्मकाकर्मकविषयमकर्मकविषयं वा। नाद्यः। आसं पठति देवदत्त इत्यादौ मासादिकर्मण्यपि लाप्राप्त्यौ मासः पठ्यते
देवदत्तेनेत्यादिप्रयोगापत्तेः। नांत्यः संकोचे मानाभावात्। सकर्मकार्थं कालाध्वनोरित्यस्यावश्यकत्वेन न तर्हीदानीमिदं सूत्रं कर्तव्यमि

कालाध्वनोः॥ ॥पाणिनीयेसूत्रन्यासे सति मासमास्यते देवदत्तेनेति भाव एव लादयस्युर्न तु कर्मणि तत्र आस्यते मासः आसितो
मासः आसितव्यो मासः सुखासो मासः इति प्रयोगानुपपत्तिरिति वार्तिकारंभः। अत्यंतसंयोग इति। अनत्यंतसंयोगे तु अधिकरणस
प्तम्येव भवति। अमावास्यायां यजत इति। लाद्यर्थमिति। आदिशब्देन तिङादीनां ग्रहणं तथा चोदाहृतं कर्मातिदेशेनैव चेमासमास्ते देव
दत्त इति द्वितीयापि सिद्धत्वान्नाथ सूत्रेणेति भावः।
तिमाष्यविरोधादिति पत्तश्चेति चेत् उच्यते। सर्वविषयं वार्तिकं सूत्रं च न कार्यमित्येव तात्
त्पर्यं। न च मासं पठ्यते देवदत्तेनेत्यस्यापत्तिः उभयप्रसक्तिर्यौ अंतरंगे मुख्ये च द्रव्यकर्मण्येव लप्रवृत्तिरिति न दोषः द्रव्यकर्मणोंतरंगत्वं च धात्वं
तरार्थानंगस्वार्थकर्मत्वेन। वार्तिकप्रामाण्येन गौणे कर्मणि दुह्यादेरित्यादिवत् भाष्यप्रामाण्येनाप्यवंवि कल्पनाश्रयणाच्च एवं च प्राकृतमे
वेति पक्षेपि न दोषः। अनयपक्षे आस्यते मास इति कर्मणि ले पञ्च क्रियये तन्न क्षमाणरीत्या वश्यकेनाप्यनेन द्वितीयातुनात्यंतसंयोगस्य व्याप्तिस्

कें॰वि॰२०३ यद्येवमिति॰ अकर्मकाणां कर्मशब्दप्रयोगेणैवत्यर्थापगतौ अतिदेशस्वाश्रयसिद्धेरिति भावः॰ तद्रूपासंग इति॰ कर्मशब्दरूपस्यासंगः संबंधः संज्ञात्वमित्यर्थः॰ धात्वर्थयोग इति॰ आसनपूर्वकव्यापने धातोर्वृत्तिरित्यर्थः॰ ननु च न पारीत्याकटमास्ते इत्यपि स्यादत आह॰ नियतत्वाच्चेति॰ भाष्ये एकदेशी वार्त्तिकाशयमाह॰ एवं मन्यत इत्यादिना॰ तर्हि तद्वक्तव्यं कर्मवदिति यदुक्तं तदित्यर्थः॰ उत्तरयति सिद्धांती॰ न वक्तव्यमिति॰ अक

स्वाश्रयमपीति॰ यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति ब्राह्मणकार्याणि क्षत्रिये क्रियंते न तु स्वाश्रयाणि निवर्त्यंते॰ तद्वद् अपि कर्मकार्याणि स्वाश्रयाणि निवर्त्तन्ते नातिदिश्यंते॰ यद्येवमंतरेणापि वतिं स्वाश्रयाणि भविष्यंति नैतदस्ति॰ स्वाश्रयकार्यनिवृत्तये तद्रूपासंग आशंक्येत॰ प्राप्नुवंतीति॰ सकर्मकव्यापनादिष्वेव धात्वर्थयोग आसनादावास्यादीनां वर्त्तनात्स्वाभाविकमेतत्कर्मेत्यर्थः॰ ततश्च मासमास्त इत्यस्य मासमासनेन व्याप्नोतीत्यर्थः॰ नियतत्वाच्च प्रयोगस्य कटं आस्त इत्यादौ आसनमात्रेणांगीकृते क्रियांतरे आसिर्वर्त्तत इति अतिप्रसंगो नोद्भावनीयः॰ किमर्थं तर्हि वार्त्तिककारेणातिदेश आरब्ध इत्यत आह॰ एवं मन्यत इति॰

मिकाणामित्युच्यत इति॰ गत्यादिसूत्रे इति शेषः॰ तत्र योगविभागेन सजातीयापेक्षनियमेन सिद्धे तत्सूत्रेऽकर्मकग्रहणात्कालादिकर्मभिन्नकर्मरहितार्थबोधकानामेव शास्त्रेऽकर्मकग्रहणेन ग्रहणमिति बोध्यत इति भावः॥ ॥ ॥ ॥राम राम॰ १९

८३८

अकर्मकग्रहणं सामर्थ्याद् दलं तावद्विद्यमानकर्मकग्रहणार्थमेव स्यादत आह न चेति॰ एवं च तदर्थासंभव इति भावः॰ तस्मात्सामर्थ्यान्निषेधप्रतियोगिसमर्पककर्मशब्देन मासादीनामग्रहणं तदाह॰ त एवमित्यादि॰ कश्चिदिति॰ कालादीनां कर्मत्वप्रयोजकव्याप्त्यादिरहितेऽर्थे इ

यत्र कश्चिदिति॰ यथा कोऽग्निलुनातीत्यादौ॰ आदित्यमिति॰ न हि दर्शनक्रियया दित्ये प्रत्यक्षानुमानसमधिगम्यः कश्चिद्विशेष उत्पद्यते केवलं दर्शनक्रियया तु मिष्टतमत्वादादित्यः कर्म तद्वत् मासमास्त इति मासोपीत्यर्थः॰ न चेकेचिदिति॰ यद्यपि क्रियामात्रप्रतिपादने कालादीनामंगीभावात्तदभावेनिबंधनमपि संभवत्यकर्मकत्वं तथापि धातूनामन्यपदार्थत्वेनाश्रयणात्तेषां प्रयोगांतरे तदर्थानामेव कालादिसंबंधदर्शनात्तैरकर्मकत्वासंभवात्सामर्थ्याद्विशेषांगीकरणमिति द्रव्यकर्मणा कर्मत्वं विज्ञायत इत्यर्थः॰
क

त्यर्थः॰ इदं गतिसूत्रे निरूपितं॰ यद्यपीति॰ अकर्मकाणामित्यस्य कर्मानन्वय्यर्थप्रतिपादकानामित्यर्थ इत्यभिप्रायः॰ तथापि धातूनामिति॰ धातूनामन्यपदार्थत्वान्क्वचित्कर्मस्पर्शोप्यकर्मकत्वहानेः सामर्थ्यान्न विद्यते द्रव्यकर्म येषामिति विग्रह इति भावः॰ अर्थानामन्यपदार्थत्वेपि भाष्योपपत्तिरुक्तैवेति अवस्थे॰ तदर्थानामेवेति॰ अधिकार्थे वृत्तावपि तदर्थस्यात्यागादिदमुक्तं॰

वैश्न०२०३

द्रव्ये इति· विषयसप्तमीयं सांमथ्यीत् द्रव्यरूपकर्मरहिताइत्यर्थं इतिभावः· शिष्टं भाष्यं कैयटश्च गत्यादिसूत्रे व्याख्यातौ· एतद्भाष्यस्य वा
स्तवार्थोपित्रैवोक्तः· ननु तुल्यन्यायेन कालकर्मणः सकर्मकव्यवहारस्याप्यभावेन तत्र कर्मणि लोन स्यादत आह· यत्रास्त्विति· तत्सन्नि

कचिदिति· द्रव्य इत्यर्थः· अथवेति· अंतरंगत्वाद् द्रव्यकर्मणो बहिरंगस्य कालादेस्तिरोभावात्तदपेक्षः सकर्मका
कर्मकव्यपदेशो न प्रवर्त्तत इत्यर्थः· यत्र त्वंतरंगस्यासंनिधिस्तत्र कालादिनिमित्तः सकर्मकव्यपदेशो भवत्येवे
तिआस्यते मासइति कर्मणि लकारो भवति· अथवा पक्षे नैतिस्य व्यभिचाराभ्यां विशेषणविशेष्यभावेति·
वार्त्तिकं दूषयित्वा सूत्रं स्थापयितुं पृच्छति· न तर्हीति· कोशं कुटिलेति· गुणेनात्रात्यंतसंयोगो न तु क्रिययेति कर्मत्वाभावः·

धातुन तेन व्यवहार इति मासः पच्यते वेदम्मितिनै प्रयोगः· तर्ह्यनयैव कल्पनया सर्वत्र द्वितीयादिसिद्धेः सूत्रं न कार्यमिति पृच्छति· न तर्हीति उत
रयति· यत्राक्रिययेति· न च मासमास्त इत्यादेः प्राकृतकर्मणः शेषत्वविवक्षायां षष्ठीबाधनार्थं तत्रायावश्यकत्वेनाक्रिययेत्य संगतं· क्रियाका
रकभावेन यत्रान्वयाभावस्तदर्थमित्यर्थात्· ॥ ५ ॥

राम० २०

८३९

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी ...

अपवर्गे॥ ॥ निष्ठा समाप्तिः साधनापवर्ग इति· साधनोपरमकृतक्रियात्यागेपीत्यर्थः· क्रियायाएवेति· स्वत एवेत्यर्थः· सच फलप्राप्त्यैवभ
वतीत्यर्थः· साधने आलस्यादिरहिते सत्यपि प्रयोजनलाभेन क्रियाया या समाप्तिः स क्रियापवर्गः· प्रयोजनालाभेन क्रियायाआवश्यक

अपवर्गे॥ ॥ अपवर्गो निष्ठा स कदाचित् फलाप्राप्तौ सत्यां प्रयोजनाभावात्क्रियाया भवति· कदाचिदशक्त्यादिना साधनानामुपर
माद्भवतीति वार्त्तिकारंभः· क्रियापवर्ग इति· यद्यपि साधनापवर्गे क्रियापवर्गोस्ति तथापि विशेषणोपादानसामर्थ्याद्धि शेष आश्री
यते· क्रियायाएवापवर्गो न तु साधनानामशक्त्यादिनिमित्तस्तत्रेत्यर्थः॥ ॥ सप्तमी॥ ॥ अद्य देवदत्त इति· द्रव्यं कारकं तत्रैक
मेवेति भेदनिबंधनो मध्यव्यपदेशो नास्तीति भावः· यं चेति· लक्ष्यं· यतश्चेति· प्रदेशात्· ततश्च लक्ष्यप्रदेशयोः कर्मापादानयोर्भेदान्मध्यव्य
पदेशसद्भावः॥ ॥

त्यपि आलस्यादिना क्रियातो निवृत्तिः साधनापवर्ग इति भेद इति भावः॥ ॥ ६॥ ॥ सप्तमीपं॥ ॥ प्रदेशादिति· सचेह इहेति सप्तम्या निर्दिष्ट इति यद्य
पितस्य स्थितिक्रियायामधिकरणत्वं तथापि वेधक्रियायामपादानत्वमभिप्रेत्य भाष्ये यत इति पंचमीति बोध्यं· क्रोशाल्लक्ष्यमित्यस्य ततः क्रोशादूर्ध्वं वि
द्यमानं लक्ष्यमित्यर्थः· तदुक्तं यन्नाह· कर्मापादानयोरिति·

कै०वि० २०३ भाष्ये साधनशब्देन तद्गता शक्तिरुच्यत इत्याह शक्तिरिति । शक्तेरतीन्द्रियत्वादाह क्रियानुमितशक्तीति ॥ ७ ॥ ॥ कर्मप्र० ॥ लक्षणादिषु द्वितीयेति । वार्त्ति

शक्तिः कारकमिति पक्षाश्रयेण वार्त्तिकं प्रत्याचष्टे । नांतरेण साधनमिति । शक्तिमित्यर्थः । कालभेदभिन्नभु
जिक्रियानुमितशक्तिभेदभ्रमयोग्यस्य व्यपदेशोस्त्येवेत्यर्थः ॥ ॥ कर्मप्रवचनीय ॥ ॥ यदि सामान्येन कर्म
प्रवचनीययुक्ते द्वितीयेति लक्षणं क्रियते तदा वृक्षं परि विद्योतते इत्यत्र विशेषविहितत्वात् संज्ञान्यपाङ्परिभि
रिति पंचमी प्राप्नोति । साधुर्देवदत्तो मातरं प्रतीत्यत्र च साधुनिपुणाभ्यामिति परत्वात्सप्तमी प्राप्नोति । तं आस
ते रिति वक्तव्यं भवतीति मत्वाह प्रत्यादिभिश्च लक्षणादिष्विति । ततश्च पुनर्द्वितीयाविधानात् पूर्वोक्तदोषानवतारः

राम०

केनेति शेषः । भाष्ये तावदुक्तमप्रतेरिति । तत्रत्यः प्रतिर्लक्षणे इत्थमिति सूत्रस्य प्रतिपर्यनूनामुपलक्षणमित्यर्थः । भाष्ये वर्जनार्थ एवेति । तत्रैवार्थे त २१
स्य कर्मप्रवचनीयत्वादिति भावः ॥ ॥ ८ ॥

८४०

यस्मादं ॥ ॥ अन्यतरस्येवेति । अधिरीश्वरे इति ईश्वरसंबंधे कर्मप्रवचनीयत्वविधानेन संबंधस्य च स्वस्वामिनिष्ठत्वेनोभयोः कर्मप्रवच
नीययुक्तत्वेपि यस्य चेश्वरवचनमित्यस्यावृत्तौ भानाभावेनान्यतरस्यैव प्राप्नोतीति भावः । तात्पर्यग्राहकाभावात् भावप्रधानत्वे परितुष्यन्ना
ह । अथ वेति । प्रवृत्तिनिमित्तेनैश्वर्येण हि ईश्वर उच्यत इति ईश्वरवचनशब्देनैश्वर्यमुच्यत इत्यर्थः । यद्वृत्तमैश्वर्यं तद्वाचकात्सप्तमी । तत्रेति ।

यस्मा० ॥ इहाधिब्रह्मदत्ते पंचालाः अधिपंचालेषु ब्रह्मदत्त इति स्वस्वामिनोः पर्यायेण सप्तमी ष्यते । अन्यतरस्यैव तु प्राप्नोतीति विचारः । कि
यते । र्थ इकमिति । तत्र यदांतरेण पिभावप्रत्ययमीश्वरशब्देनैश्वर्यमुच्यते अथ वेश्वर उच्यते तेनेनेति ईश्वरवचनमैश्वर्यमुच्यते तदा स्वामि
नः सप्तमी यथासमर्थो भवति । यदा यस्येत्यनेन स्वं निर्दिश्यते यस्य संबंधी स्व उच्यते तत्र सप्तमी स्वस्य भवति । कर्तृनिर्देशाच्चेदिति । ईश्वरता
त्र कर्तृत्वेनाभिमतः । तेन स्वामिनः सप्तमी स्वस्य भवति । अवचनादिति । एतत्सूत्रारंभेण विनापीत्यर्थः । आयत्ता इति । स्वामिन्याधारे पंचा
लाः स्थिता इत्यर्थः । तत्र चाधिकरणलक्षणा सप्तमी सिद्धेत्यर्थः । सप्तमी शौंडैरिति विकल्पेन समासविधानादधिब्रह्मदत्ते इति ब्रह्मद
त्ताधीना इति च भवति । विभक्त्यर्थवृत्तित्वे त्वधेरधिब्रह्मदत्तमिति च भवति । स्वस्वामिति । अधिकरणत्वं संमन्यते ।
तदेति पाठ उचितः । एतत्सूत्रेणेति । तदे
कदेशयस्येति चेश्वरवचनमिति तदित्यर्थः । ब्रह्मदत्ताधीना इति । अषष्ठ्यत्यादिना ख्युत्तरपदत्वाद्विवः । अत एव परिग्रहीत्रभिनिमित्तेव श्रूयमाणे भाष्य
प्रयोगोपपत्तिः । नन्वेवमभिधानाभावीनावो न स्यादत आह विभक्त्यर्थेति । संमन्यत इति । तत्रीयत्वकोर्थ उपपत्तिर्युक्ते इत्यनुमोदत इत्यर्थः ॥ ॥

कै०वि०२०३

अनुमोदनाकारमाह भाष्येनिस्वमित्यादि· परिग्रहीत्रधीनं परिग्रहीत्राधारकमित्यर्थः· प्रथमाचेति· भाष्ये तु शब्दश्चार्थे इति भावः· स्वत्वारंभे तस्य वैय
र्थ्यं प्रथमानुपपत्तिश्चेति दोषद्वयमिति तत्तीयोवदतीति तात्पर्यं· एतत्सूत्रसत्त्वे हि अधिरीश्वरे इति कर्मप्रवचनीयसंज्ञाविधायकं कार्यं त
थाचाधेः कर्मप्रवचनीयत्वात्तद्योगस्योक्तरीत्या स्ववाचकेपि सत्वाद्द्वितीयाप्राप्नोतीति दोषः· एतत्सूत्राभावे तु ऐश्वर्यविषयाधेः क्रियायोगाभा
वेन गत्यादिसंज्ञाबाधरूपफलाभावात्कर्मप्रवचनीयसंज्ञायाअप्यभावेन कर्मप्रवचनीययोगाभावाद्द्वितीयाप्राप्तौ प्रथमासिध्यतीति भावः·

प्रथमानुपपत्तिश्चेति· सप्तमीविधानमनर्थकं प्रथमा चस्वान्न प्राप्नोतीति दोषद्वयोपन्यासः· अधिरीश्वरवाचीति· स्वामीश्वरे त्यर्थे
ग्रहणात्पर्यायाणामपि ग्रहणं मन्यते· षष्ठीतर्हीति· स्वस्वामिसंबंधसद्भावात्· अशेषत्वादिति· प्रातिपदिकार्थमात्रनिष्ठत्वाद्व्यतिरे
काभावात्· द्वितीयातर्हीति· अधिरीश्वर इत्यधेः कर्मप्रवचनीयत्वात्·
भाष्ये कातर्हि स्यात्षष्ठी सप्तम्याविस्वादिरेकदेशयुक्तिः· अधिपतिदा
याइति· प्रस्ययोदायादः सतद्धनादिस्वामित्वात्स्वामीतिलोके व्यवह्रियतइति ईश्वरपर्यायाविमाविति भावः· व्यतिरेकाभावादिति· भेदसंबंधे
नेतरान्वयित्वाभावादित्यर्थः· ननु ईश्वरत्वद्योतकस्येश्वरापेक्षया कर्मप्रवचनीयस्याधेः कथं पंचालसंबंधद्योतकत्वं येन ततो द्वितीयास्यादत
आह· अधिरीश्वर इत्यधेरिति· ऐश्वर्यविषयार्थद्योतकस्याधेरिति तदर्थं इति भावः· एवं च परस्परं प्रतियोगिकसंबंधस्य परस्वरानिष्ठस्य तेन द्योत
नादस्य वेतस्मादितिभावः·

उभयगतस्य संबंधस्येति· विशेषणादुत्पन्नयाषष्ठ्येवेति भावः· भाष्ये ऽधेर्ब्रह्मदत्तस्य चेति· अधेर्योत्योब्रह्मदत्तनिष्ठः संबंध इत्यर्थः· एवमग्रेपि
चस्तुतः यत्रापि वाक्यालंकारे· ईशितव्यस्येति· ऐश्वर्यविषयाधेः कर्मप्रवचनीयत्वमितितदर्थः षष्ठी तु विशेषणादुत्पन्ना प्युभयगतं संबंधं साम
र्थ्याद्बोधयति· परत्र तद्बोधकविभक्त्यविधानाद· अनुपरत्रापितद्बोधकाविभक्तिः प्राप्याविशेष्यविष्टसंबंधबोधकत्वेनाविशेषणनिमत्तेति

सप्तम्येति· ब्रह्मदत्तशब्दादनेन द्वितीयापवादेन विधीयमानयासप्तम्योभयगतस्यसंबंधस्याभिधानात्पंचालशब्दाद्द्वितीया न भव
तीत्यर्थः· नवेति· अधिरीश्वर इत्यत्रेश्वरेऐशितव्यस्याक्षेपादीशितव्यस्याप्यधिना योगोस्तीति भावः· इदानीं द्वितीयं वाक्यार्थं दर्शयितु
माह· स्ववचनादिति· यस्येश्वरवचनमित्यनेन स्वस्य सप्तमी प्रकृतित्वेन वचनात्प्रतिपादनात्· स्ववचनानुसिद्धमित्येतदप्यन्यथा व्या
ख्यातुमाह· एवं तर्हीति· अधिरीश्वर इत्यत्रेश्वरग्रहणमपनीयाधि स्व इति वक्तव्यं· तत्र स्वामेव प्रत्यधिः कर्मप्रवचनीयसंज्ञः· तस्मादे
वानेन सप्तमीविधीयते· तेन स्वामिनं प्रत्यधेः कर्मप्रवचनीयत्वाभावात्ततो द्वितीयाया अभावः· तेनाधिपंचालेषु ब्रह्मदत्त इति सिद्धं· अधि
ब्रह्मदत्ते पंचाला इत्येतदधिकरणसप्तम्यासिद्धं·
तात्पर्यं· द्वितीया प्रथमापवादिकापीत्यभिमानः· सूत्रे स्वपदानुपादाने कथं स्ववचनात्सप्तमीत्यत आह· यस्येति· तत्र द्वितीया प्राप्नोतीत्यं तं भाष्यं पू
र्ववदेव व्याख्येयं· अत्र पक्षे द्वितीयावारणाय भाष्ये एवं तर्हीति· स्ववचनादिति वार्त्तिकमेवैतद्दोषवारकमपीति व्याचष्ट इत्याह· अन्यथा
व्याख्यातुमिति·

कौ०वि०२०३

भाष्ये एवमपीति· अधेः स्वं प्रति कर्मप्रवचनीयत्वादिति भावः· ननु संज्ञाविधानसामर्थ्याद्द्वितीयां प्रथमां बाधेतेत्यत आह· कर्मप्रवचनीय
संज्ञात्विति· तद्योगे यदविधेस्तस्याः संज्ञायाः द्वितीयाविधावनुपस्थानमित्यर्थः· उपपदविभक्तेरितिन्यायेनेव षष्ठी शेष इति सूत्रे वक्ष्यमाण
यापुरुषादिप्रधानपदात्षष्ठी वारकमुक्तमप्यत्र द्वितीया वारयितुं शक्नोतीति बोध्यं· यथाधिकरणत्वमिति· केचित्तु अधिकरणसप्तम्यां संज्ञासूत्रे
णावेन सूत्रप्रत्याख्यानेनाप्यर्थे सति स्वं प्रति कर्मप्रवचनीयत्वेनोपन्यस्येत· तस्मात्स्वस्वामिभावविवक्षायां आधारत्वाविवक्षायां सप्तम्य

अत्र तु दोषमुद्राव्यपरिहरति· एवमपीत्यादिना भविष्यतीत्यंतेन· तिष्ठतिसंमितिवेति स्यानादिक्रियापेक्षयापंचालानां कर्तृत्वात्कारकविभ
क्तिः प्रथमेति भावः· कर्मप्रवचनीयसंज्ञात्वधिपंचालेषु ब्रह्मदत्त इत्यत्र चारितार्थ्यां यथाधिकरणत्वं द्वयोरपि स्वस्वामिनोर्दर्शितं तथाधिरी
श्वरइति यस्य चेश्वरवचनमिति चन कर्तव्यं· ऐश्वर्यविषयस्य चाधेः क्रियायोगाभावात् उपसर्गसंज्ञाबाधनार्थोपि संज्ञाविधिर्नोपयुज्यते·

र्थे यस्य चेश्वरवचनमधिरीश्वरइति च सूत्रद्वयं कार्यविनिगमनाविरहेण च सूत्रद्वयस्यापि प्रत्याख्यातार्थे तास्पर्यमिति तेन भाष्यतात्पर्यं लभ्यते न तु प्रत्याख्या रा·म०
ने· अधिरीश्वर इत्येतदीश्वरत्वे द्योत्ये ईश्वरे योत्स इति वाऽव्याख्येयं· अतएव स्वं प्रति कर्मप्रवचनीयत्वं लभ्यते किंचाधिकरणसप्तम्यां पंचालेषु द्वि २३
तीयावारकपुत्त्वे पंचालेषु सप्तम्या ब्रह्मदत्तादपि वारयितुं शक्यत्वेन स्वचनानुसिद्धमित्यस्या पुत्त्वेन एव भाष्यतात्पर्यमित्याहुः॥९॥१०॥१९॥

८४२

गत्यर्थक॥ गतत्वर्थध्वादिभ्यो द्वितीयापि न स्यादत आह· द्वितीयेति· भाष्ये वीवधेनेति· पर्याहार्यश्च मार्गश्च विवधौ वीवधौ च ताविलामरः· पर्या
हाराध्वभारेपुंसमौ विवधवीवधौ इति नानार्थकोशः· भाष्ये पथे गच्छतीत्येवं तत्र भवितव्यमिति· एवकारो भिन्नक्रमः इति तत्र भवितव्यमेवेत्यर्थः·
प्रत्याख्यातइति· तथाचैतत्फलसाधकतद्वचनारंभेणैतद्वचनप्रत्याख्यानं न चमत्कारीति भावः· न्यायस्येति· तत्फलस्यान्यथासाध

गत्यर्थ॥ ॥स्वं रूपमिति वचनात्स्वरूपस्यैव ग्रहणं प्राप्तमित्याह· अध्वन्यर्थग्रहणमिति· तेनाध्वपर्यायेभ्योपि चतुर्थीप्रतिषेधोभ
विष्यति· द्वितीया तु कर्मणि द्वितीयेति भवति· आस्थितप्रतिषेधश्चेति· आस्थित आक्रांतः सन्यदापंथागम्यते तदा नध्वनीति प्रतिषे
धः यदा तूत्पथेन पंथा आक्रमितुमिष्यते तदा नवत्वेन चतुर्थी· किमर्थमिति· अंतरेणाप्येतत्सूत्रं द्वितीयाचतुर्थ्योः सिद्धत्वादिति प्रश्नः
क्रियाग्रहणमपीति· यद्यपि तत्र क्रियाग्रहणं प्रत्याख्यातं तथापि तत्रैव न्यायस्योक्तत्वाद्वचनमाश्रित्यास्य सूत्रस्य प्रत्याख्यानेकृतं· अथ
वा तत्र त्वन्याय्यत्वप्रत्याख्यानार्थमिदमुक्तं· तत्र यदागमनस्य संदर्शनादीनां च भेदो विवक्ष्यते तदा संदर्शनादिभिः क्रियाभिराप्यमानत्वात्कर्म
णा गमनेनाभिप्रेयमाणस्य ग्रामस्य संप्रदानत्वाच्चतुर्थी भवति· नेनतद्वचनप्रत्याख्यानाच्चात्रापूर्वेतत्कर्तव्यं भवतीति भावः· तदेवध्वन
यन्व्याख्यांतरमाह· अथवेति· न्यायमेव दर्शयति· तत्र यदेति· भेद इति· संयोगानुकूलव्यापारात्मदोभेदो विवक्ष्यत इत्यर्थः· एतच्चकर्तुरीप्सि
तमिति सूत्रे संप्रदानसंज्ञासूत्रे च निरूपितं ततएवावधार्यं· संयोगश्च कर्तृनिष्ठएव फलत्वेन विवक्ष्यते इत्यपि बोध्यं· अन्यथा परत्वात्कर्मत्वमेव स्यादि

कै०वि०२०३

यदाल भेदेति॰ ग्रामनिष्ठसंयोगानुकूलत्वेनैव यदा विवक्ष्येत्यर्थः॰ अत एवेति॰ चतुर्थी वेति वक्तव्ये द्वितीयाग्रहणमपवादकर्तृकर्मणोरिति षष्ठीविषये कृद्योगेपि द्वितीयार्थमिति न च्योंख्यानीयं प्रत्याख्यानेन भिन्नफलत्वादित्याशयः॰ अप्रत्याख्यानीयमिति पाठांतरे तु चतुर्थी वेति न क्वे

यदा त्वभेदविवक्षा तदा गमनस्य कर्मत्वाभावाद्ग्रामः कर्मैव भवतीति द्वितीया भवति भेदाभेदविवक्षा च लौकिकप्रयोगानुसारेण नियतविषयेत्यारंभप्रत्याख्यानयोर्नास्ति फलभेदः॰ अत एवापवादविषयेपि द्वितीयाविधानार्थं चतुर्थी चेति वक्तव्ये द्वितीयाग्रहणं प्रत्याख्यानेन भिन्नफलत्वादप्रत्याख्यानीयं॰ इदानीं सत्रस्यातिव्याप्त्युद्भावनायाह॰ चेष्टायामिति॰ सिद्धं स्थिति॰ असंप्राप्तं यदुत्सु गमनेन संप्रेप्सते तस्मिन् कर्मणीत्यर्थः॰ स्त्रीं तु संप्राप्तोतिचतुर्थ्यभावः॰ अनांनपतीत्यत्रापि जायाः संप्राप्त्या चतुर्थ्यभावः॰ अथ वानपतिर्गत्यर्थ एव न भवति प्रतीपतेरत्र गतिः॰ न त्वसौ नपतेरर्थः॰ तस्य प्रापणवाचित्वादित्याह॰ अध्वनश्चेति॰ यदा त्वसंप्राप्तोध्वा भवति तदा भाष्ये च चतुर्थ्यां ध्वनेगच्छतीतिप्रागेवोक्तं॰

द्वितीयाग्रहणमपवादविषयेपि द्वितीयाविधानार्थमिति न भवति॰ तस्य तथात्वे हि प्रत्याख्यानेन सह भिन्नफलत्वादिदं सत्रमप्रत्याख्यानीयं स्यादिति योजना एवं च भाष्यमतेग्रामस्य गंतेत्यादौ षष्ठ्येवेति भावः॰ अथ वानपतिरिति॰ एतन्नगतीत्यत्र निरूपितं॥ ॥१२॥ ॥ राम० २४

८४३

चतुर्थीसं॥ ॥तादर्थ्यशब्दार्थमाह॰ तच्छब्देनेति॰ कार्यप्रयोजनमिति बहुव्रीहिः॰ कार्यप्रयोजकमित्यर्थः॰ ब्राह्मणाय दधीत्यादौ दध्नो ब्राह्मणत्वाभावादुक्तं विशिष्टकार्येति॰ भोजनविशिष्टो ब्राह्मणस्तत्रापि कार्यमिति भावः॰ स अर्थो यस्येति बहुव्रीहिस्तु नोक्तः॰ तत्पुरुषस्यांतरंगत्वात्॰ यथा षष्ठी

चतुर्थीसं॥ ॥तादर्थ्य इति॰ तच्छब्देन कार्यं निर्दिश्यते तस्मा इदं तदर्थमिति॰ समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते तदर्थस्य भावस्तादर्थ्यमिति कार्यकारणसंबंध उच्यते समासकृत्तद्धितेषु संबंधाभिधानमिति वचनात्॰ तत्रोद्भिष्टत्वेपि संबंधस्य यथा षष्ठी विशेषणादेव भवति न तु विशेष्यात् राज्ञः पुरुष इति तथा चतुर्थी यूपाय दार्विति॰ हेताविति तृतीयापि दारुशब्दान्न भवति॰ हेतुहेतुमद्भावस्य चतुर्थ्येव गमितत्वात्॰ प्रातिपदिकार्थव्यतिरेके च हेतुतृतीयाविधानाद्दिह च प्रातिपदिकार्थव्यतिरेकाभावात्॥ ॥ ॥

ति॰ विशेषणनिष्ठतयैव संबंधस्योद्भूततया प्रतीतेरिति भावः॰ विभक्त्यभिधानेपि तद्धितादिभिरनभिधानाद्धेतौ तृतीया स्यादेवेत्यत आह॰ प्रातिपदिकार्थव्यतिरेके चेति॰ षष्ठीविषये हेतुतृतीयाविधानादिति भावः॰ प्रातिपदिकार्थेति॰ हेतुत्वेनेतरान्वये च तृतीया भवति एतदर्थस्य च क्वचिदर्थे तेनान्वयाभावादिति भावः॰

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारकम्

उक्तमर्थं श्लोकाभ्यां संगच्छते। तस्मायीति। उपकार्यं हीति। विद्यमानमेव यत्किंचिदुपकारविशिष्टं कार्यमित्यर्थः। तेन घटाय दंड इत्यादि नेत्याहुः। मोक्षाय हरिं भजतीत्यादौ क्रियया यमिति संप्रदाने चतुर्थी बोध्या। गम्यमानविभक्तित्वादिति। चतुर्थी तदर्थेति सूत्रेण ज्ञाप्यमानविभक्तित्वादित्यर्थः। तद्धितापकं कार्यवाचका चतुर्थ्याः समासमेव संगच्छत इति भावः। तदनुवादेनेति। तदर्थानुवादेनेत्यति॥

॥ तस्मादुपकार्यं हि कार्यं प्रत्यक्षमभ्यते। तदर्थशब्दासंबंधे भावप्रत्यय इष्यते। गम्यमानविभक्तित्वाच्चतुर्थी कार्यवाचिनि। गुणीकृतास्य दातस्मात्कारणेनावयाहते। किमिदमिति। तस्माधिदमित्यस्याच्चतुर्थ्याः समासः। सति समासे तदनुवादेन चतुर्थीविधानमितीतरेतराश्रयत्वं भत्वा प्रश्नः। अपक्तस्यापीति। संबंधसामान्यविवक्षायां षष्ठ्यस्ये व॰

र्थः। नित्यशब्दत्वेनान्यत्रोक्तेनात्रापीतरेतराश्रयपरिहारः सुकरस्तथापि कार्यवादेऽपि परिहर्तुमाह। तत्तर्हीति। चतुर्थीविधायकमन्यद्वचनमित्यर्थः। वस्तुत इतरेतराश्रयत्वमेव नेत्याह। न खल्वपीति। यदि चतुर्थीसमासं विनान्यः समासो न स्यात् स्यादेवेतरेतराश्रयं॰ राम॰ २५
अस्ति चात्र षष्ठीसमास इत्याशयः। नन्वत्र षष्ठी कथमित्यत आह। संबंधसामान्येति। तादर्थ्यत्वेन बोधे चतुर्थी संबंधत्वेन बोधे षष्ठीति भावः।

षष्ठीसमासोऽप्येतद्विषये शब्दशक्तिस्वभावान्नित्यसमास इत्याशयेनाह। भाष्ये गुरोरिमिंदेति। भाष्ये यान्येनेति। रुच्यर्थानां प्रीयमाणः कर्मणि यमभिप्रैतीति संज्ञाविधानं तु दाशगोघ्नौ संप्रदान इत्यर्थं तत्त्वं प्रदानकं दानमिति बोधार्थं च। दानकर्मलोगवादेः संप्रदानार्थत्वेऽपि दानक्रियायास्तदर्थत्वाभावे चतुर्थ्यर्थता धर्मस्य दानक्रियान्वयानापत्तिरिति तदन्वयार्थं चेति दिक्। भाष्ये यदयमिति। यद्यपि समासः प्रकृतिवि

क्लृपीति। संपत्तिरभूततद्भावः उत्पत्तिरिह गृह्यत इति विकाराच्चतुर्थी विकारस्य च प्रकृतिरूपारोपात्सामानाधिकरण्यं पुपजायते। पञ्चरूप। ततश्चतुर्थीति प्रकृतेर्न भवति॥ ॥

कृतिभाव एव तथापि तत्तज्ज्ञाप्या चतुर्थी सर्वत्रेति भावः। क्लृपि। संपत्तिशब्देनाभूततद्भाववत् उत्पत्तिरुच्यत इत्याह। संपत्तिरिति। नन्वेवं प्रकृतिविकृत्योर्भेदसत्त्वेनाभेदान्वयोऽनुभवसिद्धो भज्येतेत्यत आह। विकारस्य चेति। तथा च प्रकृतौ विकारसमानाधिकरणत्वात्तत्र प्रथमा विभक्तेरपवादोऽयमिति भावः। विरुद्धार्थकविभक्तिराहित्याच्च सामानाधिकरण्येनान्वय इति बोध्यं। ननु सामानाधिकरण्ये प्रकृतेरपि चतुर्थी स्यादत आह। पञ्चरूपमिति॥ ॥

पे०वि०२०३ अपादानविवक्षेति॰ अपादानपदेन शक्तिः कल्पे रूसत्यर्थत्वेऽइदं॰ अत्र वदंति॰ कल्पत इत्यादेः परिणमत इत्यर्थः॰ परिणामश्च रूपां
तरप्राप्तिः तदेकदेशो रूपांतरे मूत्रादेर्विकारस्याभेदेनान्वयेन ततो द्वितीयापो प्राप्तापां तद्बाधेन चरितार्थाच्चतुर्थी अभेदविवक्षायां
परत्वात्प्रथमया बाध्यते॰ यवागूर्मूत्रं कल्पत इत्येव हि तदा॰ ध्वनितं चेदं हरदत्तेन॰ कल्पे रूसत्यर्थे चेजनिकर्तुरिति प्रकृतेः पंचम्याम
पि विकृतिवाचकात्परत्वादुपपदविभक्तेरितिन्यायाच्च प्रथमैवेति दिक्॰ अन्ये त्वित्थमाहुः यवागूरुचिः प्रकृत्यादित्यत्र इति तन्नीया

यदा तु प्रकृतेरपादानविवक्षा तदा [redacted] विकाराच्चतुर्थी न भवतीति केचिदाहुः अन्ये तु विरोधाभावात्तत्रापि चतुर्थीमिच्छंति।

वत्प्रथमापवादो ष्येवेत्यपरे॰ यद्यपि दारूपयोरिव यवागूमूत्रयोः प्रकृतिविकारभावोऽस्ति तथापि यवाग्वां मूत्रार्थत्वाभावान्न तादर्थ्ये राम०
र्थ्ये चतुर्थ्याः स्यगतार्थता॰ एवमुत्पातेन ज्ञापित इति इति वचनस्य सार्थकत्वम्॰ हितयोगे चेति॰ इदं तस्मै हितमिति निर्देशात् ज्ञापकात्सि
द्धमित्याहुः॰ अरोचकोरोगाख्यायामिति एवुल्॰ लोकतो नपुंसकत्वं॰ तमैतो इत्यर्थं इतिः सर्वत्रामयस्योपसंख्यानमित्यामयशब्दाद्धिनिः॰ अन्यत्रापी २६
तिदीर्घः॥ ॥२३॥२४॥२५॥ ॥

८४५

नमः स्वस्ति॥ ॥पूर्वविप्रतिषेधार्थं नचेनेदं सिद्धमिति कश्चित्॰ अलं तेदनेनेति॰ रोदनं मा कुर्वित्यर्थः॰ एवं चात्र तृतीया कथं तस्मा
द्रोदनेन साध्यं नास्ति अतस्त्वन्मा कुर्वित्यर्थः॰ भाष्येपर्याप्त्यर्थग्रहणमिति वार्तिकस्य द्वैधाव्याख्यानेन प्रभ्वादियोगे षष्ठ्यपीति ध्वनितं॥ ॥१६॥
मन्यकर्म॥ ॥भाष्ये इहापीति॰ यद्यपि प्राण्यप्राणिषु उभयत्राप्याद्येनैव सिद्धे उत्तरयोगेनाद्यस्यानित्यत्वाज्ञापनात्॰ क्वचिदेवप्रवृत्ति

नमः॥ ॥स्वस्तियोग इति॰ पूर्वविप्रतिषेधार्थवचनं॰ स्वस्ति जाल्माये ति॰ तत्कथनमिदं जाल्मत्वादाशीरभावः अलमिति॰ भूषणप्रति
षेधवाचिनोऽलंशब्दस्य निरासार्थं वचनं॰ तेनालं कुरुते कन्यामलं रोदनेनेति चतुर्थी न भवति॰ नन्वत्रोपपदविभक्तेः कारकविभक्तिर्बलीय
सीति चतुर्थी न भविष्यतीत्याह॰ अपर आहेति॰ सत्रेऽलंशब्द भयनीयपर्याप्त्यर्थग्रहणं कर्तव्यं॰ तेन तत्पर्यायाणामपि ग्रहणं सिध्यति अन्य
थास्वरूपस्यैव ग्रहणं स्यात्॰ अथ नालमित्यर्थग्रहणं व्याख्येयमित्यर्थः॥ ॥मन्य॥ ॥एवं तर्हीति॰ योगविभागेन प्राणिविषया विभाषा
क्रियते न त्वा शुने मन्ये न त्वा श्वानं मन्य इति अप्राणिष्वित्यनेन त्वप्राणिविषया नित्यात्॰ ण यमन्ये न त्वा तृणं मन्य इति इहापीति॰ [illegible]येन योगेनेति भावः

रीतिनत्वा काकमित्यादौ नातिप्रसंगस्तथापि योगविभागं विनापि सर्वसमाधाने वक्तुमयमुपक्रमः॰ अत्र भाष्ये येषु प्राणिषु नेष्यते इ
त्यत्र बहुवचनेन शुक्काकातिरिक्तप्राणिन्यपि निषेधो ध्वनितः॰ तदपि मेत्येव वृत्तौ शृगालशब्दउदाहृतः॥ ॥श्रीराम॥ ॥

के॰वि॰२०३ भाष्येन त्वां नावं मन्ये यावत्तीर्णं न नावमिति · यावत्प्रयत्नो नाव्यं नावा स्वल्पया नौकया मातार्यमपि तत्र यामहत्यापि न तीर्णमनत्वां नावमुडुपमपि न मन्ये
इत्यर्थः नौशब्दनोडुपं स्वल्पनौकोच्यते त्वांशब्दार्थस्तु महती नौरेवं स्यनादरो भवतीत्याहुः एवं न त्वान्नं मन्ये यावद्भुक्तं न श्वाङ्गमित्यस्य यतः श्वा
ङ्गुश्वाङ्गीयैर्विप्रैर्नतु कं अन्नत्वां अपूपरूपमन्नमोदनमपि न मन्ये इत्यर्थः प्रकृष्यकुत्सितेति · परावरयोगे चेतित्वा · अतिशयविशिष्टकुत्सि

तदेवं योगविभागेपि दोषदर्शनात् न्यासांतराश्रयणेनेष्टं साधयितुमाह · यदेतदिति · प्रकृष्टकुत्सितग्रहणमिति · यद्वाचिनश्चतु
र्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतिपाद्येत तदा चतुर्थी भवति न तु साम्याविवक्षायां तेन प्रतिषेधपुक्तायां कुत्सायां चतु
र्थीविधानेसंपद्यते · कश्चित्प्रतिकूषेति पाठस्तत्रायमर्थः तृणादरपि निकृष्टत्वं यदा प्रति · पिपादयिषितं भवति तदा चतुर्थी न
तु साम्यविवक्षायां · प्रकृष्येति · निकृष्येत्यर्थः · मन्यकर्मण्यनादर उपमाने विभाषा प्राणिष्वित्यापिशलिरधीते स्म ॥ ॥ ॥ ॥
इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥ ॥१॥ ॥ ॥ ॥ ॥

तत्वे प्रतिपाद्ये इत्यर्थः · तदाह · यद्वाचिन इति · त्वां तृणमिव मन्ये इत्यादावप्यनादरस्य सत्वाद्वार्त्तिकारंभ इति भावः · आपिशलिवाक्येनोपमानवा राम
चकात्तनोपि तिरस्कारे चतुर्थी त्युच्यते ॥ ॥१७॥ ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टविरचिते भाष्यप्रदीपोद्योते द्वितीयस्य तृतीये प्र २७
थममाह्निकम् ॥ ॥१॥ ॥ ॥

८४६

कर्तृकरणयोः ॥ ॥ क्रियापदेति · क्रियानध्याहारे विभक्त्यंतरबाधनाय वार्त्तिकमिति भावः · अभिरूपादिकत्तु गुणेन किं येति तात्सर्ये · षष्ठ्यत्रे ॰
ति · प्रकृतिसंबंधी अभिरूप इति बोध्या ~~[illegible]~~ दिति भावः · प्रथमा षष्ठी वेति · गोत्राभिन्नगर्गापत्यमिति बोधेऽस्याद्या · सामान्यविशेष

कर्तृकरणयोः ॥ ॥ प्रकृत्याभिरूप इति · क्रियापदाध्याहारेण त्वकर्तृकरणयोरभावात्षष्ठ्यत्र प्राप्नोति · प्रायेणेति · प्रायशब्दो
बह्वर्थवाची बहुवो याज्ञिका इत्यर्थः तत्र प्रथमा प्राप्नोति · गोत्रेणेति · प्रथमा षष्ठी चात्र प्राप्नोति · समेनेति · द्वितीया प्राप्नोति
द्विद्रोणेनेति · द्वयोर्द्रोणयोः समाहारो द्विद्रोणं पात्रादित्वात्स्त्रीत्वाभावः अत्रापि द्वितीया प्राप्नोति · पंचपरिमाणमस्य पंच
कः संघः तत्र द्वितीया प्राप्ता · पशवस्तिष्ठंतेनेनेत त्समानाधिकरणं · संघसंघिनोरभेदस्याविवक्षणात् ॥ ॥ ॥
पंचकेनेति ·

भाव संबंधेन बोधो गोत्रसंधि गार्ग्यपत्यवानिति बोधे त्येति भावः · गोत्रशब्देनागस्त्याष्टमसप्तर्ष्यपत्यं · अत्रापीति · परिच्छेद्यपरिच्छेदकयो
रभेदोपचारेण द्विद्रोणमिन्नमिति अर्थात् · पंचकेसंख्यायाः अतिशयदंतायाइतिकन् ॥ ॥ ॥ ॥

कै॰वि॰२०३ भाष्येन त्वां नाथं मन्ये यावती र्लिननास्यमिति॰ यावत्यतो नाथं नानास्त्वस्त्य भो कुमातार्थमपित यामहत्यापि नती र्लमन त्वां नाथमुदुपमपिनमन्ये इत्यर्थः नौ शब्दे नौ दुपं स्वत्यनौ को च्यते त्वांश ब्दार्थ स्तु महती नौ रेवं स्वनादरो भवती त्याहुः एवं न त्वान्नं मन्ये यावद्भुक्तं न श्वाडमिति स्यपतः श्वा द्दृश्वाद्धी यैर्वि प्रेर्न तु कं श्वतस्त्वां श्वपूपरूपमन्नमोदनमपि न मन्ये इत्यर्थः प्रकृष्यकुत्सितेति॰ परावरयोगे चेति॰ श्वातिशायविशिष्टकुत्सि

तदेवं योगविभागे पि दोषदर्शनात् न्यासांतराश्रयणेनेष्टं साधयितुमाह॰ यदेतदिति॰ प्रकृष्यकुत्सितग्रहणमिति॰ यद्यपि न श्चतु र्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतिपाद्येत तदा चतुर्थी भवति न तु साम्यविवक्षायां तेन प्रतिषेधयुक्तायां कुत्सायां चतु र्थी विधाने संपद्यते कुत्सितत्वशेषेति पाठ स्तत्राप्ययमर्थः॰ तृणादेरपि निकृष्टत्वं परा प्रति पिपादयिषितं भवति तदा चतुर्थी न तु साम्यविवक्षायां॰ प्रकृष्यति॰ निकृष्ये त्यर्थः मन्यकर्मण्यनादर उपमाने विभाषा प्राणिष्विति त्यापिशलिरधीते स्म॥ ॥ ॥ ॥
इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्॥ ॥१७ ॥ ॥ ॥

तत्वेप्रतिपाद्य इत्यर्थः तदाह॰ यद्यपि नेति॰ त्वां तृणमिव मन्य इत्यादावप्यनादरस्य सत्वाद्भूतिकारं भ इति भावः आपिशलिवाक्येनोपमानवा चकात्ततोपि तिरस्कारे चतुर्थी त्युच्यते॥ ॥१७॥ ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टविरचिते भाष्यप्रदीपोद्योते द्वितीयस्य तृतीये प्र थममाह्निकम्॥ ॥१॥ ॥ ॥

राम
२७

८४६

कर्तृकरणयोः॥ ॥ क्रियापदेति॰ क्रियानध्याहारे विभक्त्यंतरबाधनाय वार्तिकमिति भावः अभिरूपादिकतु गुणेन क्रियेति तात्पर्ये॰ प्रश्न इ ति॰ प्रकृतिसंबंधी अभिरूप इति बोधा [illegible] दिति भावः प्रथमा षष्ठी वेति॰ गोत्राभिन्न गार्ग्यपत्यमिति बोधे श्वाद्या॰ सामान्य विशेष

कर्तृकरणयोः॥ ॥ अब्रुत्याभिरूप इति॰ क्रियापदावेश्रेणत्कर्तृकरणयोरभावात्सष्ठ्यत्र प्राप्नोति॰ प्रायेणेति॰ प्रायशब्दो बहुर्थवाची बहवो यात्रिका इत्यर्थः तत्र प्रथमा प्राप्नोति॰ गोत्रेणेति॰ प्रथमा षष्ठी वात्र प्राप्नोति॰ समेनेति॰ द्वितीया प्राप्नोति द्विद्रोणेनेति॰ द्वयोर्द्रोणयोः समाहारो द्विद्रोणं पात्रादित्वात्स्त्रीत्वाभाव॰ अत्रापि द्वितीया प्राप्नोति॰ पंचपरिमाणमस्य पंच कः संघः तत्र द्वितीया प्राप्ता॰ पशव्निति नेनैतत्समानाधिकरणं॰ संघसंघिनोरभेदस्य विवक्षणात्॥ ॥ ॥
पंचकेनेति॰ २

भावसंबंधेन बा गोत्रसंधिमार्ग्यत्ववानिति बोधे त्येति भावः गोत्रशब्देनागस्त्याष्टमसप्तर्ष्यपत्यं॰ अत्रापीति॰ परिछेद्य परिच्छेदकयो रभेदोपचारेण द्विद्रोणभिन्नमिति अर्थात्॰ पंचके संख्यायाश्च तिशदंतायाइति कन्॥ ॥ ॥ ॥

कैगवि०२०२ एषतत्रप्राय इति। तत्रोदाहरणे एषप्रायपदार्थोयेनहेतुनाध्येयत इत्यर्थः। तत्राध्ययनस्येति। अधीयत इतिक्रियाध्याहार इतिभा
वः। बहुभिरध्ययनेग्रहणधारणयोः सौकर्यं भवतीतिबाहुल्यं तत्त्वेनाविवक्षितमितिबोध्यं। एतेनाहसंज्ञायेइति। अहं माठर इतिगोत्रे

साहस्रेणेति। सहस्रपरिमाणः संघः साहस्रः शतमानविंशतिकेत्यण्। पूर्वेन दत्रत्तृतीयाप्राप्तिः प्रकृतिकृतमिति। गम्यमा
नापिक्रियाकरणं दिव्यपदेशनिमित्तं भवति यथा प्रविशपिंडीमित्यत्र। इहेच्च करणं तरव्युदासायप्रकृते रेव करणत्वं वि
वक्षितं। स्वभावेनार्यंकृतोभिरूपो न तु वस्त्रालंकरणादिनेत्यर्थः। एषतत्रप्राय इति। बाहुल्यमित्यर्थः। तत्राध्ययनस्य करणत्वे
नविवक्षितं। इदमत्रेति। प्रतीयमानत्वाद्द्रोणे पंचकसाहस्रशब्दात्तत्क्रयार्थे मूल्ये उपचारादृत्त इतिकरणत्वात्तृतीयासिद्धिः।

णपरेः संज्ञायेइत्यर्थः। अप्रयोगे हेतुमाह। प्रतीयेति। अत्रकश्चित्। एवं रीत्याकरणत्वादिसंपादने हेत्वामितिसूत्रस्यैवमूलं लक्षणद् राम०
त्यस्य च वैयर्थ्यापत्तिर्यदि तत्र द्रव्याद्यन्यथाविवक्षायां सार्थक्यं तर्ह्यत्राप्यतिप्रसङ्ख्यानमत्रसिद्धौत्येकदेशयुक्तिरेवेति। संबंधसामान्यवि २८
वक्षायां षष्ठीबाधनार्थमावश्यकत्वाच्चेत्याहुः। अनभिधानेनभगवता प्रत्याख्यानमित्यन्ये॥ ॥१८॥

८४७

सहयुक्तेऽप्रधाने॥ ॥ननुमाषाणामिवतिलानामपि वापक्रियये प्सितत्वादप्राधान्यमसिद्धमत आह। तथायुक्ततयेति। वस्तुतः सहा
र्थविशेषत्वेणेमप्राधान्यमितिनदोषः। ननुवापापेक्षयाकर्मत्वेन मिश्रीकरणस्यचतदर्थत्वेनाप्राधान्याच्यायविरुद्धात्तृतीयेत्याशंक्य

सहयुक्तेऽप्रधाने॥ ॥किमुदाहरणमिति। सूत्रांतरेणतृतीयासिद्धिं मत्वा पृच्छति। तिलैः सहेति। अत्रमा
षाउप्यमानत्वात्प्रधानं कर्मतिलास्तु तथायुक्ततयावृक्षमूलानीवोपसर्पत्ते। अप्रधानकर्माणीतिद्वितृ
यायां प्राप्तायां तृतीयाविधिः। तिलैर्मिश्रीकृत्येति। अंतरंगत्वात्पूर्वंमिश्रणक्रियायांतिलाः करणत्वं प्रति
पद्यंते पश्चाद्वपनक्रियायां कर्मत्वमिति सिद्धा तृतीयेत्यर्थः। पुत्रेण सहागत इति। पितुरेवात्रागमनक्रि
यायां शाब्दं कर्तृत्वं न तु पुत्रस्येत्यप्राप्तातृतीया विधीयते॥ ॥ ॥

ह। अंतरंगत्वादिति। अंतरंगत्वोपपादनमेव पूर्वंमित्यादि।
पूर्वंमिश्रणक्रियाऽसंबंधे तदर्थत्वमपि न स्यादितिभावः। ननुपुत्रस्येतीति। तस्यसहार्थबलादनुमीयमानं कर्तृत्वमिति तृतीया
अप्राप्तिरितिभावः॥

कै०वि०२०३ एकेनशब्देन· क्तेन· गुणप्रधानयोरिति· प्रतीयमानोपात्तक्रियापेक्षत्वेन तादृशयोः कर्त्रोरित्यर्थः· भाष्येआप्यप्रधानेदृ(?)ष्टस्य प्रतीयमा
नक्रियाकर्त्तरीत्यर्थः· प्रधानकर्त्तरीत्यस्योक्तारितशब्दबोध्यक्रियाकर्त्तरीत्यर्थः· तदेवाह· प्रतीयमानगमीति· साहित्यानुपपत्तेरर्थः
प्रविशपिंडीमित्यादौ प्रतीयमानक्रियापेक्षाविभक्तेर्दृष्टत्वादितिभावः· ल्यादयस्तुभतथाधातोर्विधानादितिस्पष्टमेवेतिध्येयं·

ल्यादयइति· आदिशब्देनक्तादीनांग्रहणं तत्रैकेनशब्देनभिन्नकर्तृत्वात्गुणप्रधानयोः कर्त्रोरभिधाना
संभवात्प्रधानेकार्यसंप्रत्ययात्प्रधानस्यैवाभिधानंन्याय्यमित्यप्रधानस्य प्रतीयमानगमिक्रिया
पेक्षकर्तृत्वाश्रयेस्यात्तृतीयासिद्धेरित्यर्थः· पुत्रेणसहागमनमिति· ल्युटाकर्तुरनभिहितत्वात्उभय
त्रतृतीयाप्रसंगेनियमार्थमिदं· अप्रधानएवतृतीयाभवतिनतुप्रधानइति॥ ॥ ॥

एकान्वयित्वादिसमानाधिकरणसाहित्यंहि पुत्रस्याप्याहृतागमनसंबंधज्ञानएवबोद्धुंशक्यंनेत्यन्ययोगितात्पर्यम्· षष्ठ्यत्र रा०म०
बाधिकेत्युक्तेरदर्शनात्देवदत्तेतृतीयार्थेसत्त्वमितिभातितदनिष्टमित्यतआह· ल्युटेति॥ ॥ ॥ २९

८५८

भाष्येषष्ठ्यत्रेति· एवंचोभयोस्तृतीयाप्रसक्त्यभावेननियमार्थत्वानुपपत्तिरितिभावः· ननुषष्ठीबाधनार्थमेवतर्हीदमावश्यकमतआह·
साचाप्रधानेति· प्रधानेचारितार्थ्यसंभवादितिभावः· भवत्येवेति· अत्रवदेति· तृतीयाषष्ठ्योः कोविशेषः· यत्तृतीयाऽप्रधानेपिषष्ठीनेति·
एवंच पुत्रेणसहागमनमित्यादौषष्ठीबाधनेनतृतीयार्थसत्त्वमावश्यकमिति· अन्येतुक्तयोगेषष्ठीकृद्योगश्चतत्सत्त्वकृत्प्रधान्वय

कृती
षष्ठ्यत्रेति· कर्तृकर्मणोःकृतीत्यनेन· साचप्रधानयोरेवकर्तृकर्मणोःप्राधान्यादेवस्मर्यतइति अप्रधानेकर्तरिनभविष्यति· यदा
तुकृद्ग्रहणमप्रधानकर्तृप्रतिपत्त्यर्थंभेदिकादेवदत्तस्ययज्ञदत्तस्यकाष्ठानामिति· तदाषष्ठीबाधनायतृतीयाविधानम
त्रापिनवत्येव· पुत्रेण सहस्थूलइति· गुणसंबंधप्रतिपादनपरत्वादत्रक्रियायाअभावात्पुत्रस्यकर्तृत्वाभावः॥

मात्रेण एवंचशाब्दकृत्स्य कृत्यर्थान्वयिनोः कर्तृकर्मणोरेवषष्ठीनप्रतीयमानतत्संबंधयोरितिभाष्योपपत्तिमाहुः· क्रियाया
अभावादिति· अस्तिक्रियासत्वेपिसाहित्यबलात्स्थौल्यमेवपुत्रेप्रतीयतेनतुतत्क्रियाकर्तृत्वमितिभावः॥ ॥ ॥राम०

कैआब०२०३ कारकविभक्तिरिति॰ तिष्ठत्यादिक्रियानुषंगात्स्थूलदूत्यादेरपि कर्तृत्वमस्तीति भावः॰ सहयोगश्च विशेष्यतया विशेषणतया वेति
तात्पर्यं॰ अंतरंगत्वादिति॰ तदपवादत्वात्तेण पदं वचनमेवेति चिंत्यं॰ गवां संबंधोऽन्तरंग इति॰ एकान्वयित्वादि समानाधिकर

यदि भविष्यतीति॰ अनेन मिश्रीकरणभावात्तिलानां करणत्वाभावमाह॰ एकक्षेत्रे च वापात्सहयोगः कालभेदोऽपि विरुद्धः सह
युक्त इति॰ अप्रधानवचनं प्रधाननिवृत्त्यर्थं क्षिपते प्रधानस्य चांतरंगत्वात्कारकविभक्तिर्भविष्यतीति तेनार्थसत्त्वित्यर्थेनाप्रधा
नवचनेनेत्यर्थः॰ शिष्येण सहोपाध्यायस्य गौरित्यत्रापि गवां संबंधोंतरंग इति उपाध्यायात्षष्ठ्येव भविष्यति न तृतीया गाः स्वामी व्र
जतीति॰ अत्रापि व्रजिक्रियायां गवां कर्मत्वात्तन्निबंधना द्वितीया स्वामीश्वरेति प्राप्ते उपपदविभक्तौ षष्ठीसप्तम्यो बाधित्वा प्रवर्तते॥

णत्वं ह्युपाधिरूपसाहित्यस्य सहशब्दार्थतया पूर्वमन्वयि ज्ञानावश्यकत्वादिति भावः॰ बाधित्वेति॰ स्वामित्वमपि गो
निरूपितमेवेति स्वामिशब्दयोगेऽपि गवामिति भावः॥ ॥२९॥ ॥रामरामरामरामरामरामरामरामरा० राम० ३०

८४६

येनांगविकारः॥ ॥अंगशब्दस्यार्थोऽत्राद्यजंतत्वेशंकानुपपत्तेपरिहारमाह॰ अंगशब्द इति॰ अप्रसिद्धत्वात्सन गृह्यत इति भावः॰ अचिघञिवेति॰
उभावपि भावे इति भावः॰ एरजित्यच्॰ नन्वेवं काणशब्देऽक्षिसामानाधिकरण्यमनुपपन्नमत आह॰ काणगुणेति॰ लुग्विधानादिति॰

येनांगविकारः॥ ॥अंगशब्दोऽवयववाचित्वेन प्रसिद्धस्ततो येन गुणेनांगस्य विकारो लक्ष्यते ततस्तृतीयेति
ग२ सूत्रार्थमबोध्याह॰ इह कस्मादिति॰ इहैव कस्मान्नेत्यर्थः॰ अक्षिकाणमिति॰ कणनिमीलन इत्यस्य चोरादिकस्य अचि
घञि वा रूपं॰ काणगुणयोगाद्भेदोपचाराद्गुणवचनेभ्यो लुगिति मतुपो लुग्विधानाद्वाऽक्षिकाणशब्देनोच्यते॰ त
त्र काणशब्दात्तृतीया प्राप्नोति॰ काणेन हि गुणेनाक्ष्णो विकारो लक्ष्यते अक्ष्णा काण इत्यत्र त्वक्षिशब्दान्न प्राप्नोति॰

इदं चिंत्यं॰ गुणगुण्युभयाभिधानसमर्थे एवं तत्प्रवृत्तेः॰ न त्वक्ष्णः काणमिति कदाचिद्भवति॰ कर्मघञंतः काणत्वगुणविशिष्टाक्षिवाचीति
परेन प्राप्नोतीति॰ शब्दतोंगविकाराप्रतीतेरिति भावः॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्

वै०बि०२०३ अवयवस्यांत इति· अप्रसिद्धस्यापि व्याख्यानात् ग्रहणमिति भावः· विकृतमंगमिति· सामर्थ्यादिति भावः· तदेवोपपादयति· स

॥ अंगाद्विकृतादिति· अंगवाचिनोऽक्षिपादादेस्तृतीया न भवति न तु काणादेर्गुणवचनादित्यर्थः· एतावत्युच्यमाने
क्षिकाणमस्येत्यत्राप्यक्षिशब्दात्प्राप्नोतीत्याह· तद्विकार तश्चेति दि· यदि देवदत्तादिरवयवी विकृतेनांगेन विकारया
प्रकाश्यत इत्यर्थः· अंगशब्द इति· अंगान्यस्य संतीत्यर्शआदित्वादजन्तत्वांतोऽत्रांगशब्दो निर्दिष्टः· येनेत्यनेन विकृत
मंगं निर्दिश्यते· नह्यविकृतेनांगेनांगिनो विकारो द्योतयितुं शक्यते· न चैतेनेति· अक्षिकाणमस्येत्यत्र काणशब्देनाक्षिस
मानाधिकरणेनावयवी द्योत्यते किं तर्ह्यवयव एवेत्यर्थः· अवयवश्चात्रावयविना विशेष्यत इति तस्यैव प्राधान्याद्विकारप्रतिप

मुदायोगी द्योत्यत इति· भाष्ये विकृत इत्यादि· तस्यैव· अवयवस्यैव· विकारप्रतिपत्तिरिति· शाब्दीति भावः· आर्थी तत्रास्तीति· स्तुनन्ततीयाति
मितमिति ध्येयम्॥ ॥२०॥

रा०म०
३१

८५०

इत्थंभूत॥ ॥भाष्ये इत्थंभूतलक्षणे इति· इत्थंभूतस्य लक्षणबोधके शब्दे तत्स्थे लक्ष्यवाचिपदघटितपदस्थे सति लक्षणवाचका
त्तृतीयाप्रतिषेधो वक्तव्य इत्यर्थः· तदाह· यदा लक्षणवाचीति· लक्ष्यवाचिनः शब्दस्य लक्षणवाचिना समासं विना लक्षणवत्त्विनस्त
स्थत्वेन संभवतीत्यत आह· लक्ष्यवाचिसमासेति· लक्ष्यवाचिघटकसमास इत्यर्थः· कमण्डलुपाणिशब्दो बहुव्रीहिणा लक्ष्यच्छात्रवा
चीतत्र पाणिशब्दस्य लक्षणत्वायोगात्सारिशेष्यादाह· कमण्डलुशब्दादिति· इत्थंभूतश्छात्रस्तं ज्ञापितश्छात्रस्तस्य लक्षणं कमण्डलुरिति

इत्थं॥ ॥यदा लक्षणवाचीशब्दो लक्ष्यवाचिसमासावयवस्तदा तृतीया माभूदिति वचनं· इत्थंभूतलक्षणे तत्स्थ इति· लक्ष्यवाचिशब्दस्थ
इत्यर्थः· कमण्डलुपाणिमिति· बहुव्रीहौ कृते कमण्डलुशब्दात्तृतीया प्राप्नोति· न च प्रत्ययलक्षणेन प्रत्यय इति प्रातिपदिकसंज्ञानिषेधो न
ङिसंबुध्योरिति नलोपप्रतिषेधाज्ज्ञापकात् न चैवं तृतीयाया लुक्प्राप्नोति· समासप्रातिपदिकानवयवत्वात्तस्याः कृते समासे उत्पादात्॥

भावः· बहुव्रीहौ समुदायस्य संबंधित्वेन संबंधी बोध्यः तत्र चेतरपदार्थान्वय इति व्यपेक्षायादेशंकेयं तत्र हि तृतीयायामपि कमण्डलोर्ज्ञापके
नान्वयः सुवचः पाण्यधिकरणकः कमण्डलुर्ज्ञाप्यः छात्र इत्यर्थस्यादिति भावः· ज्ञापकादिति· एतेन नलोपविषयमेव तज्ज्ञापकमित्यपास्तं· त
स्थे इत्थंभूतलक्षण इति वार्त्तिकस्वारस्येनावयवात्तृतीयापत्तेः प्रतीयमानत्वात्· एतेन समुदायात्तृतीयापत्तौ नास्यार्थमिति मंदोक्तमपास्तं· प्रा
तिपदिकानवयवत्वादिति· तन्मध्यपतितन्यायादकेज्वत् ग्रहणेन ग्रहणाद्विकप्पमुमादिवच्छात्राणवयवत्वाबोधनादवयवत्वमानाभावादिति भावः·

कै०वि०२०३ पूर्वलक्षणत्वाविवक्षया प्रथमांतत्वेन समासे जाते पश्चाल्लक्षणत्वविवक्षायामत्र तृतीयापादनं कृतपूर्वी कटमितिवदिति बोध्यं। केचित्तु
कमंडलुपाणिशब्दादत्र तृतीयापत्तिः कमंडलुपाणित्वस्यैव लक्षणत्वात् स च्छात्रः सो कमंडलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं भवतीति
अनुर्लक्षण इति सूत्रे भाष्यात् तदेवेत्यस्य कमंडलुपाणित्वमेवेत्यर्थः। अन्यथा स एवेति वदेत्। कमंडलुयुक्तपाणिश्छात्रस्तद्वयश्री
तिबोधः स्यात् कमंडलुयुक्तार्थकमंडलुपदेन समानाधिकरणो बहुव्रीहिः अन्यथा तन्मध्यपतितन्यायेन तद्ग्रहणेन ग्रहणेऽपि तद्वय

लक्षणेनेति। पृथग्विनेति तृतीया। तथाह्युपमितिः षष्ठीतत्पुरुषस्योत्तरपदार्थत्वात् प्रधानं तत्र इत्थंभूतस्यापि लक्षणं प्रधानमप्राप्तोपस
र्जनभावं तत्र तृतीया यथा कमंडलुना छात्रमद्राक्षीदिति बहुव्रीहौ तु स्वार्थोपसर्जनान्यपदार्थाभिधायित्वाद्द्वित्वपदानां नास्ति लक्षणस्य
प्राधान्यं।

वत्वेनेत्यस्यापाततरमणीयत्वेन लुकुद्दुर्वार एव स्यात एवेच एकार्थीभावमिति सूत्रे भाष्येन रं मन्य इत्यादौ समासप्रातिपदिकसंज्ञोत्तरं ज्ञा
तस्यापमः सुपो धातुरिति लुग्विभिस्यामर्थान्ते त्यक्तमित्याहुः भाष्ये पृथग्भावादिति। एकार्थीभावे इतरविशेषणत्वेन कमंडलोरुपस्थि राम०
त्यातस्य लक्षणत्वेन ज्ञात्रेन्यथासंभव इति भावः। तदेतदूयातिकैयटः नास्ति लक्षणस्य प्राधान्यमिति। विशेषणत्वोक्तो नोपस्थितिरि ३२
त्यर्थः प्रागुक्ताशयानभिज्ञः शंकते। किंवक्तव्यमिति। अत्रार्थे सज्ञारूढामनुक्तेपयुक्तिमप्याहुः एकदेशी भाष्ये प्राधान्येनेति॥ ॥२१॥ ॥

८५१

संज्ञोन्यतरस्यां॥ ॥अन्यपदार्थेन योगे स्वामिनः पंचमी स्यादत आह। भूतपूर्व इति। अन्यमुक्त इति। अन्यत्वप्रतियोगीत्यर्थः। पूर्वस्वाम्यपेक्षये
दानीमन्योगवां स्वामीत्युदाहरणार्थः। उभयप्राप्तयेगवा तुल्येनच स्वामिनः संबंधमुपपादयति। गवोपइति॥ ॥२२॥ ॥हेतौ॥ ॥व्यापाराना

संज्ञो॥ ॥मात्रासंज्ञानी तइति। संप्रति व्यामनाध्यानइत्यालनेपदं अन्योगवां स्वामीति। एकस्मिन्वाक्ये सह प्रयोगाद स्मन्यपोगोगवा
मितिमन्यते। नह्यत्र गावइति। पुंक्तग्रहणाद्यपेक्षमन्यत्वं तद्वान्विनः पंचमीनचात्र गवापेक्षमन्यत्वं स्वामिनः प्रतिपाद्यं व्यभिचाराभा
वात्। किं तर्हि पूर्वस्वाम्यपेक्षं। कस्तर्हि स्वामीति। भूतपूर्वोपः स्वामी सोन्यमुक्त इत्यर्थः। तुल्यो गोभिः स्वामीति। गवां यः स्वामी स गो
भिर्जाड्यादिना धर्मेण सदृश इत्यर्थविवक्षायामस्ति गवोपदइयार्थयोगः॥ ॥हेतौ॥ ॥योग्यतामात्रमुक्तोनाश्रितव्यापारोर्थो द्रव्य
गुणक्रियाविषयो हेतुः निमित्तेति। असर्वनाम्नोपि विधानार्थमत्र सूत्रइदं पठितं न तु सर्वनाम्नस्तृतीया चेत्यत्र तत्र प्रायग्रहणादसर्व
नाम्नः प्रथमादितृतीये भवतः अन्यास्तु यथा दर्शनं भवंति पर्यायोपादाने केचित्स्यर्थोतर निःस्पर्थमिच्छंति। अन्येतु [illegible]पलक्षणार्थमि
च्छंतः प्रयोजनादिष्य योगेप्यन्यत्तद्दृष्टभक्तिविधाने मन्यंते।
विष्टत्वेद्रव्यगुणक्रियाविषयत्वे च हेतुर्योग्यतामात्रमुक्त इति। व्यापाराविष्टं क्रियामात्रविषयं च करणं व्यापाराविशेषे च क्रियाविषयत्वमिव फलोपधानमे
वेति तमोभेद इति भावः। नास्तीति। वृत्तिकारवदिति भावः। अन्ये त्विति मतेनुग्राहकाभावो रुचिबीजं॥ ॥२३॥ ॥२४॥ ॥२५॥ ॥२६॥ ॥२७॥

कै०वि०२०३ अपादानेपं॥ ॥ननुल्यब्लोपविधायकस्याशास्त्रे दर्शनात्ल्यप्लोप इत्यसंगतमत आह॰ यत्रेति॰ वाक्यैकदेशन्यायेनेति भावः॰ ल्यब्ग्रहणं क्त्वा उपलक्षणं आसनात्प्रेक्षत इत्यस्यासने स्थित्वेत्यर्थात्॰ तत्रेति॰ ल्यबंताभावेपि गम्यमानक्रियापेक्षकर्मत्वाभावादिति भावः॰ गम्यमानक्रियापेक्षमाऽपादानत्वं भविष्यतीत्यत आह॰ क्रियायाइति॰ यदाश्रित्येति॰ यदवधित्वेनाश्रित्येत्यर्थः॰ तत्रेति॰ तत्र वर्त्तमानाच्छब्दादित्यर्थः॰

अपादा॥ ॥ल्यप्लोप इति॰ यत्र ल्यबंतस्याप्रयोगेप्यर्थो गम्यते तत्रोद्भूतायां प्राप्तायां पंचमी विधीयते॰ अधिकरणे चेति॰ ल्यप्लोप इत्यपेक्ष्यते॰ स प्रश्नप्रयादोत्र पंचमी॰ प्रश्नाख्यानयोश्चेति॰ विशिष्य प्रश्नाख्यानेग्रह्येते॰ यत्र लोके पंचमीप्रयुज्यते तेन कस्मात्प्रभवो देवदत्तस्याप्रभव इत्यादौ पंचमी न भवति॰ कुतो भवानिति॰ क्रियायाजभावादनपादानत्वं मन्यते॰ यतश्चेति॰ यदाश्रित्याध्वकालौ परिछिद्येते तत्र पंचमीत्यर्थः॰ गवीधुमत इति॰ गवीधुमन्नामनगरे॰ तद्युक्तात्काल इति॰ कालेविषये तेन पंचम्यंतार्थेन योयुक्तो मासादिस्त द्वाचिनः सप्तमीत्यर्थः॰ अथवा पंचमीयुक्तार्थात्परे काल इत्यर्थः॥ ॥ ॥

तद्युक्तात्कालादित्यनुचितमत आह॰ कालेविषय इति॰ युक्तोमासादिरिति॰ मासकार्त्तिक्योश्चावध्यवधिमद्भावः संबंधः आग्रहायण्याअस्तुमतद्युक्तत्वमिति भावः॰ अथवा पंचमीति॰ तच्छब्देन पंचमीपरामृश्यते तद्युक्तश्च तत्सहकृत्यर्थस्तस्मात्परे प्रत्यय वक्रेकाले भिधेये कालवाचिनः सप्तमीत्यर्थः॰ आग्रहायण्याश्वार्थपरत्वेन शब्देतनुमासस्यैवेति भावः॰ रा.म०

३३

८५२

ॐ

दर्शनं चक्षुरिति॰ करणे ल्युडिति भावः॰ तेजोरूपमिति॰ अपमणसामर्थ्यमनेन दर्शितं॰ विषयग्राहिणो नयनरश्मयः सूर्यरश्मिवत्प्रासाददेशस्थपुरुषनयनादपक्रम्य यावद्विषयदेशं गच्छंतीत्यर्थः॰ एवं च प्रासादात्प्रेक्षत इत्यस्य चक्षुः प्रासादादपक्रम्य विषयं जानीत इत्यर्थः॰ प्रासादस्थपुरुषान्निर्गमनं प्रासादादिति व्यवह्रियत इति बोध्यं॰ प्रासादमारुह्य भुंक्त इत्याद्यर्थ प्रासादाद्भुंक इत्यादीनामनभिधान

अध्वन इति॰ तद्युक्तादित्यपेक्ष्यते॰ अपक्रामति तत्तस्मादिति॰ दर्शनं चक्षुरिंद्रियं तेजोरूपं प्राप्यविषयग्राहित्वात् प्रासाददेशादपक्रम्य विषयं गच्छतीत्यर्थः॰ क्षणिकपक्षावष्टंभेन भेदमाश्रित्याह॰ अन्यान्यप्रादुर्भावादिति॰ अन्यस्यान्यस्य तेजोरूपस्येंद्रियस्योत्पादादित्यर्थः॥ ॥

मिति बोध्यं॰ प्रासादस्थपात्रान्निर्गतमन्नं भुंक्त इति भाष्यरीत्यार्थ इत्यन्ये॰ प्राप्यविषयग्राहित्वादिति॰ परावरयोगे चेतिवद्बोध्यं॰ यथाकथंचिद्विभागो बोध्यः॰ भाष्येत्वन्याचेति दर्शनक्रियेत्यर्थः॰ अपक्रामति तत्तस्माद्दर्शनमिति दर्शनपदेन वृत्तिरेवाभिमता केयटोक्तव्याख्याने तु चक्षुर्वृत्तिरिति विशेष्यं बोध्यं॰ वृत्तिपरत्वेन व्याख्याने चिरंतनानामनुभवानापत्तिरिति पूर्वपक्षः॰ तावत्कालं स्थिरत्वेनाद्यमुत्तरं द्वितीयं तु यस्य यथैवेति ये

कै०वि०२०३ सत्यपि द्विखेपिभमत्वं तस्ये यद्वित्वापत्तेः कर्मव्यतिहाराभावेन समासवद्भावाप्राप्तेरेकशेषेणबाधाच्च द्वंद्वप्राप्तौ कथमन्यान्येतीत्य
तआह· भाष्यकारेति· तस्मात्प्रमाणाल्कर्मव्यतिहाराभावेपि बहुलग्रहणात्क्वचित्समासवद्भाव इत्यर्थः· कृतवीप्साद्विर्वचनस्यान्यस्येत्यस्यप्र
दुर्भाव शब्देन षष्ठीसमास इति परे· प्रभृतिपदयोगेपि तदर्थयोगे विना कथं पंचमीत्यत आह· भाष्यकारवचनादिति· इदमत्र प्रयोक्तव्यंस

भाष्यकारवचनप्रामाण्यादन्यान्यशब्दस्य साधुत्वं द्रष्टव्यं· इदमत्रेति· प्रतीयमानत्वादर्थस्य शब्दाप्रयोगः· का
र्तिक्याः प्रभृतीति तत आरभ्येत्यर्थः· भाष्यकारवचनात्प्रभृतियोगे पंचमी गते मास इति· ततश्चेयस्य च भावे
नेति सिद्धा सप्तमी। चत्वारीति· तत्र प्रातिपदिकार्थस्याव्यति[illegible]रेकात् सिद्धा प्रथमा॥ ॥ ॥

त्न प्रयुज्यते इत्येवंरूपात्प्रभृतियोगे पंचमीति वचनमनुमीयते इति भावः· न प्रयुज्यते इत्युक्त्या प्रभृत्यर्थयोगे पंचमीति सूचितं· तदप्यनभिमा
दायेत्येवं रूपप्रभृत्यर्थयोगे एव प्रवर्तते प्रभृतिशब्दस्य त्वारभ्येत्यस्य च तमादायेत्यर्थः· अभिकरणत्वाभावात्कथं सप्तमीत्यत आह· ततश्चेति· का राम०
र्तिकीमादाय मासे गते त्वाग्रहायणी भवतीति वाक्यार्थ इति भावः· तत्र प्रातीति· एतदर्थं भवतेः सोत्काप्रथमिति वा भभेद इति भावः॥ ॥२८॥ ॥ ३४

८५२

॥२९॥ षष्ठ्यतस॥ ॥तदर्थोपलक्षणमिति· मध्यमपदलोपि समासादिति भावः· अतसशब्दस्यार्थस्येति व्यधिकरणे षष्ठ्यौ आश्रमणाश्र
वले हेतुं दर्शयन्नतः शब्दे प्रत्ययत्वव्यभिचारं दर्शयति· तस्यते रिति· नच प्रत्ययाप्रत्यययोरिति परिभाषयांग स्येति सूत्रस्थ तिपाप्र
तिपदोक्तपरिभाषया च प्रत्ययस्यैव लाभे सिद्धे प्रत्ययग्रहणेन सामर्थ्यात्तदर्थलाभ इति वाच्यं· तदनित्यत्वज्ञापनेनापिचारितार्थ्यात

न्यारात्॥ ॥तस्यापमितिति· असेषे धाङ्देवदत्तेनेत्यदिक्शब्दधर्मं चोत्तरपदग्रहणं कस्मान्न विज्ञायते· उच्यते· दिक्
शब्दसाहचर्यादं चोत्तरपदस्यापि दिक्शब्दस्यैव ग्रहणं नान्यस्य॥ ॥षष्ठ्यतस॥ ॥अर्थग्रहणमिति· अतसशब्दः प्र
त्ययत्वेन व्यभिचरतीति प्रत्ययग्रहणादतसशब्दस्तदर्थोपलक्षणं विज्ञास्यत इति प्रश्नः। षष्ठ्यतस प्रत्ययेनेति· अतसशब्द
स्यार्थस्याश्रयितुमशक्यत्वात्तस्य तेनैव पूर्वस्याक्षिप्त तसि तिरूपसंभवोच्च· प्राग्ग्रामादिति प्रत्ययग्रहणमधिकं क्रियमाणं
श्रूयमाणप्रत्ययग्रहणार्थं विज्ञास्यत इति लुप्ते ऽस्तातोषष्ठ्यभावः· तत्रान्यतरदिति· एकप्रयोजनत्वात्॥ ॥ ॥राम॥

संभवाच्चेति· चोहेतौ· भाष्ये न्यस्तेन समानार्थ इत्यस्य तेनापियोगे सिद्धमिति शेषः· अपपत्ययेति· परिभाषयैव सिद्धे इत्यर्थः· लुप्तेपि प्र
त्ययलक्षणेन प्रत्ययोतत्वमस्येवेत्यत आह· प्रत्ययग्रहणमिति· अंचेर्लुगिति लुक्॥ ॥३०॥ ॥३१॥ ॥श्रीदुर्गायैनमोस्तु·

कैं०वि०२०३ पृथग्विना॥ ॥नञः प्रतिषेधार्थत्वेऽसंगतिरत आह· क्वाकेति· अनधिकारत्वेन्यासदित्यस्यासंगतिरत आह· योगास्तरेष्विति· भाष्ये द्वितीयाष
ष्ठीविषय इति· एनपा षष्ठ्यतसर्थैस्तत्र चेत्यर्थः· सोऽत्रक्रमत्यागेन्यायसिद्ध पूर्वनिपातत्यागे च बीजं किंत्वं· केचित्तु एनपा द्वितीया षष्ठ्यतसर्थैन
त्येवाष्टाध्यायीपाठः· एवं च पृथग्विनेत्यनेन द्वितीयाविधानमपीति एनपेति योगविभागाश्रयणेऽपीति वस्तुकं चिंत्यमित्याहुः· अन्यतरस्यांग्र

पृथग्विना॥ ॥अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्ताभ्यनुज्ञानं क्रियते तेन चात्र पंचमी प्राप्तेति मत्वाह· पृथगादिष्विति· पृथगिति वाक्यशेषः
न प्रकृतमिति· न शब्दः काकाक्षप्रयुक्तः प्रकृतमेवेत्यर्थः· अनधिकार इति· अन्यारादियोगास्तरेषु योगेषु नाधिक्रियत इत्यर्थः· एवं तर्हीति· अ
न्यतरस्यांग्रहणं पक्षे विभक्त्यंतरप्रापणार्थं स एव विहितामपि पंचमीं प्रापयिष्यतीत्यर्थः· अस्त्वन्यदिति· यथाप्राप्तानुज्ञानं हि विकल्पेन का
र्येन तु यस्य कस्यचिदिति भावः· अंतत इति· अवसानत इत्यर्थः· यत्र ह्यन्या विभक्तिर्न विहिता स शेषत्वात्षष्ठ्या विषयः· यथाप्राप्ताभ्यनुज्ञानं
विकल्पेन विधीयते प्राप्त्यभावे भवेत्षष्ठी स एव हि शेषनिबंधना संबंधमिति· अन्यादिग्रहणसंबद्धमित्यर्थः· यथोत्तरेणेति· पंचमीकिमुत्तरार्थो ग्र
हणमिति· अव्ययानामनेकार्थत्वात्समुच्चयबोधनं दूरे स्यार्थः· आशयानभिज्ञः शंकते· नेह पंचमीति संदिग्धा षष्ठी द्वितीयाभ्यामसंदिग्धाभ्यां बाध्यत इत्यर्थः· रामः
भाष्ये· स्यन्यादिति· यद्यपि संबंधानुवृत्तौ मंडूकानुवृत्तौ वानुवृत्तिसामर्थ्यादेव पंचम्यामपि सिद्धायामन्यतरस्यांग्रहणं चिंत्यप्रयोजनं षष्ठी तु नेष्यते
भाष्यकृता तथापि तयोर्दुर्ज्ञेयत्वात्तद्बोधनायैवेतद्ग्रहणमिति बोध्यं· नत्वेवमनयनेनावभवान्येत्यादिप्रयोगः पमाद्ः बाध्यत इति· इहतु तृतीययानबाध्यते ३५
चस्यानीयान्यतरस्यांग्रहणादिति भावः· भाष्ये यत्नादिति· अत्र चान्यतरस्यांग्रहणं पल्लोसीति भाव॥ ३।३।३२।३४।

८५४

दूरांतिकार्थेभ्यो॥ ॥भाष्ये पंचमीविधानेतद्युक्तादिति· पंचम्यंतदूरांतिकार्थैर्युक्तादित्यर्थः· सामान्यतो दूरांतिकार्थयुक्तात्प्रतिषेधे पू
र्वसूत्रस्यान्यतरस्यांग्रहणस्यानैयर्थ्यापत्तिः अत एवात्र वार्तिके पंचमीविधानइति सार्थकं· दूरांतिकार्थैरिति पूर्वसूत्रेण षष्ठीपंच

दूरांति॥ ॥तद्युक्तादिति· दूरांतिकार्थैर्यद्युक्तं पदं पेक्ष्या दूरांतिकत्वं तद्वाचि
न इत्यर्थः· दूराद्ग्रामस्येति· पूर्वसूत्रेण पक्षे वग्रामाद्भवति· दूरादावसथादिति।
आवसथस्य दूरादित्यर्थः· पूर्वसूत्रेणावसथादेः पंचम्यपि भवति॥ ॥

म्योः प्राप्तिः· पूर्वसूत्रेण· दूरांतिकार्थैः षष्ठी त्वनेन· षष्ठ्येवेति· न तु पंचमी अनेन निषेधादिति भावः· दूरादावसथादित्यो त्वनयोः सामानाधिक
रण्यन्नमेनिराकरोति· आवसथस्येति· दूराद्ग्रामस्येत्यादौ त्वनभिधानात्पंचमीनेति भावः॥ ॥३५॥ ॥ ॥रामः

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारकम्

कै॰वि॰२०३ सप्तम्या॥ ॥इन्विषयस्येत्यस्य इनो विषयस्येति समासः प्रकृतित्वेन च स इनो विषयस्तदाह॰ इन्नंतस्येति॰ क्तान्तप्रकृतिकेनंतस्येत्यर्थः॰ अत्र व्याकरणस्येति॰ पूर्वमविवक्षितकर्मतया भावे क्ते पश्चात्कर्मसंबंधेन कर्मणोऽनभिहितत्वाद्द्वितीया प्राप्तेत्याशयः॰ कर्मणि क्तप्रत्ययान्तात्तु न इनिः॰ अव्यभिक्त्यापात्॰ एतेन कर्मणि क्तप्रत्यये व्याकरणशब्दात्सप्तम्येवेति निरस्तं॰ अधिकरणे विवक्षायामिति॰ अस्तीस्यधाद्वारेण कर्तृ

सप्तम्यधि॥ ॥क्तस्येन्विषयस्येति॰ इनंतस्येत्यर्थः॰ अधीतीति॰ अधीतमनेनेत्यधीती इष्टादिभ्यश्चेतीनिः॰ अत्र व्याकरणस्य कर्मत्वाद्द्वितीया प्राप्नोति॰ यथाकृतपूर्वी कटमिति॰ तत्सदपवादः सप्तमी विधीयते अधिकरणविवक्षायां सिद्धेति चेत्कर्मविवक्षायां द्वितीयापि स्यादिति तन्निवृत्त्यर्थं कर्तव्यमेव वचनं॰ मासमधीती व्याकरण इति॰ कालकर्मणो बहिरंगत्वादिहाग्रहणं सप्तम्यभावः॰ साध्वसाधुप्रयोगे चेति॰ साधुनिपुणाभ्यां सप्तम्यां सिद्धायां मनर्चार्थमत्र साधुग्रहणं तेन तत्त्वकथनेऽपि साधुयोगे सप्तमी न भवति॰ अर्चाग्रहणं तु तत्र निपुणविशेषणार्थमेव॰ साधुर्भृत्यो राज्ञ इति तु न स्यादपेक्षायां षष्ठी न तु साध्वपेक्षेति वाक्यार्थज्ञा आहुः॥ ॥ ॥रोम

राव्यापाराश्रयत्वविवक्षायामित्यर्थः॰ बहिरंगत्वादिति॰ तच्चोपपादितं कालोऽध्वनोरित्यत्र उभयत्रानेनैव सप्तम्यां सिद्धायामर्चाग्रहणं तत्र व्यर्थमत आह॰ अर्चाग्रहणं त्विति॰ तत्र साधुग्रहणं तु साधुप्रयोगेऽप्यर्चायां प्रत्यादियोगे निषेधार्थं न चानेन दुर्वारा॰ तत्सामर्थ्येनास्याप्यप्रवृत्तेरिति केचित्॥ राम॰ ३६

८५५

क्रियाया एव कारकार्हत्वादसंगतिमाशंक्याह॰ कारकशब्द इति॰ शक्तिपरः स इति परे॰ उत्तरसूत्रेण यस्य च भावेनेत्यनेन॰ क्रियाफलमिति॰

कारकार्हाणां चेति॰ कारकशब्दो भावप्रधानः तेन कारकत्वमर्हतीत्यर्थः॰ ऋद्धेष्विति॰ ऋद्धा भोजनक्रियामर्हतीति कारकार्हाः॰ लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनं॰ तद्विवक्षायां मुत्तरसूत्रेण सिद्धत्वात्॰ मूर्खेष्विति॰ मूर्खा भोजनानर्हत्वादकारकार्हाः॰ तद्विपर्यास इति॰ यदा कारकार्हाणां नास्ति कारकत्वमकारकार्हाणां चास्ति कारकत्वमित्यर्थः॰ निमित्ता तदे ३ दिति॰ क्रियाफलमिह निमित्तत्वेनाविवक्षितं यत्क्रियायाः प्रयोजकं यदर्थं क्रियारंभस्ततो हेताविति तृतीयायां प्राप्तायां सप्तमी विधीयते॰ तस्य निमित्तस्य यदि कर्मणा संयोगः संबंधः ततो वेतनेन धान्यं लुनातीति सप्तमी न भवति वेतनस्य धान्येन संयोगाभावात्॰

व्याख्यानादिति भावः॰ भाष्ये ऋद्धा इत्यस्य विद्यादिगुणसमृद्धा इत्यर्थः॰ संयोग इत्यस्य व्याख्यानं संबंध इति समवायस्यापि संग्रहाय॥ ॥३६॥

कै०वि०२०३ यस्य च॥ ॥भूय इति· अनुमापकत्वं लक्षणत्वं तत्प्रकारको बोध इति पूर्वपक्ष इति भावः· मध्यायीति· तथा च उदयति सवितरि तमो नष्टं
धूमे सति वह्निर्भवतीत्यादावेव स्यादिति भावः· भाष्ये द्वितीयो भाव आरभ्यते इत्यस्यायं तदर्थः· लक्षणशब्द इति· नायं शब्दोऽनुमापक
त्वेनाभिमतलिङ्गपर्यायः किन्तु चक्षुःप्रतिविक्षोत तदित्यादाविज्ञाननिर्ज्ञातज्ञापनवृत्तिरिति भावः· भाष्ये सकृदपि यन्निमित्तत्वापेति· तत्कालादि

न२

यस्य च॥ ॥अभावलक्षण इति· भूयोदर्शनाश्रयो हि लक्ष्यलक्षणभावो यथाग्निधूमयोः· इह त्वग्निषु हूयमानेषु अस्थित इत्य
ग्नि हूयमाने प्रस्थानेन सह यदा पुनः पुनर्न दृष्टं तदा तस्य लक्षणमिति वचनारम्भः· सकृदपीति· लक्षणशब्दः क्रियानिमित्तकाले
क्ष्यतेऽनेनेति लक्षणं यच्च निर्ज्ञातकालं हवनादिकमनिर्ज्ञातकालस्य सकृदपि कालपरिच्छेदनिमित्तं भवति तत्तस्य लक्षणमित्यर्थः॥

परिच्छेदनिमित्तत्वापेत्यर्थः· तदेव कमण्डलुपाणिमेव· अनिर्ज्ञातकालस्येति· अनेन मानान्तरेण यस्य स्वरूपं ज्ञातं तस्य कालविशेषज्ञापना राम
र्थे शब्दप्रयोग एवास्य प्रवृत्तिः स्त्वपति· राहूपरागे स्नाया शिवादौ कालवाचकादधिकरण एव॥ ॥३७॥३८॥३९॥४०॥४१॥ ॥॥ ३७

८५६

पंचमीवि॥ ॥विभक्तं विभागो भेदः गोभ्यो गोरेव कथं विभक्तत्वमत आह· गोमण्डलादिति· पृथक्क्रियते· भेदेन बोध्यते· अवधारणमा
श्रीयत इति· माथुराः पाटलिपुत्रकेभ्य इत्यादौ माथुराणां पाटलिपुत्रकेषु प्राप्तिलेशानां तर्भावेऽपि शब्दोपात्ताकारापेक्षया नान्तर्भावात् वि

पंचमी॥ ॥कृष्णा गावमिति· गोमण्डलात् कृष्णा गौः पृथक्क्रियत इत्यस्ति विभक्तत्वं न चैतदिति·
कृष्णायां गोर्गोत्वेन गोष्वन्तर्भावात्· विभक्तग्रहणमिति· सर्वत्रैव निर्धारणे विभागसद्भावात्
पूर्वत्रैव पंचमीग्रहणं कुर्यात्· तस्माद्विभक्तग्रहणसामर्थ्यादवधारणमाश्रीयत इत्यर्थः॥ ॥
साधुनि॥ ॥अप्रत्यादिभिरिति· प्रतिपर्यनवः प्रत्यादयः॥ ॥राम राम राम राम राम

भाग एवेति भावः॥ ॥४२॥ ॥साधुनि॥ ॥प्रतिपरीति· कर्मप्रवचनीयसंज्ञा सूत्रस्थाः प्रत्यादय इति भावः॥ ॥४३॥ ॥रामोल्क॥

कै०वि०२०३

प्रसितोत्सु॥ ॥स्यतेरिति॰ष्यतिस्यतीतीत्येकृते ऽस्यसितमिति॰कर्मकारकं॰व्यातषंगो रज्वादिभिः संबंधनं॰गौणार्थस्तत्स्वरूपः अतएवपूर्वमुत्सुकसाहचर्यादित्यक्तं तत्सरे प्रसितासक्तादित्यमरः॥ ॥४४॥ ॥नक्षत्रे॥ ॥एतत्सूत्रप्राप्तये प्रक्रियामाह॰पुष्येणयुक्तइति॰सर्वैइति॰तत

प्रसि॥ ॥कःप्रसितइति॰किंप्रकृष्टःशुक्लः प्रसितः उतस्यतेस्सिनोतेर्वाकारकमितिप्रश्नः यत्सत्रेति॰उत्सुकशब्दसाहचर्यात्तदर्थसदृशोर्थोगृह्यते॰बद्धइवेति॰मुख्यस्यव्यातषंगरूपस्यबंधनस्याभावात्सादृश्याद्गौणार्थ[illegible]परिग्रहः॥ ॥नक्षत्रेच॥ ॥अद्यपुष्यइति॰पुष्येणयुक्तःकालइत्यणोलुबविशेषइतिलुपूनत्तुपरत्वादत्रप्रथमाभविष्यति॰नैतदस्ति॰सर्वविभक्त्यपवादोयंविज्ञायेत अंतरंगत्वात्प्रातिपदिकार्थमात्रएवेदंविधानंस्यात्॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेद्वितीयाध्यायस्यतृतीयपादेद्वितीयं॥

अद्यपुष्यंप्रतीक्षतेपुष्यायस्पृहयतिपुष्यस्यसमीपइत्यादिप्रयोगानसिध्येरन्नितिभावइतिसंवेनिर्मितं॥ ॥४५॥ ॥७॥इतिशिवभट्टसुतसतीगर्भजनागेशभट्टविरचितेभाष्यप्रदीपोद्योतेद्वितीयाध्यायस्यतृतीयेपादेद्वितीयमाह्निके॥ ॥२॥ ॥७॥ ॥७॥ ॥ राम० ३८

८५०

प्रातिपदिकार्थ॥ ॥तद्ग्रहणमंतरातदर्थे प्रथमानियमाल्लाभात्प्रश्नानुपपत्तिरतआह॰ज्ञाविति॰अंतरेणापीति॰अर्थेइत्युक्तत्वाप्यिकस्यार्थेइत्याकांक्षायांयतःस्वादिविधिस्तदर्थेइतिलाभादितिभावः॰तत्सत्येपिछिंगविशिष्टपरिभाषयाज्ञंताद्यर्थेतल्लाभः॰नन्वव्ययानामप्यर्थवत्त्वेनैवसिद्धमितत्याह॰असतीति॰यत्तादिति॰प्रातिपदिकग्रहणसामर्थ्यादस्यसंख्यावाकैरेकवाक्यतायामपिप्रकृतार्थापक्षनियमाश्र

प्रातिप॥ ॥प्रातिपदिकग्रहणमिति॰ज्ञाप्रातिपदिकाद्विहितानांस्वादीनांप्रकरणमिदंनियमार्थमिति॰अंतरेणप्रातिपदिकग्रहणंप्रातिपदिकार्थएवप्रथमाभविष्यतीतिप्रश्नः॰उच्चैरिति॰असतिप्रातिपदिकग्रहणेऽव्ययाल्लथमानस्यात्॰बहुषुबहुवचनमित्यादिनास्यैकवाक्यतायांसंख्यायुक्तएवप्रातिपदिकार्थेस्यात्॰प्रातिपदिकग्रहणात्तुयत्ताल्संख्यारहितेप्यव्ययार्थेप्रथमासिध्यति॰अथवालिंगग्रहणात्सर्वत्रप्रथमासिध्यतीतिप्रश्नः॰अतएवप्रातिपदिकार्थग्रहणंकिमर्थमितिकेचित्पाठः॰अलिंगेप्यव्ययार्थेयथास्यादित्युत्तरं॥

यणादर्थेनियमाश्रयणाद्धूऽसंख्यादव्ययादुच्चनुसिद्धिरितिभावः॰अथवेति॰लिंगेवर्त्तमानात्प्रातिपदिकादितिसूत्रार्थः॰सर्वत्रलिंगंप्रत्ययार्थइतिभावः॰इदंचिंत्यं॰प्रातिपदिकार्थग्रहणाभावेलिंगमात्रेइत्यर्थोपत्तौस्त्रीपुमानित्यादावेवस्यात्॰नतुकुक्षइत्यादौजात्यादेरप्यधिकस्याभानात्॰तस्मादाद्यव्याख्यैवज्यायसी॥

कै॰वि॰२०३

जात्यादिरिति॰ आदिनाश्रयः जातिपदं च प्रवृत्तिनिमित्तोपलक्षणं॰ यस्मिन्नर्थे इति॰ प्रातिपदिकार्थे प्रथमाविधानाभावात्तद्व्यतिरिक्तः शेष इ
तिनलभ्यत इतिभावः॰ नन्वसंख्येति॰ षष्ठीविधायकस्यापि द्वेकयोरित्यादिभिरेकवाक्यत्वादितिभावः॰ वस्तुतो द्वितीयादीनां विषयाभावः शेषः
प्रातिपदिकार्थरूपः प्रथमाया विषयः स सर्वत्रेति न तदपेक्षः शेष इत्याशयेनैकदेश्याह॰ षष्ठ्यत्रेति॰ एवं चाद्यव्याख्यानेपि तास्वेताश्वस्यासं

प्रातिपदिकार्थश्चेह भाष्यकारेण न निर्वाहितः॰ अन्वयव्यतिरेकाभ्यां यस्य योर्थो ज्ञात्यादिरर्थः प्रतीतस्तस्य सर्वस्येहाभिमतत्वाद्विचारे
प्रयोजनाभावात्॰ किंपुनरिति॰ अव्ययादाप्सुप इति लुग्विधानात्सुपः प्राप्त्यवगणभावादितिभावः॰ पदत्वमिति॰ प्रत्ययलोपे प्रत्ययलक्ष
णमिति प्रथमोत्पत्तिनिबंधनं पदत्वे प्राप्यते॰ तन्निबंधनं तु रुत्वादिकमित्यर्थः॰ षष्ठ्यात्रेति॰ यस्मिन्नर्थे द्वितीयादयो न विहिताः स शेष इ
तिमन्यते॰ नन्वसंख्यत्वादव्ययार्थस्य कथं षष्ठी स्यात्॰ नैष दोषः॰ एकत्वाद्यर्थनियमे षष्ठ्याः संख्यायामनियमात् प्रत्ययनियमेपि या
तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परस्य व्यावर्तनात्॰ अथ लिंगग्रहणमिति॰ सत्त्वभूतार्थाभिधायीनि यानि प्रातिपदिका

गतिः परएकदेश्याह॰ इदं तहीति॰ इदं सर्वमेकदेश्युक्तिरित्यग्रे स्फुटीभविष्यति॰ उच्चैर्नीचैरित्यप्येकदेश्युक्तिः अव्ययादाप्सुप इति ज्ञापकात्सिद्धे
रितिबोध्यं॰ ननु प्रातिपदिकत्वेप्यव्ययानां लिंगाबोधकत्वेन व्यभिचारान्न तत्प्रातिपदिकार्थ इत्यत आह॰ सत्त्वभूतेति॰ प्रातिपदिकार्थ इत्यस्य हि
तत्तत्प्रातिपदिकार्थ इत्यर्थो न तु प्रातिपदिकत्वावच्छिन्नार्थ इति असंभवादितिभावः॥

रा॰म॰ २९

८५८

प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा

अधिकविशेषेति॰ द्रव्यजातिभ्यामधिकेत्यर्थः॰ स्त्रीत्वाद्यधिकमिति॰ स्त्रीत्वादिकमधिकं यत्रेत्यर्थः॰ यमर्थमिति॰ अन्वयव्यतिरेकाभ्यां यस्य प्राति
पदिकस्य योर्थोवधारितः प्रवृत्तिनिमित्ततदाश्रयरूपस्तदधिकव्यावृत्त्यर्थं मात्रग्रहणमितिभावः॰ द्रव्यमात्रापेक्षयाधिकत्वाव्यावृत्तो घट इत्यादा

मात्रग्रहणस्य बोधनेच्छेति सूत्रारंभाच्चाधिकविशेषसद्भावे प्रथमा न स्यादितिमत्वाह॰ स्त्री पुमानिति॰ द्रव्यमत्रस्त्रीत्वाद्यधिकमभिधी
यते॰ एषएवेति॰ यमर्थं प्रातिपदिकं न व्यभिचरति स प्रातिपदिकार्थः॰ स्त्रीत्वादिनात्व विना स्त्र्यादिशब्दानां प्रयोगाभावः॰ कुमारीति॰
विनापि स्त्रीत्वेन कुमारो देवदत्त इति कुमारशब्दस्य प्रयोगदर्शनात्स्त्रीत्वं न प्रातिपदिकार्थः॰ वृक्षः कुंडमिति॰ पुंनपुंसकोपलक्षणमे
तत्॰ तटस्तटमित्येतत्तदुदाहरणं॰ वृक्षकुंडशब्दयोस्तु पुंनपुंसकत्वेन विना प्रयोगाभावात्तल्लिंगस्य प्रातिपदिकार्थता॰ कुंडशब्दस्तु जीवृ
तिभर्तरि परेण ज्ञातेवर्तमानः पुंलिंग इति नपुंसकत्वेन विनापि तस्य प्रयोगात् कुंडीति च स्त्रियामपि वर्तनात् कुंडमित्येतदुदाहरणमित्यपरे॰

वचिनस्यादितितात्पर्यं॰ न प्रातिपदिकार्थ इति॰ कुमारत्वस्यैव नियमेन तदर्थतानानुलिंगस्येतिभावः॰ अत्र स्त्रीत्वं न प्रवृत्तिनिमित्तमिति
भावइतितत्वं॰ तटस्तटमिति॰ अस्य त्रिलिंगत्वेन प्रातिपदिकात्कस्यापि लिंगस्य नियमेनानुपस्थितेस्तस्य प्रातिपदिकार्थत्वाभाव इतिभावः॥

वै०भू०२०३ जातिरेवेति अत्र प्रकृतसूत्रे जातिग्रहणं प्रवृत्तिनिमित्तपरं प्रातिपदिकार्थः प्रातिपदिकार्थशब्देन विवक्षितः जातिपदमाश्रयस्या
प्युपलक्षणं एवं च भाष्योक्तान्यप्युदाहरणानीति तद्भावः अंतरंगत्वाच्च तयोरेव प्रातिपदिकार्थशब्देन ग्रहणं लिंगादीनां तु प्रायेण द्योतक
सापेक्षप्रतीतिकतया बहिरंगत्वमिति तदाशयः एतदेवाभिप्रेत्य प्रातिकार्थसत्तेति वक्ता वुक्तं उक्तव्याख्याद्वयं चिंत्यमेव अनेकलिंगत्वे
पि स्वमोर्नपुंसकादिति शास्त्रबलेन लिंगे प्रातिपदिकवाच्यत्वस्यैव सर्वसंमतत्वेन तटादिशब्देपि प्रातिपदिकार्थग्रहणेन सिद्धिः अ

जातिरेवात्र प्रातिपदिकार्थो न तु लिंगमित्यन्ये ब्रुवते ॥

त्र एव द्वितीयाद्यंते लिंगबोधः न हि समाने प्रातिपदिकवाच्यत्वे वृक्षादिशब्दवाच्यं प्रातिपदिकार्थशब्देन गृह्यते न तटादिवाच्यमित्यत्र
जातिरेवात्रेत्यत्रातिरिक्तं निमित्तमस्ति एवं चालिंगाव्ययानि लिंगप्रवृत्तिनिमित्तकाः शब्दाः प्रातिपदिकार्थ इत्यस्योदाहरणानि अन्ये तु लिं
गाद्याधिक्यस्यापि बोध्यं येपि गोर्वाहीक इत्यादौ गोसदृशे लक्षणां वदंति तेषां मते वैप्रवृत्तिनिमित्तं तदुत्तरत्वप्रत्ययेनाभिधीयमान
त्वस्यैव प्रवृत्तिनिमित्तत्वस्य विवक्षितत्वात् अस्माकं तु शक्यतावच्छेदकारोपेणैव तत्र बोधः पदे एव लक्षणेति वादिनां शंकैव न ॥ ॥

रा०म०
४०

८५६

प्राप्ये त्वपरिमाणेति द्रोणादयो यदि परिमाणवचना स्तदा प्रातिपदिकार्थत्वात्सिद्धिरिति प्रश्नाशयः उत्तरं तु लक्षणया परिमेयवृत्तितायदा
तदर्थमितीत्याह यदा मानमेयेति व्यभिचारादिति मेयस्यापि द्रोणत्वारोपेण द्रोणादिपदेभ्यो बोधेन तेन द्वौ द्रोणौ परिमाणस्य मानत्वनियतः
परिमाणेवततो मेयार्थत्वाभावेन व्यभिचारी स इति भावः प्रातिपदिके नानियतोपस्थितिविषयो हि प्रातिपदिकार्थः परिमाणशब्देन कर्मणि
ल्युट् परिमेय इत्यर्थ इति नाशंक्यं एवं हि षिंहोमाणवक इत्यादौ संज्ञा न स्यात् सिंहसदृशार्थस्य व्यभिचारेण प्रातिपदिकार्थत्वात् तस्मात् द्रो

णाद्येति द्रोणादयः परिमाणएव वर्तंत इति प्रातिपदिकार्थग्रहणेनैव प्रथमासिद्धेति प्रश्नः द्रोण इति
यदा मानमेयसंबंधाद्व्रीह्यादौ द्रोणादयो वर्तंते तदा व्यभिचारान्नास्ति मेयस्य प्रातिपदिकार्थत्वम् ॥ ॥

णः खारीत्याढकमित्यादौ त्रापि यथा स्यादिति भाष्यस्य विवक्षितार्थस्य परिमाणस्य परिच्छेद्यपरिच्छेदकभावेन व्रीह्यादौ मेयेन्वयेपि यथा स्यादि
त्यर्थः प्रातिपदिकार्थे प्रथमायां तु नामार्थयोरभेदान्वयव्युत्पत्तिविरोधेन तथान्वयो न स्यात् केयटादिमते पि इत्यत्र मेयवृत्तित्वेपि यथा स्या
दिति लक्षणया भाष्यव्याख्याया आवश्यकत्वाच्च सूत्रभाष्यकृतोः सिंहो माणवक इत्यादेरज्ञानकल्पनाच्चाधिक्यं यदा पोनियतोपस्थितिकः स
तदा प्रातिपदिकार्थ इति स्वीकृत्य तदकरणस्यैव न्याय्यत्वं च मह्याख्यायां शाब्दबोधनैलक्षण्याय सूत्रे तद्ग्रहणे नच परिमाणे प्रातिपदिक

DR BHAU DAJI MEMORIAL

वि०२०३ र्थ इति तत एव तल्लाभात्तत्र प्रथमाविधानं व्यर्थं· द्रोणत्वादिना तस्य तदर्थत्वेपि परिमाणत्वेन तदर्थत्वाभावात्· न च तवमते द्रोणो व्रीहिरिमा
नेप्यपि स्यात् प्रातिपदिकार्थसाहचर्यात्तयोः संबंधे समानविभक्तिकनामांतरार्थेऽन्वय एव परिमाणे प्रथमायाः साधुत्वबोधनात्·
अत एवाभिहिते प्रथमेत्यादिलक्षणैः समफलता· तन्मते हि सिंहो माणवक इतिवद्द्रोणो व्रीहिरित्यपि लक्षणया साधु· शाब्दबोधस्तु तत्र वैल
क्षण्यानादरेणापि तत्र तत्र वार्त्तिकप्रवृत्तेर्दर्शनात् इति नव्याः· प्रवृत्तिनिमित्तं मुख्यं तदाश्रयश्चेति द्वावेव प्रातिपदिकार्थशब्देनात्र विवक्षि
तौ वस्त्वंतरंगत्वात्· अतः परिमाणग्रहणं लक्ष्यार्थोपलक्षणमिति कैयटाशयमन्ये॥ अपरे तु प्रातिपदिकग्रहणं किमर्थमित्यस्य ज्ञापकमित्यु
क्त्याशयः· तदज्ञानान एकदेश्याह· उच्चैरित्यादि· एकदेश्युक्तित्वादेवाह· समानाधिकरणे प्रथमेति वार्त्तिकेनैतद्भाष्येण तत्सूत्रस्यैवाव्ययादा
बिति सूत्रस्य ज्ञापकादव्ययेभ्यः सर्वा विभक्तय इत्यादिभाष्येण च तन्निरोधः तस्मात्प्रातिपदिकग्रहणस्य फलांतरं न कल्प्यमित्येव भाष्यतात्प
र्यं· एवं प्रत्याख्यातप्रायं प्रातिपदिकग्रहणं· ज्ञापकात्सर्वविभक्त्युत्पत्तौ प्रथमाया अपि सत्त्वेन च तत्सपुस्तकाप्यसिद्धिः· तिङः समानाधिकर
णे प्रथमैवेति च नियमान्न वार्त्तिकमतेपि दोषः· अथ लिंगत्वादेर्यत्तः कुंडमितीत्यंतस्य इत्यन्ये ब्रुवत इति मतेन कैयटोक्त एवार्थः एत
द्रीत्यैव च द्रोणादिशब्देन सिध्यति· ते हि द्रोणत्वादिप्रवृत्तिनिमित्तका अपि द्रव्यनिष्ठलिंगमिव परिमाणत्वमपि बोधयंतीत्यधिकार्था

ग्राम० ४१

८६०

अतः परिमाणग्रहणं· न च तेषां तन्निष्ठपरिमाणत्वबोधकत्वे प्रमाणाभावः सूत्रे भाष्यप्रामाण्येनानुभवादिना च तदंगीकारात्· तत्त्वोन्मा
नादीनामप्युपलक्षणं· तदुक्तं यन्नुदाहरंति द्रोणः खारी आढकमिति· अत्र व्याख्याने नव्यव्याख्याने च भाष्येऽन्वयि व्रीह्यादिपदानुपादानेन
न्यूनता नव्यव्याख्याने द्रोणो व्रीहिमानयेति प्रयोगापत्तिश्च· आनुमानिकसाधुत्वबोधकवचनकल्पने गौरवं च· प्रातिपदिकार्थलिंगसा
हचर्येसात्परिमाणस्यापि प्रातिपदिकार्थत्वौचित्यं च· अत एव द्वंद्वोपपत्तिः· कैयटव्याख्याने पदायोनियतोपस्थितिक इत्याश्रित्य तदक
रणापत्तिश्च जातितदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणेन मेयपरत्वेपि सिद्धिश्च· किं च पत्रे तानि समुदितानि भवंति तत्रैः स्यादि
त्यनुपदवक्ष्यमाणभाष्यविरोधः· तस्य हि पत्रे स्यादिविध्युद्देश्ये एतानि समुदितानि वाच्यत्वेन भवंति तत्रैव स्यादित्यर्थोऽक्षरस्वारस्येन
लभ्यते पदस्यैव लक्षणेति सिद्धांते द्रोणो व्रीहिरित्यस्य कैयटरीत्यानुदाहरणत्वाच्च· न च द्रोणादिशब्दानामपि यत्ताविशेषावच्छिन्नपला
दिपरिमितव्रीह्यादिपरिच्छेदकद्रोणत्ववदादिबोधजनकत्वात्सारिच्छेदकत्वस्यापि प्रातिपदिकत एव लाभात्तत्र प्रथमाविधानं वैय
र्थ्यमिति वाच्यं· लाघवेन तत्समानाधिकरणद्रोणत्वादेरखंडोपाधिरूपस्य जातिरूपस्यैव वा प्रवृत्तिनिमित्तत्वात्· तत्तु भासमानमान
मपि लिंगावद्धिरोध्यान्वय्येव· द्रोणः परिमाणमिति तु द्रोणादिशब्दानामनेकार्थत्वान्निर्णयाय· द्वौ व्रीहिलणविति वद्वैति वदंति·॥ ॥४॥

कै०वि०२०३ ननुशब्दे कार्यसिध्यर्थं वचनग्रहणमतआह अर्थेइति प्रातिपदिकार्थो वचनादिति सूत्रेतु प्रकृतेरधिकरणत्वविवक्षयासप्तमीतिभावः
गर्गाः शतमित्यत्र शतस्य प्राधान्यात्तदावृत्तेरनुचितत्वेनात्तुसमुदायेवाक्यपरिसमाप्तिः प्रकृतेकथमतआह प्रथमेति प्रथमासिद्धेवेति
तथाचाविधीयमानत्वात्प्राधान्यासिध्यापूर्वेन्यायानवतारइतिभावः नियमार्थेति कर्मण्येवद्वितीयेत्यादिनियमे नियतकर्मादिषुप्राप्त

अथवचनग्रहणमिति अर्थेकार्यासंभवात्प्रातिपदिकार्थादिवचनात्प्रथमाभविष्यतीतिप्रश्नः इहेति प्रथमाविधीयमानत्वा
त्प्राधान्यं नचगुणभेदेप्रधानस्यभेदोभवतीतियत्रैतत्रयंसमुदितंतत्रैवप्रथमास्यात् वचनग्रहणेतुप्रत्येकंसंबध्यमानेशास
त्रयंसंपद्यतेइतिनदोषोभवति प्रत्येकमिति प्रथमासिद्धेवकेवलंनियमापतदनुवादेनप्रातिपदिकार्थादिरित्स्याःसंबं
धोविधीयतेसचसंबंधिभेदाद्भिन्नः अथवान्यायद्वयसंभवेलक्ष्यदर्शनवशात्प्रत्येकंवाक्यपरिसमाप्तिरितिपक्षइहस्त्रीविध्य
तइतिभावः॥

प्रथमावारणप्रातिपदिकार्थमात्रेणनत्वसंबंधबोधनमित्यर्थः ननुप्राधान्याप्राधान्येनिर्णेतुमशक्ये विधीयमानस्योद्देश्यार्थत
योद्देश्यस्यपिप्राधान्यस्यवक्तुंशक्यत्वात् अतएवयागोद्देशेनविधीयमानाअपित्रीह्यादयोगुणत्वेनव्यवह्रियंते अतआह अथवेति॥ ॥ रामः ४२

८६१

नन्वनभिहिताधिकारेपिसंख्याविधेसन्नभ्यपतितत्वाभावोतआह बह्विति इहाधिकृतेनानभिहितइत्यनेनप्रातिपदिकार्थादेः सर्वस्यप्राति
पदिकेनाभिहिततयासंख्येवविशेष्यतइतिभावः ननुपरिगणनान्नदोषइत्यतआह परिगणनेस्यचेति वचनग्रहणादिति एवंचात्रसूत्रे
नभिहितइत्यस्यासंबंधएवेतिभावः मात्रग्रहणइति मात्रग्रहणंकुर्वतः सूत्रकृतः प्रत्ययनियमएवाभिप्रेतः नचप्रत्ययनियमेपिप्रातिप

उक्तेष्वपीति अनभिहिताधिकाराद्बहुषुबहुवचनमित्यादिनास्यप्रकरणस्यैकवाक्यत्वात्परिगणनस्यचप्रत्याख्यातत्वादेकादिभिः शब्दैरे
कत्वादीनामभिहितत्वादनभिहिताधिकारस्यप्रत्याख्यानेउक्तार्थत्वाद्विप्रथमानस्यादिवचनग्रहणान्तुभवति वचनग्रहणस्यपूर्वोचा
र्यप्रसिध्याश्रयेणसंख्यावाचित्वात्तेनाभिहितेवचनेप्रथमाभवतीत्यर्थः संपद्यते कर्मादिविशिष्टइति कर्मण्येवद्वितीयेतिप्रत्ययनिय
मेकर्मादीनामनियमात्तेषुप्रथमास्यात् मात्रग्रहणात्त्ववधारणार्थान्नभवति तेनप्रातिपदिकार्थमात्रेएवप्रथमाभवतिनत्वधिकेकर्मादि

दिकार्थएवेतिनियमेनकर्मादिषुतद्भूरणसंभवात्तद्वैयर्थ्यमितिवाच्यं यथाकर्मण्येवद्वितीयेतिनियमेनकर्मत्वाभावसमानाधिकरणधर्मांतरस्यैव
व्यावृत्तिनतुतत्समानाधिकरणधर्मांतरस्यानेएवंगांदोग्धिपयइत्यादावपादानत्वादिशक्तिबोधेपिद्वितीयाभवतिएवंचकर्मणिसत्येवद्वितीया
नतुदसत्वेइत्येवंनियमाकारः तथाप्रातिपदिकार्थसत्वेएवप्रथमानतुतदसत्वेइतिनियमेननिरर्थकत्वस्यैवव्यावृत्तिर्नतुप्रातिपदिकार्थस
त्वएवकर्मत्वादेरितिमात्रग्रहणस्यावश्यकत्वात् नचैवंसंख्याधिक्येपिप्रथमानस्यात् द्रोणोव्रीहिरित्यादिभिरस्यैकवाक्यतयातदाधिक्येप्रवृत्तेः

कै॰वि॰२०३ अर्थनियम इति॰ अत्र पक्षे तुल्यन्यायात् संबोधने चेति सूत्रे लिंगादिग्रहणं अनभिहित इति सूत्रे सप्तमी द्वितीयपक्षेण वचनग्रहणं च प्रत्याख्यातमेवेति दिक्॥ सा

द्वितीयादय इति॰ कर्मणि द्वितीयेत्यर्थनियमश्चाश्रयिष्यत इति भावः॰ अथवेति॰ अत्र पक्षे प्रत्ययनियमपक्षेऽपि दोषाभाव इत्यर्थः॰ यदमिति॰ यदि प्रातिपदिकार्थसद्भावमात्राश्रयेणाधिकार्थसद्भावेऽपि प्रथमा स्यात् तदा संबोधनाधिक्ये प्रथमायाः सिद्धत्वात् सुतरां भानमनर्थकं स्यात्॰ उक्तेऽपीति॰ मात्रशब्दः सामान्यवचनस्त्वाश्रीयते यथा ब्राह्मणमात्रं पूजयतीति एवं प्रातिपदिकार्थमात्रेऽभिहितेऽपि एकत्वादौ प्रथमा भवति॰ अन्ये त्वाहुः॰ मीयतेऽनयेति मात्रा संख्योच्यते समाहारद्वंद्वे नपुंसकत्वाच्च ह्रस्वत्वं कृते तेनाभिहितायामपि संख्यायां प्रथमा भवति॰ प्रातिपदिकार्थेति॰ अवधारणार्थमात्रग्रहणात् संबोधने चेति ज्ञापकात् अधिकार्थप्रतीतौ प्रथमया न भाव्यं॰ अस्ति च वीरः पुरुष इत्यादौ सामानाधिकरण्यात् विशेषणविशेष्यभावस्य अधिकस्य प्रतीतिः॰ न च समासविधानं प्रथमोत्पत्तिलिंगम् द्वितीयाद्यंतानामपि वीरं पुरुषमानयेत्यादौ समासस्य संभवात्॥ ॥छ॥छ॥छ॥छ॥

सामानाधिकरण्यादिति॰ तयोः पदयोरेकार्थप्रवृत्तित्वात् तत्सत्वनिमित्तयोरेकवृत्तित्वाच्चेत्यर्थः॰ विशेषणविशेष्यभावस्य॰ विशेषणत्वविशेष्यत्वरूपस्य॰ रा॰म॰ ४३

८६२

भाष्ये व्यतिरिक्तः प्रातिपदिकार्थ इति॰ अतिरिक्तार्थेन विशिष्ट इत्यर्थः॰ मयूरव्यंसकादित्वात् समासः॰ भाष्ये वीरत्वमिति॰ वीरशब्दात् शक्याद्यर्थजनात् त्वः॰ वीरत्वं वीरसंबंधः तन्निरूपितविशेष्यतेति यावत्॰ यतो वीरत्वं वीरनिरूपितविशेष्यत्वं पुरुषेऽधिकं भासतेऽतः पुरुषार्थोऽधिकार्थ इत्यर्थः॰ एवं वीरे पुरुषनिरूपितं विशेषणत्वमधिकमिति बोध्यं॰ तथा वीरत्वं पुरुष इत्यत्र तत्त्वत्वं च नि वीरत्वपुरुषत्वयोः साहित्यरूपो वीरपुरुषयोर्विशेषणत्वविशेष्यत्वनियामकः संबंध उक्तः सोऽपि वाक्यार्थ एव एतदेवाभिप्रेत्य कर्मधारयविषये द्वंद्वपादनं चार्थे द्वंद्व इति सूत्रे

नवेति॰ वीरप्रातिपदिकादनपेक्षितशब्दांतरार्थसंसर्गोपहितविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते एवं पुरुषशब्दादपि॰ पश्चात्साकांक्षादिवशाद्विशेषणविशेष्यभावावगतिरुपजायमाना बहिरंगसंस्कारं पूर्ववृत्तं बाधितुं नोत्सहते॥ ॥
त्वादंतरंग॰

भाष्ये कृते॰ एवं च वीरत्वपुरुषत्वसंसर्गस्य भूमेवा न वीरः पुरुष इति बोधः॰ अनपेक्षितशब्दांतरेति॰ अनपेक्षितः शब्दांतरार्थसंसर्गेणोपहितः प्रापितो विशेषणभावः स्वार्थो येन तस्मादित्यर्थः॰ पुरुषसंसर्गेणाहि वीरार्थस्य तन्निरूपितविशेषणतेति भावः॰ एवमिति॰ पुरुषशब्दार्थस्य तदर्थसंसर्गेण तन्निरूपितविशेष्यतेत्यर्थः॰ मात्रपदेनांतरंगार्थकृतमेवाधिकं व्यावर्त्यते तेन तु बहिरंगकृतमिति भावः॰ भाष्ये आधिक्यमिति स्वार्थेऽस्य ना स्वार्थः वाक्यशक्तः॰ लिंगमतानामपि शक्तित्वे मंजूषायामुपपादितं॰

कैoविo२०३ ननु विभक्त्यंतराभिहितेपि सुंदरंकटमित्यादौ प्रथमा स्यादत आह- तिङ् कृदिति- अभिहिते इत्यत्र चार्थनियम एवाश्रीयत इति उक्तेः स्वादौ नदोषः प्रथमाप्राप्नोतीति पर त्वादिति भावः- न च शक्तिर्गुणाश्रयात तत्र प्रधानमनुरुध्यत इति न्यायेन दोषो वारयितुं शक्य इति वाच्यं- क्रियायोरत्र गु

ति२

अभिहित इति- तिङ् कृत्तद्धित समासैरभिहिते कर्त्रादौ प्रथमेत्यर्थः- तत्र ज्ञवीरः पुरुष इत्यत्रार्थाधिक्येप्यभिहितत्व मात्राश्रयात्प्रथमा भविष्यति- कैयटमतमुद्भावयितुमाह- अभिहितानभिहित इति- आसादआस्त इति- सद्याक्रियाद्युपसाधनाधिकरणशक्तिद्वय सद्भावादेकस्याः शक्तेरभिहितत्वात्तदाश्रयात्प्रथमा प्राप्नोतीत्यर्थः- एवं तर्हीति- यथा देवदत्तः पचतीति- प्रासादआस्त इत्यादौ तु वैयधिकरण्यात्प्रथमायाअभावः- तिङो प्रयोग इति- नहि तिङंतपदप्रयोगमंतरेण तत्सामानाधिकरण्यसद्भावः- उक्तं पूर्वं लोति- आक्षिप्तक्रियापदापेक्षं सामानाधिकरण्यमस्ति-

एतप्रधानभावाभावादित्याहुः- भाष्येतिङ् समानाधिकरण इति- नचोक्तेरित्यादौ प्रथमानापत्तिः- तिङ् समानाधिकरणे प्रथमेवेत्यर्थनियममात्राश्रयणेनादोषात्- उक्तं पूर्वं लोति- पूर्वग्रंथेनेत्यर्थः- पूर्वेण चार्थे लोतिकश्चित्- अनेनानभिहितसूत्रोक्तविप्रतिषेधाद्दूषितवार्तिके प्रोक्षितसूचितं राम ४४

८६२

तिङ् समानाधिकरणे प्रथमायाः अप्रथमासमानाधिकरणे शतृशानचोर्विधानस्यवाक्यसंस्कारएवप्रवृत्तिरित्याह- देवदत्तेति- ननु एकवाक्यतयाविधानमितिपक्षेतिङ् सामानाधिकरण्याभावात्प्रथमायाइवकर्मधभावाद्द्वितीयादीनामप्यभावेन द्वितीयादिसामानाधिकरण्येविधीयमानशत्रादेरप्राप्तौतिङ् युज्यते तु प्रथमाभविष्यतीत्यत आह- यावत्तिङ् इति- भिन्नवाक्यतयाविशेषणेनत्वन्नानामर्थनिय

त२

शतृशानचोश्चेति- देवदत्त पचन्नित्यत्र स्थितेयावत्तिङ् उत्पत्तिर्नास्तितावत्तिङ् सामानाधिकरण्याभावात्प्रथमैवेति नियमाभावाद्देवदत्तशब्दादविशेषविहिताः सर्वेस्वादयः स्थिता इति लटः स्थाने द्वितीयाद्यंतपदसामानाधिकरण्येविधीयमानौशतृशानचौप्राप्नुतौ नतुतिङः तेषांतुलङादिरवकाशस्तद्विषयएवचप्रथमायाअपि- कर्मणि द्वितीयैवेत्यर्थनियमेद्वितीयादीनामत्रसद्भावइतिमन्यते- निमित्तमत्रशतृशानचोरप्रथमासामानाधिकरण्यं

मइतिभावः- सर्वेस्वादयः स्थिताइति- विनिगमनाविरहेणसर्वेपिसमुत्पन्नबुद्धिविषयतयास्थिताइत्यर्थः द्वितीयाद्यंतेतिअप्रथमेतिपर्युदासेनप्रथमाभिन्नविभक्त्यंतसमानाधिकरणइत्यर्थकेनशत्रादेर्विधानमितिभावः- नन्वेवमपिकर्मण्येवाद्वितीयेत्यादिनियमात्स्थिते द्वितीयादीनांस्थितिरत आह- कर्मणीति वार्त्तिककारस्यार्थनियम एवसंमत इति भावः॥

वै॰ सि॰ २॰ ३ नन्वपवादेनोत्सर्गस्य बाधाविशेषात्पक्षद्वयोपन्यासः किमर्थोऽत आह इहेति॰ उत्सर्गशास्त्रप्रवृत्तिबाधप्रकारे विषयमिति भावः॰ इ
यमिति॰ लक्षणैकचक्षुष्कदर्शने लक्ष्यैकचक्षुष्कदर्शने चेत्यर्थः॰ तदेवाह॰ सर्वविषयस्वीकारेणेति॰ स ह्येवं मन्यते॰ शास्त्रेण सर्वत्र प्राप्त
स्य विषयविशेषेऽपवादेन निवृत्तिरिति॰ कतिपयेति॰ लक्ष्यैकचक्षुष्को हि लक्ष्यदर्शी प्रागेवोत्सर्गस्य अपवादविषयातिरिक्तं विषयं नि

पूर्वं ह्यपवादा इति॰ इह दर्शनद्वयं॰ सर्वविशेषस्वीकारेण वोत्सर्गस्य प्रवृत्तिः कतिपयविषयावगाह
नेन वा॰ तत्र पूर्वस्मिन् दर्शने उत्सर्गस्य विषयविभागाय पूर्वमपवादः प्रवर्तते पश्चात्तद्युक्ते विषये उ
॰त्सर्गः द्वितीये तु दर्शनेऽपवादविषयं प्रकल्प्योत्सर्गः प्रवर्तते॰ एवं पर्युदासार्थनियमपक्षाश्रयेणेनोदितं॰

र्णयति॰ विषयविभागायेति॰ किं विषये निश्चिता प्रवृत्तिः किं विषये बाधकबाध्येति विषयविभागायेत्यर्थः॰ पूर्वं ह्यपवादा इति॰ अपवा
दशास्त्राणीत्यर्थः॰ अभिनिविशन्त इत्युत्सर्गबुद्धिविषया भवन्तीत्यर्थः॰ ततस्तद्विषयत्वाभावेन निर्णीते विषये उत्सर्गो बुद्धिविषयः सन् ल
क्ष्यं संस्करोतीति भावः॰ द्वितीये त्वपवादशास्त्रविषयं स्वयमेव त्यक्त्वोत्सर्गशास्त्रेण तद्विषयभिन्नं लक्ष्यं संस्क्रियते॰ शास्त्रप्रक्रियाज्ञानपूर्वक
प्रयोगे एव धर्म इत्यस्मादेव ज्ञायत इति बोध्यं॰

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

राम॰ ४५

८६४

भाष्ये प्रतीक्षत इति॰ अपवादविषयमसंज्ञात्वात्तत्रोत्सर्गबुद्धिर्निवर्तत इत्यर्थः॰ पाक्षिक इति॰ पक्षे भवति इत्यर्थः॰ ध्यात्वादित्वाद्ठञ्॰ कतरस्मि
न्पक्षे इति॰ भवः सदोषः इति शेषः॰ विभक्तिनियमे चापीति॰ अर्थनियमोऽपि सामान्यरूपेण विभक्तिविषयो नियमो भवत्येव नियमस्याने
श्रितत्वादिति भावः॰ विभक्तेरर्थान्तरसंबंधानवर्तको विभक्तिनियमः अर्थविशिष्टान्तरसंबंधानिवर्तकोऽर्थनियम इति भेदः॰ अत्र पक्षद्व

प्रसज्यप्रतिषेधाश्रयेणार्थनियमे पक्षद्वयेऽपि प्रथमनियमपक्षाश्रयेण परिहर्तुमाह॰ पाक्षिक इति॰ अप्रथ
माविधिनेति॰ अप्रथमेति पर्युदासे नञ् द्वितीयादीनां परिग्रहणमित्यर्थः॰ प्रथमा चेति॰ प्रसज्यप्रतिषेधं आश्री ५८
३२ यते इत्यर्थः॰ तद्यदेति॰ कर्मणि द्वितीये नेत्यस्मिन्नियमे द्वितीयादीनामनियमात्प्रातिपदिकार्थमात्रेऽपि भावात्तदाश्रयो
शत॰ शान चोप्राप्नुत इति दोषः॰ प्रसज्यप्रतिषेधे तु प्रथमाया अपि तत्राभावात्तदाश्रयः प्रतिषेधः प्रवर्तत इत्यर्थनियम
पक्षेन दोषः॰
तु पक्षं पर्युदासार्थनियमौ पर्युदासविभक्तिनियमौ॰ प्रसज्यप्रतिषेधार्थनियमौ॰ प्रसज्यप्रतिषेधविभक्तिनियमौ चेति॰ तत्राद्य एव दोषोद्भावन
मिति भावः॰ पक्षद्वयेऽपि॰ पर्युदासप्रसज्यप्रतिषेधरूपपक्षद्वयेऽपि॰ प्रसज्यप्रतिषेधे स्थिते॰ यदि प्रथमासामानाधिकरण्यमस्ति इति पर्युदास
आश्रीयते तदापि न दोषः॰ अन्यसामानाधिकरण्ये प्रथमासामानाधिकरण्यस्यापि सत्त्वेन तत्रोक्तिप्रतीतयोगिताकत्वेनाभावादित्यपि बोध्यं॰

वै०वि०२०३ नन्वर्थनयमे शत्रृशानचोरभावे पि ऱ्थविभक्तिश्रवणापत्तिरत आह शतृशानचोरिति अनियमत्वायाश्चेति यदाहि विभक्तौ तस्य प्रयोगस्य यथा प्राप्तिन्नस्त्रन्यासे इत्यर्थः अप्रयुक्तनियमस्य वस्त्र संमतत्वात् तन्न च प्रथमायाः अर्थविशेषपुरस्कारेण नियतायाः प्रातिपदिकार्थ मात्रप्रतिवद्धायाः सन्निधानमस्त्येवेति भावः ननु वार्त्तिकन्यासे पर्युदासपक्षे तन्न्यासे एतन्नियमस्वीकारे प्रथमाया वाक्येप्येवमेव नियमापत्तौ

विधमपक्षेपि न दोषः शतृशानचोरभावात् तिङ्क्ष्वसत्सु तत्समानाधिकरणात्प्रथमैवेति नियमेन द्वितीयादी नां व्यावर्त्तनात् यदाह इति कर्मण्येव द्वितीयेत्येवं द्वितीयादीनां कर्मादिषु नियतत्वात्तदभावे तासामत्राभावाद नियताया श्च प्रथमायाः सन्निधानात् पर्युदासे प्रसज्यप्रतिषेधे वा नास्ति शतृशानचोः प्रसंग इत्यर्थः॥ ॥

देवदत्त पचत् इत्यत्र स्याद्यो विभक्तिसामान्याभावेन पर्युदासपक्षे प्रथमाभिन्नविभक्त्यंतत्वाभावेन शत्रादेरप्राप्तावपि प्रसज्यप्रतिषेधे राम०
प्रथमांतसामानाधिकरण्याभावेन निषेधाप्रवृत्तौ तौ स्यातामिति चेन्न वार्त्तिकमते शत्रादिविधौ प्रसज्यप्रतिषेधएव प्रथमाविधाव ४६
र्थनियम एवेति न दोषः सूत्रमते तु न यथा पि न क्षतिरिति तात्पर्यात्॥ ॥४६॥ ॥४७॥ ॥४८॥ ॥४९॥ ॥श्रीकृष्ण

८६१

षे

षष्ठी शेषे॥ ॥किमप्रधानमिति। कर्मादिभिन्नविशेषणमित्यतो यत्र शिष्टः सर्वोपयोगे इत्यतो वाचकमिति निष्पन्न इति श्रेषः तत्रापि षष्ठीप्रसंग इति न चैतस्य कर्मत्वादिविवक्षायां चाभिताद्यर्थो न क्रियाकारकभावे नान्वयेत तद्वृद्धिभिर्बाधात्क्षय आपत्तिः अभिहितविषयेपि प्रथमयाबाध्येदि ति वाच्यं ज्ञोविदर्थस्य करणे इत्यादिषु शेषे इत्यनुवृत्तेस्तद्विषयेक्रियाकारकभावे नान्वयेपि परत्वात्षष्ठीप्रसंग इत्येतेआहेति तदर्थान्वेषः

षष्ठी॥ ॥कः शेष इति किमप्रधानं शेषउतोपयुक्तादन्यः पूर्वस्मिन्पक्षे सर्वेषां कारकाणां क्रियार्थत्वाच्छेषत्वमिति तत्रापि षष्ठीप्र संगः सर्वत्र कर्मादीनां सद्भावादुत्तरोपि शेषार्थो न प्रकल्प्यत इति प्रश्नः कर्मादिभ्य इति कर्माद्यनंतरं शेषशब्द उच्चार्यमाणस्तेभ्यो न्य मर्थं प्रतिपादयतीत्येन्कः श्रौ इति स्वस्वामिभावादयः संबंधा इत्यर्थः तदुक्तं संबंधः कारकेभ्योन्यः क्रियाकारकपूर्वकः श्रुतायामश्रु तायां वा क्रियायां सोभिधीयत इति तत्राश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसंबंधपूर्वको न्यएव स्वस्वामिभावादिकः संबंधः प्रतीयते

शेषशब्दोन्यवाची तस्य प्रतियोग्याकांक्षायामुपस्थितकर्मादय एवेप्रकरणादृग्यंत इत्याह कर्माद्यनंतरमिति ननु कर्मादिव्यतिरिक्ता यो संभव इत्यत आह स्वस्वामीति क्रियाकारकेति स्वत्वहेतु दानादिक्रियाकारकत्वपूर्वक इत्यर्थः यतएवैनि धोतः कारकेभ्योन्य इत्यर्थः

विशेषणाभाव एव स्मरणं प्रति मातुरिति· क्रियाकर्मत्वमूलकविशेष्यविशेषणाभाव इत्यर्थः· एतेन क्रियाकारकभाव एव संबंधत्वेन विवक्षितं इत्येव भाष्य· षष्ठ्यर्थेक सांसर्गिकत्वविषयतावक्ष्यात्र भाष्यकारः· राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्य इति· संबंधाभावादिति· दानादिनास्वीकरणादिरिक संबंधाभावादित्यर्थः· सर्वत्रैतस्यास्तन्निमित्तस्य च कर्मादेरवश्यंभावादित्यन्वयः· न तु राज्ञः पुरुष

मातुः स्मरतीत्यादौ तु स्मरणमात्रे क्रियाशब्दे सदपि कर्मत्वमविवक्षितत्वाद्विशेषणाभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते· मातृसंबंधिस्मरणमिति· अविदिताभिप्रायः पर आह· यद्येवमिति· क्रियामंतरेण संबंधाभावात्सर्वत्र तस्या अवश्यंभावात्तन्निमित्तस्य च कर्मादेरिति भावः· राजा कर्त्तेति· राज्ञा पुरुषाय ददातीत्यर्थसंप्रत्ययात्· वृक्षस्येति· लोकप्रसिद्ध्येत्युक्तं· वैशेषिकप्रक्रियायां त्ववयवोवयविनोधिकरणं· विनिमयादिति· परिवर्त्तनादित्यर्थः·

इत्यत्र राजा पुरुषस्य किंचिद्ददातीति राजा कर्त्ता पुरुषः संप्रदानं भवतु नाम· राज्ञो वस्त्रं विप्रस्य गौः· विप्रस्य तिला इत्यादौ तु तदसंभवाच्छेषत्वं भविष्यतीत्यत आह· भाष्येण तत्त्वं नामेति· तत्र याञ्चाशब्देन तत्सर्वं कः प्रतिग्रहो लक्ष्यते· अपहरणादिति· यथा पुद्गलक्षत्रियादीनां· क्रयविनिमय योर्भेदमाह· परिवर्त्तनादिति·

न विवक्ष्यत इति· न हि यद्यद्वस्तु स्थितमस्ति तत्तदभिधातव्यं यदेव विवक्षितं तदेव कार्यकृदिति भावः· वृक्षस्य शाखेत्यादावप्याधाराधेयभावमूलकोवयवावयविभाव इष्यते बोध्यं· असतो विवक्षाया· प्रकृतेन संगतिरत आह· दृष्टांतेति· भाष्ये तत्र षष्ठी प्राप्नोतीति· पर्यायेणेति भावः· प

एवं तर्हीति· क्रियाकारकसंबंधोपि सर्वत्र यस्तु स्थितमस्ति तन्निमित्तश्च स्वस्वामिभावादिरपि तत्र स्वस्वामिभावादिविवक्षायां सत्यपि क्रियाकारकसंबंधो न विवक्ष्यते· अलोमिकेति· लोमकार्याकरणत्वं तामपि लोमाभिविवक्षा· अनुदरेति· सदप्युदरं महत्त्वाभावप्रतिपादनाय न विवक्ष्यते· असतश्चेति· दृष्टांतरूपेणेदमुपात्तं· असतो यथा विवक्षा न्यासतोप्यविवक्षेत्यर्थः· समुद्रः कुंडिकेति· कुंडिकायां बहुपानीयसंभवप्रतिपादनाय समुद्रत्वमारोप्यते· विंध्यो वर्धितकमिति· वर्धितकशब्देन मूले स्थूलमग्रे सूक्ष्मं विशिष्टसंस्थानपुरुषभक्तमुच्यते· तस्य महत्त्वप्रतिपादनाय विंध्यत्वमसदारोप्यते· अर्थानियमपक्षे शेषग्रहणस्य प्रत्याख्यानाय विचारः क्रियते· किमर्थमिति॥ ॥

स्थेति नियमेन योगपद्यासंभवात्· ननु स्वादिवाक्येन षष्ठ्यामपि पर्यायेण प्राप्तायां पुनः षष्ठीविधानं स प्राप्तशेषविध्यर्थं न तु नियमार्थमित्यत आह· समेद्रिति· एवं च मीमांसकमतसिद्धोयं नियम इति भावः· व्याकरणे तु परिसंख्यापि नियमपदेनोच्यते अर्थानियमे पिडतरार्थशेषग्रहणमावश्यकमिति बोध्यं॥ ॥

कै०कि०२०३ शक्यमकर्तुमित्यस्यापाकर्तुं शक्यमित्यर्थः॥ ननु शेषग्रहणाभावेपि शेषसत्वेन न्यासांतरस्यचादर्शनेनेति चेदिदमनुपपन्नमत आह॥ व्याकरणां
तरेष्विति॥ भाष्ये॥ व्यतिरिक्तइत्यस्य प्रातिपदिकार्थातिरिक्तयाराजनिरूपितविशेष्यतयासहितइत्यर्थः॥ परंतु षष्ठ्यर्थसंबंधस्यांशेनोपकल्पिष्ट
तयाप्रतीतेस्तेन प्रातिपदिकार्थातिरिक्तेन सहितइत्यर्थइति॥ तच्च पुरुषेस्वामित्वकृतं स्वत्वमपि षष्ठ्याभिहितमिति पुरुषशब्दात्सप्तीने

तन्नियमार्थमिति॥ यथासमदेशे पनेनेति समविषमयोः पर्यायेण प्रसंगेसमविषमस्थानेसमविधिर्विषमनिवारणफलत्वा
न्नियमः संपद्यते तथाषष्ठीविधिर्द्वितीयादिनिवारणफलः षष्ठीशेषइतिचेदिति॥ अस्मिन्सूत्रन्यासे दोषः संबंधस्यद्विष्ठत्वात्तथा
नादपिषष्ठीप्रसंगः॥ व्याकरणांतरेतुगुणेषष्ठीतिवचनान्नास्तिदोषः॥ प्रतिपदिकायामपिषष्ठ्याप्रातिपदिकार्थमात्रेविधीयमा
नायाः प्रथमायाः संबंधस्याधिकस्याभावादप्रसंगइतिमत्वाह॥ तत्र प्रथमेति॥ यदत्रेति॥ राज्ञइत्येतत्पदसन्निधाने पुरुषस्य
त्वधिमभाष्येणतस्यषष्ठ्यर्थत्वोक्त्यावाच्यार्थ संबंधित्वप्रतीयतेनान्यथापुरुषप्रातिपदिकेतुस्वार्थमात्रेवर्ततइति प्रथमात्तिष्यतीत्यर्थः राम
त्वकृथनानुपपत्तेः॥ भाष्ये षष्ठीयथास्यादिति॥ कारकप्रातिपदिकार्थव्यतिरिक्तत्वात्षष्ठ्येवस्यादित्यर्थः॥ संबंधस्य विशेष्यविशेषणभावस्य ४८
यदत्राधिक्यमितिभाष्ये॥ उक्तरूपपदांतरसन्निधाने प्रतीयमानत्वाद्वाच्यार्थत्वं संबंधित्वं॥ उक्तसंबंधकृतराजनिरूपितविशेष्यत्वं॥ ॥

८६७

राज्ञः संबंधित्वावगमः॥ संबंधकृताविशेषणत्वावगमः॥ एवंचविशेषणत्वस्यवाच्यार्थत्वेतन्नियामकसंबंधोपिवाच्यार्थएवास्विति
तेपि प्रथमाप्रसंगइत्यर्थः॥ संबंधित्वं विशेषणत्वं॥ अनियतप्रतियोगीति॥ अनियतविशेष्यनिरूपितमित्यर्थस्तदाह॥ राजापरोप

कुतोन्वितिपुरुषपदसन्निधानएवराज्ञः संबंधित्वावगमोनान्यथेतितेपि प्रथमाप्रसंगः॥ अंतरेणेति॥
राज्ञइति केवलेपिपदेउच्चार्यमाणे संबंधिमेत्वेनियतप्रतियोगिराज्ञोगम्यते॥ यस्माद्राजापरोपकारित्वे
नविवक्षितोनस्वनिष्ठत्वेन॥ ननुचनैतेनेति॥ नहिशब्दभावाभावाभ्यामर्थस्यभावाभावोक्षिप्येतोकिंतर्ह्य
र्थस्यप्रतिपिपादयिषयाविषयीकरणाकरणाभ्यां शब्दस्योच्चारणानुच्चारणलक्षणौभावाभावावित्यर्थः।

कारित्वेनेति॥ विशेषणत्वेनेत्यर्थः॥ नस्वनिष्ठत्वेन॥ नस्वार्थनिरूपितविशेष्यतया॥ भाष्ये पुरुषेसोर्थइति॥ किंचिदन्यपदार्थनिरूपितंविशेष्य
त्वे॥ शब्देऽर्थयोर्नित्यत्वात्शब्दकृतमर्थकृतमित्यनुपपन्नमत आह॥ किंतर्ह्यर्थस्येति॥ अर्थस्यशब्दोच्चारणप्रयोजकत्वाच्छब्देऽर्थकृतत्वमिवार्थे
शब्दकृतत्वेनेतिभावः॥ प्रतिपिपादयिषयेस्यविषयीकरणाकरणाभ्यामित्यनेनान्वयः

कैयि०२०३ राजनि सोर्थ इति॰ विशेषणत्वं संबंधश्चेत्यर्थः तदाह॰ तत्रेति॰ परोपकारित्वेन॰ विशेषणत्वेन॰ षष्ठी भवतीति॰ तस्य विशेषणता संबंधनि
यामक संबंधबोधिका तद्गतविशेषणताबोधिका च षष्ठी भवतीत्यर्थः॰ पुरुषस्येत्तूपकार्यतयेति॰ अविवक्षितत्वेनेति शेषः॰ राजादिप
दासन्निधाने तस्योपकार्यतया न्यनिरूपितविशेष्यतयाऽविवक्षितत्वेन स्वनिष्ठतया स्वार्थमात्रनिष्ठविशेष्यतया विवक्षितत्वादंतरंग
त्वात्प्रथमेत्यर्थः॰ द्विष्ठ इति॰ असौ संबंधः परार्थत्वात्॰ परविशेषणत्वमर्थः प्रयोजनं यस्य तत्त्वात्॰ विशेषणतानियामकत्वादित्यर्थः

तत्र परोपकारित्वेन राज्ञो विवक्षितत्वात्षष्ठी भवति॰ पुरुषस्य तूपकार्यतया स्वनिष्ठत्वेन विवक्षितत्वात्प्रथमा॰
ननु कं हरिणा॰ द्विष्ठोप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते॰ तत्राभिधीयमानश्च परार्थेष्वपयुज्यत इति॥ ॥

भेदे सति विशेषणतया विवक्षितस्य संबंधं विना विशेषणत्वासंभवेन तदाकांक्षितत्वात्तत्र संबंधो व्यतिरिच्यते उद्भूततया प्रतीयत इति तत्रै
व षष्ठीत्यर्थः॰ विशेष्यस्य तु स्वनिष्ठत्वादेव न विशेष्यतानियामकसंबंधापेक्षेति भावः॰ तत्र विशेषणशब्देन षष्ठ्यादिना प्रतीय
मानः प्रधानेष्वपयुज्यते तस्य द्विष्ठत्वस्वभावात्॰ राजादिनिरूपितविशेष्यतया राजादिपदसन्निधाने प्रतीयमानो याउपकारको भवतीत्यर्थः राम॰ ४९

८६८

किं पुनस्तदिति भाष्ये॰ सोर्थ इत्यत्र तच्छब्दार्थः कः किं विशेषणत्वमेवोतान्यो पीति प्रश्नः॰ उत्तरं स्वामित्वमिति॰ स्वामित्वं तच्छोतं विशेषण
त्वं चेत्यर्थः॰ स्वस्वामिसंबंध इति॰ तन्मूलकं विशेषणत्वं चेत्यपि बोध्यं॰ स्वस्वामिनोः संबंधः स्वत्वस्वामित्वोभयरूपः स चैकदेशेन स्वनि
ष्ठः स्वामिनि ष्ठश्चेति बोध्यं॰ समासेति॰ स्वशब्दः दैश्वर्य आमिनि च स्वामिशब्द इति भावः॰ भाष्ये किंकृतमिति॰ स्वत्वद्वौ वे च रूपद्वानुपा

स्वामित्वमिति॰ स्वस्वामिसंबंध इत्यर्थः॰ समासकृत्तद्धितेषु संबंधाभिधानमिति वचनात्॰ स्वकृतमिति॰ तन्त्र नियतं स्वमपे
क्ष्य प्रथममेव संबंधाश्रया षष्ठ्युत्पाद्यते पुरुषशब्दसन्निधौ तु स्वविशेषप्रतिपत्तिरित्यर्थः॰ तद्यथेति॰ प्रातिपदिकार्थानामित्यर्थः॰
केचित्तु प्रातिपदिकार्थानामित्येव पाठः॰ क्रियाकृता इति॰ क्रियापेक्षया शक्तयः आश्रीयंत इत्यर्थः॰ तत्कृताश्चेति॰ शक्तिनिमित्ताः संज्ञा इ
त्यर्थः॰

दानादिति भावः॰ उत्तरयति॰ स्वकृतमिति॰ सामान्यतः स्वमात्रनिरूपितमित्यर्थः॰ नन्वेवं पुरुषशब्दोपादानं व्यर्थमत आह॰ पुरुषेति॰ ननु स्वा
मित्वप्रतिपिपादयिषायां राजा स्वामीति प्रयुज्यतां किमिति षष्ठीप्रयोगः॰ प्रयोगयोर्विषयविभागश्च कः॰ सामान्यनिरूपिते स्वामित्वं च कथ
मित्याशंकां दृष्टांतेनोपपादयति भाष्ये यथेति॰ क्रियाकृताः क्रियासामान्यनिरूपिताः उपजायंते विवक्ष्यंते॰ तदेवाह॰ आश्रीयंत इति॰

कैoयo२०३

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

पदेत्यादि॰ उभयत्रापि भवतीत्यस्यान्त इति शेषः शक्तिलक्षणार्थातिरेकेति॰ अयं भावः सर्वे पदार्थाः सर्वशक्तिमन्तः शक्तिशक्तिमतोर्धर्मिणोर्भेदाभेदौ॰ तत्र भेदविवक्षायां विभक्त्यः अभेदविवक्षायां तु करणादिशब्दैरभिधानं भेदविवक्षा च क्रियासामान्ये क्रियाविशेषे वा विशेषणत्वेनान्वयविवक्षायामेव भवतीति॰ इयमेव च क्रियां प्रति व्यापारावेशविवक्षा यत्र स्यां विशेषणत्वविवक्षा प्रातिपदिकार्थतां विभक्तिस

कदाचिदिति॰ यदा क्रियां प्रति व्यापारविवक्षा भवति दात्रेण लुनातीति॰ कदाचिन्नेति॰ यदा योग्यतामात्रविवक्षा भवति दात्रं लवने करणमिति॰ व्यभिचरन्तीति॰ यदा प्रातिपदिकार्थस्य क्रियावेशविवक्षायां शक्तिलक्षणार्थातिरेको भवति तदा प्रातिपदिकार्थता शक्त्यो न प्रतिपद्यन्त इत्यर्थः॰ यदा हीति॰ परोपकारित्वेन स्वनिष्ठतया यदा प्रातिपदिकार्थो विवक्ष्यत इत्यर्थः॰ तदेवं दात्रेणेति॰ यथा क्रियायां पक्षे भवति तथा दात्र इति स्वापेक्षया॰ यथा च स्वनिष्ठत्वाश्रयेण दात्रं करणमिति भवति तथा दात्रस्वामी स्वीकृतं भवति॰ आख्याभूता इति ताः शक्त्यः संज्ञामेवाश्रितास्तु विभक्त्युत्पत्तिं प्रयोजयन्तीत्यर्थः॥ ॥ ॥

मभिव्याहारे निमापितदर्थतां॰ अपरोपकारित्वेनेति॰ इतराविशेषणत्वेनेत्यर्थः॰ स्वनिष्ठतया स्वार्थनिरूपितविशेष्यतया॰ दृष्टान्तमुपपाद्य दार्ष्टान्तिके योजयति॰ तद्वदिति॰ एवं च स्वप्रकृत्यर्थस्याविशेषणतापि विभक्त्यर्थ इति बोध्यं॰ संज्ञाभेनेति॰ संज्ञाव्यवहारः॰ करणत्वादिव्यवहारस्तु मन्वेत्यर्थः॰
विभक्त्यभावेन शास्त्रीयसंज्ञाया अनुपयोगात्॰

सधर्मः॰ शक्तिरूपः॰ नाभिधीयते॰ सामान्यतो विशेषतो ना पृथक्त्वाभिधीयते॰ फलाश्रयत्वादिनैव ततो बोधादिति भावः॰ उपकारः॰ स्वप्रकृत्यर्थस्येतराविशेषणत्वानियामकः॰ कर्मादिपदेन संबंधपदेन वोक्तस्येन शक्तिरूपता॰ नापि संबंधरूपता॰ अत्र कर्मादिशब्दैर्नाभिधीयते इत्युक्तत्वात्कृदन्ते सर्वत्रातदन्तभिधानमितिलभ्यते नहि कृत्कर्मशब्दयोः कश्चिद्विशेषः॰ उभयत्रापि कर्मणीप्रत्ययात्॰ विभक्त्यादिभिरित्यत्रादिशब्दआश्रयनाचीतिबोध्यं॰ उक्तमाशासमभ्यानानोयस्यादधिकमिति सूत्रोक्तरीत्या अभिव्यक्तदत्ते पंचाला इत्यत्र पंचालशब्दाद्द्वितीयेव प्रकृते पु

तदुक्तं॰ स्वशब्दैरभिधाने तु सधर्मो नाभिधीयते॰ विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति॰ पुरुषेपीति॰
संबंधस्याद्दृष्टत्वात् दृष्ट्यां षष्ठी प्राप्नोतीत्यर्थः॰ शक्तिस्तु प्रातिपदिकार्थस्यैव न क्रियास्येति विशेषः॥ ॥राम॰

रूपपदात्षष्ठी शंकते॰ नाप्येपर्यवतहीति॰ ननु षष्ठ्या उभयत्रापतिवद्द्वितीयादीनामप्युभयत्रापतिः कुतो नकृतेत्यतआह॰ शक्तिस्त्विति॰ संबंधस्तु स्वस्वामित्वोभयरूपतयोभयवृत्तिस्त्वमिति भावः॰ यद्यप्येवं क्रियाकारकभावसंबंधोप्यद्दृष्ट एव तथापि कर्मत्वीत्यादि शेषत्वबलादिहस्वामित्वस्येव तत्रभक्तेरपितदर्थत्वान्नदोषः॰ क्रियावाचकस्य प्रातिपदिकत्वादपि न तत्प्राप्तिरिति बोध्यं॥ ॥राम॥ ॥राम॥ ॥

रामo
५०
८६९

कै०वि०२०३

षष्ठ्यपि हितमिति भाष्ये। अयं भावः कटं भीष्ममित्यादौ प्रकारान्तरेण द्वितीयाप्राप्त्या स्वीकारेण प्रमाणवशप्रकं राजपदोत्तरषष्ठ्या स्वामित्वस्योक्तावपि पुरुषे संबन्धं विना पुरुषनिरूपितस्वामित्वाप्रत्ययेन तत्र न तव प्रयोगयतमिति। नन्वर्थलब्धे पि स्वामित्वे स्यान्नराज्ञः स्वामित्वादौ षष्ठी दृश्यते। किंच वार्तिकमते इदं परिगणनेन विरुद्धमितः पूर्वपुरुषमभिप्रायेस्मारयति। गुणप्रधानभावेनेति। रूपान्तरं। विशेषणतानि

राजशब्दादिति। गुणप्रधानभावेनार्थद्वयमवस्थितमिति क्रमेतत्। तत्र संबन्धो गुणोपदंन्यस्य द्विष्ठत्वात्प्रधानमपि संस्पृशति। गुणश्च प्रधानोपकाराय प्रवृत्तो रूपान्तरमाश्रयति। प्रधानं तु स्वनिष्ठमेव न तु रूपान्तरं भजते। पुरुषस्येति षष्ठ्यानेन भाव्यमिति प्राप्तस्य बाधयति। न तर्हीति। भवतीति। यदा पुरुषस्य गुणभावो राज्ञस्तु विशेष्यत्वं तदा पुरुषस्य राजेति भवत्येवेत्यर्थः। भवति बाह्यमिति। एकस्यापि वस्तुनो भिन्नविषयो गुणप्रधानभावो न विरुध्यते॥ ॥

यामकसंबन्धवत्त्वं पदान्तरासमभिव्याहारे पीति भावः। प्रधानं त्विति। पदान्तरासमभिव्याहारे इति शेषः। रूपान्तरं। अन्यनिरूपितविशेष्यतानि-
यामकसंबन्धं। तस्याख्यानाप्रतीतेरिति भावः। अनयारीत्या पञ्चालशब्दाद्द्वितीयावारणमपि कर्तुं शक्यं। तदा पुरुषस्य राजेति। पुरुषसंबन्धी राजे- ५१
ति तदा बोध इति भावः॥ ५०॥ ५१॥

अधीगर्थ॥ ॥एषां कर्मणि शेषत्वेन विवक्षिते षष्ठीति सिद्धान्ते सूत्रार्थः। कर्मादीनामविवक्षा शेष इति बोध्यं। ननु कर्मविवक्षायां किंनिमित्तेन संबन्धेन मात्रादेः स्मरणेन्वय इत्यत आह। मातुरिति। अवस्थानविषयत्वभवने माता कर्त्री स्मरणमधिकरणं तन्निमित्तकं विषयत्वसंबं

अधीगर्थ॥ ॥मातुः स्मरतीति। मातृस्मरणमौरवस्थानादिक्रियानिमित्तः संबन्ध इति केचिदाहुः। अन्ये तु स्मरणस्य क्रियारूपत्वात्क्रियान्तरमन्तरेणैव द्रव्येण संबन्धोपपत्तिमाहुः। यथा द्वयोः काष्ठयोर्जतुकृतः संश्लेषो जतुनस्तु काष्ठेन स्वत एव न अन्तरकृतः। कर्मादिष्विति। आदिशब्दोत्राश्रयेनाचीय। यथा विष्णुरादिः। इत्यासनो भीष्मादिश्च सुयोधनः। नेजयन्तिरणेत्यान्यैषां विष्णुः समाश्रय इति। तेन कर्माश्रयाः द्वितीयाविधिनिमित्तभावेनोपात्ताः सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मादिशब्देनोच्यन्ते।

यइत्यर्थः। अन्ये त्विति। स्वकर्मत्वकृतो विषयविषयिभाव एव संबन्ध इति भावः। कर्मव्यतिरिक्तस्याभावादादिशब्दवैफल्यमत आह। आदिशब्द इति। द्वितीयाविधिनिमित्तभावेनेति। द्वितीयापवादषष्ठीविधिनिमित्तभावेनेत्यर्थः। दिवविषये विनोपसर्गे द्वितीयात्रा इत्यत्र इति सूत्र द्वयारं भसामर्थ्यात्र प्रकरणे शेषग्रहणेनुवृत्तिर्नेति वार्तिकारंभः।

वै०वि०२०३ यदा भावे लस्तदैवानभिहितत्वात्षष्ठी॰ यदा कर्मणि तदाभिहितत्वात्प्रथमैवेत्याह॰ कर्मणि चेति॰ विनापीति॰ अत्र ह्यदन्ते ब्रह्मदत्तशब्दप्रयोगइ
त्यर्थः॰ तत्सभावेऽसिद्धिमुपपादयति॰ नाप्राप्तेइति॰ वस्तुतस्तु अयं पक्षत्रयो ब्राह्मणइत्यादौ लोकेनेति विनाप्यतिदेशविषये स्वाश्रयाणि

अकर्मकाणामिति॰ तेन मातुः स्मर्यतइति भावे लकारस्य सकरवल्त्वर्था भवंति॰ कर्मणि तु लादिषु विधीयमानेषु तैरभि
हितत्वात्कर्मणः षष्ठ्यानभाव्यमिति प्रथमैव भवति॰ माता स्मर्यतइति॰ तत्करणं किमर्थमिति॰ विनापि वतिना
तिदेशः सिध्यति॰ परार्थेशब्दप्रयोगात्॰ स्वाश्रयमपीति॰ नाप्राप्ते स्वाश्रये आरभ्यमाणोतिदेशः तद्बाधेत॰ कर्मा
भिधाने हीति॰ यद्यकर्मकवद्भावो न विधीयते तदा लादिभिः कर्मैवाभिधातव्यं न भावः ततस्तत्समानाधिकरण्या
त्क्तांतादीनां तदीयलिंगसंख्याप्रसंगः॰ यथा माता स्मर्तेति॰ भावे तु स्मृतौ क्तादीनां नपुंसकत्वमेकवचनं च भवति॰

वत्तिदर्शनात्तद्इदं चिंत्यं॰ किंतु तत्सभावेऽकर्मकसंज्ञैव स्यात्॰ तथा च स्वाश्रयेन स्यादिति भाष्यतात्पर्यं॰ भाष्येऽकर्मकवद्भावस्य फलांतरमा राम
ह॰ कर्माभिधाने हीति॰ द्वितीयार्थे॰ ५२

८७०
871

इत्येकेइति॰ तत्रेष्टापत्तिरित्यत्रारुचिः॰ भाष्येऽविवक्षिते कर्मणीति॰ एवं चाविवक्षितकर्मकत्वाद्द्रावित्यादयः सिद्धाइति भावः॰ नन्वेवं शे
षषष्ठ्यैव सिद्धेः प्रकरणमिदं व्यर्थमत आह॰ प्रकरणं चेति॰ मंजूकातु कृत्तेर युक्तत्वात्सूर्वसूत्रेपि शेषइत्यस्य संबंधो बोध्यः॰ साधनैरिति॰ अ

षष्ठीप्रसंगश्चेति॰ यदा स्मृतेः शब्दे कर्मणि लिङ्को विधीयते तदा मातृशब्दसामानाधिकरण्याद्धात्वयस्याद्यपेक्षया य
था मातृशब्दात्षष्ठी न भवति तथा स्मृतशब्दादपि स्यादित्येके व्याचक्षते॰ अन्ये त्वाहुः॰ अनभिहिताभिकारानपेक्षणे
न यथा मातृशब्दात्कर्मणि षष्ठी भवत्येवं स्मृतशब्दादपि स्यादिति॰ ननु क्रियमाणोऽनभिहिताधिकारः कथं नापेक्ष्य
तइत्याशंक्याह॰ अपरआहेति॰ प्रसंक्तव्येति॰ प्रापणीयेत्यर्थः॰ शेषइतीति॰ प्रकरणं चेदं समासप्रतिषेधार्थमिति समा
सप्रकरणे व्याख्यातं तेन मातुः स्मृतमिति षष्ठीसमासो न भवति॰ उक्तं च हरिणा॰ साधनैर्व्यपदिष्टे च श्रूयमाणक्रियेपुनः॰
प्रोक्ताप्रतिपदं षष्ठीसमासस्य निवृत्तयइति॰
यमाणक्रियेइति स्वरूपकथनं॰ न च शेषत्वाविवक्षायां कृद्योगषष्ठ्या समासस्य दुर्वारत्वेनेदं व्यर्थं आदिकर्मणि क्तः कर्तरि क्तप्रत्ययांतस्म
तादिभिः समासवारणार्थत्वात्॰ नहि तत्र कृद्योगलक्षणा षष्ठी न लोकेति निषेधादिति बोध्यं॥ ॥५२॥ ॥५३॥ ॥ ॥श्रीराम

कै॰वि॰२०३ रुजा॥ ॥कर्मणि षष्ठीविधानेन भावकर्तृकादित्यनुपपन्नमत आह- ल्यब्लोप इति- तत्रत्याख्यानपक्षेप्याह- अथवेति- कर्तृत्वासंभवादिति असत्त्वभूतस्य भावस्यार्थातिरिक्तकर्तृत्वासंभवादिति भावः- कर्तरीति- बहुलवचनादित्यर्थः- अन्येत्विति- बाहुलकाधिकरणबहुव्रीह्या

रुजा॥ ॥भाववतेति- धातूनां भाववाचित्वाव्यभिचारात्- भावकर्तृकादिति- ल्यब्लोपे कर्मणि पंचमी- भावकर्तृकमाश्रित्येत्यर्थः- अथवा भावकर्तृकधात्वर्थकर्मचौरादिकं भावकर्तृशब्देनोक्तं- कथं पुनर्भाववचनानामित्यस्य भावकर्तृकाणामित्यर्थो भवतीत्युच्यते- भावशब्देन घञादिवाच्यः सिद्धरूपोर्थोभिधीयते न तु साध्यरूपस्तस्य कर्तृत्वासंभवात्- वचनशब्देपि प्रत्ययार्थः कर्ता विवक्षितः कर्तरि ल्युटो विधानात्- प्रकृत्यर्थस्तु वचनक्रिया न विवक्ष्यते- तेन भावो वचनः कर्ता येषां ते भाववचनाः भावकर्तृका इत्यर्थः संपद्यते- अन्ये त्वाहुः- भावे वचनं येषां ते भाववचनाः सति भावे कर्तरि येषां वचनमुच्चारणं भावकर्तृकधात्वर्थप्रतिपादनाय येषामभिधानमित्यर्थः- नदीकूलानीति- रुजाशब्दो व्याधौ रूढः तत्र प्रसंग एव नास्ति तस्माद्रुजार्थानामिति धातुमात्रनिर्देशाश्रयमिदं प्रत्युदाहरणं रुजाशब्देन निर्देशे श्लेष्मा पुरुषं रुजतीति प्रत्युदाहार्यमित्याहुः॥ ॥ राम

अयणं बरमित्यभिमानः- रुजाशब्द इति- ~~[illegible]~~- अन्यथा रुजार्थानामिति निर्देशोनुपपन्न इति भावः- धातुमात्रेति- धात्वर्थमात्रेत्यर्थः- अकार उच्चारणार्थ इति निर्देशोपपत्तिरिति भावः- तिङंतं प्रत्युदाहरणं वार्तिकमते- शेषग्रहणानुवृत्तेस्तन्मतेऽभावात्॥ ॥५४॥५५॥५६॥५७॥५८॥५९॥ ५३

८७१

द्वितीया ब्राह्मणे॥ ॥भाष्ये पूर्वेणापीति- विभाषोपसर्ग इत्यनेनेत्यर्थः- दिव इति सूत्रे शेषग्रहणानुवृत्त्या शेषे षष्ठी तत्त्वाविवक्षायां द्वितीयेतीदमपि सिद्धमत आह- अत्र च शेष इति- दिवस्तदर्थस्येति सूत्रे इत्यर्थः- अत्र शेष इत्यस्य संबंधे विभाषोपसर्ग इति सूत्रं समासविकल्पफलकं वाच्यं तथा चानोपसर्ग। इति पूर्वसूत्रनिषेधे शेषषष्ठ्याः समासविकल्पेन रूपद्वयस्य सिद्धतया विभाषाग्रहणं व्यर्थं स्यात्-

द्वितीया ब्राह्मणे॥ ॥किमुदाहरणमिति- पूर्वसूत्रे व्यवस्थितविभाषाज्ञानात्सोपसर्गस्य दीव्यतेः कर्मणि छंदसि द्वितीयैव भविष्यति गांप्रदीव्यंतीत्यादाविति प्रश्नः- गामस्येति- अत्र दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोति- अत्र च शेष इति नानुवर्त्तते एतत्सूत्रारंभात्पूर्वसूत्रारंभं भाष्ये ज्ञापयते॥

विभाषोपसर्ग इति सूत्रे शेष इत्यस्यासंबंधे तु वेदेपि तेनैव कर्मणि द्वितीयायाः सोपसर्गे सिद्धत्वेन आपाद्यरूपाभावेन निरुपसर्गेपि कर्मत्वविवक्षायां दिव इत्यस्याप्रवृत्त्या कर्मणि द्वितीयेत्येन सिद्धतया द्वितीया ब्राह्मण इत्यस्य वैयर्थ्यापत्तिः- क्वचित्त्विदं न प्रवर्त्तत इति पुनर्विधानं समासाभावायेत्यपि न वाच्यमिति भावः-

त्रि०२०३

परेत्तुदिवइतिसूत्रेशेषइत्यस्यनिवृत्तिव्याख्यानादेव॰नोपसर्गइत्यत्रविभाषोपसर्गइत्यतःपदलाघवाभावात्॰ तिङंतेरूपद्वया
र्थंविभाषाग्रहणस्यावश्यकत्वाच्च छीतितुप्रतिपदविधानेतिनिषेधात्षष्ठीसमासाभावएव॰अतएवतद्भाष्यकृतानप्रत्याख्या
तमित्याहुः॰परेत्तुदिवइतिसूत्रेशेषइतिसंबध्यतएव॰कर्मादिष्वकर्मकवद्भूत्वनमितिवार्त्तिकरीत्याश्रुतस्यदीव्यतेइतिभावे
इष्टःप्रयोगःसिध्यति॰अतएवसकर्मकाअधीगर्थादयःप्रेष्यब्रूपर्यंताःकर्मादिशब्देनोच्यंतइतिकैयटः शेषइत्यनुवृत्त्यावार्त्तिक
प्रत्याख्यानेएवभाष्यतात्पर्यं॰अत्रचेतिकैयटस्याप्यत्रप्रकरणेइत्यर्थः॰एवंचात्रत्यंभाष्यंवार्त्तिकरीत्या॰एवंज्ञोविदर्थस्यकरणेअधीगर्थइति
सूत्रेचनशेषपदसंबंधोमानाभावात्॰अत्रचमंडूकानुवृत्तिरतएवयदाकर्मभिर्विवक्षितमित्येवोक्तंअन्यथाकर्मादिविवक्षितमितिव
देदित्याहुः॥ ॥६०॥ ॥छछछ॥ ॥ ॥राम राम॥ ॥श्रीकृष्ण॥ ॥राम राम॥ ॥छछछछछछ राम०

५४

८७२

प्रेष्यब्रुवोः॥ ॥हविषःप्रस्थानासंभवादाह॰यदेति॰॥ ॥६१॥ ॥चतुर्थ्यर्थेबहुलंछंदसि॥ ॥खर्वेण॰अग्निदग्धशरावेण॰अंजलिर

प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने॥ ॥हविषोप्रस्थितस्येति॰यदाप्रस्थितत्वेनह
विर्विशेष्यतेतदाषष्ठीनभवतीत्यर्थः॥ ॥चतुर्थ्यर्थेबहुलंछंदसि॥ ॥या
खर्वेणेति॰रजस्वलायाःखर्वपानादिनिषेधार्थोयमर्थवादः॰चतुर्थीति॰षष्ठीप्र
करणात्षष्ठ्यर्थेचतुर्थीभवतीत्येकोवाक्यार्थः चतुर्थ्यर्थेषष्ठीतिद्वितीयः॥ ॥

पक्षशरावोवाविहितइतिबोध्यं॰खर्वेणामनः॥ ॥छछछछछछछछछछछछछछछछछछछछछछ

वि०२०३ रजस्वलाप्रस्तावे तैत्तिरीयश्रुतौ॰ नसहासीत नास्या अन्नमद्यात् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्ते ऽथो खल्वाहुरभ्यंजनं वाव स्त्रिया अ
न्नमभ्यंजनमेव न प्रतिगृह्यं काममन्यदिति॰ यां मलवद्वाससं संभवंति यस्ततो जायते सोभिशस्तः इत्यादि॰ मलवद्वाससं रजस्वलां॰ संभवंति गर्भाधानार्थमुपगछं
ति॰ ततो जातो भिशस्तः मिथ्यारोपितपातकः अरण्ये इति संभवंतीत्यनुवर्तते॰ स्तेनश्चोरः॰ पराची॰ लज्जादिना पराङ्मुखी तं वदना मन्य
चितां वा॰ तस्या ह्रीतमुखी लज्जावनतवदनः॰ तस्यैव व्याख्या अपगल्भः॰ अगल्भ इत्यर्थः॰ मरुकोमरणशीलः॰ अभ्यंक्ते॰ तैलादिने
श१५ तिशेषः॰ दुश्चर्मी कुष्ठी प्रलिखते चित्राद्यालिखति॰ खलतिरकेशशिराः॰ अपमारी अपमृत्युयुक्तः अंजने नेत्रयोः कज्जलदाने श्यावदन्
मलिनदंतः याकरणानि ओषध्यादीन् छिनत्ति उद्बंधुकः॰ गले रज्जुं बध्वा मरणशीलः॰ उन्मादुकः॰ उन्मत्तशीलः॰ एतदग्रश्रुतौ मारख
र्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेत्॰ अंजलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथायाहल्यायै जारमनाय्येतं
तुरिति तस्मात्तिस्रो रात्रीरुक्तव्रतं चरेत्॰ अहल्यायाजार इत्यर्थे ऽहल्यायैजारेत्यादि॥ ॥६२॥ ॥६३॥ ॥६४॥ ॥राम राम० ५५

८७३

कर्तृक॥ ॥यथोक्तेति॰ तस्य कर्मकर्त्रर्थमित्यस्यार्थोत्तरं वक्तुं पूर्वोक्तार्थकत्वं निरस्यतीति भावः॰ ननु कर्तृकर्मत्वे क्रियापेक्षत्वेन भावत्वपक्षे इति भा
तो रित्यपुक्तमत आह॰ इहेति॰ वाचकं धातुमिति॰ तत्तद्वाचकाक्षेपे पिधात्वाक्षेपे मानाभावः खनतीत्याद्यर्थे जायमानानां तद्धितानामपि क्रि
योपसर्जनद्रव्यवाचकत्वेन क्रियावाचकत्वात् तदर्थाभ्याद्यपि कर्तृत्वादि प्रयुक्तकार्यदर्शनाच्च अयमेव तस्य कर्मकर्त्रर्थ इति तत्तु राशयइ

कर्तृ॥ ॥तस्य कर्मकर्त्रर्थमिति॰ कर्तृकर्मविशेषणार्थं कृद्ग्रहणमित्यर्थः॰ नेतदिति॰ यथोक्तप्रयोजने कृद्ग्रहणमिह तावन्नोपयुज्य
त इति दर्शयति॰ पश्चादुत्तरत्रानुपयोगं दर्शयिष्यति॰ इह कर्तृकर्मसन्निधाना क्रियासन्निधीयते क्रियायाहि कारकं भवति सा च वा
चकं धातुं प्रत्ययसहितमाक्षिपतीति भवत्याह॰ धातोर्हीति॰ तदेवं व्यावर्त्यासंभवादिहार्थं कृद्ग्रहणे कर्तृकर्मविशेषणार्थेनोपयुज्यत
इति दर्शितं॰ इदानीमुत्तरार्थत्वमाशंक्य निराकरोति॰ नक्रम इति॰ नलोकाव्ययेत्यत्राव्ययं कृद्ग्रहणेन विशेष्यते कृतो व्ययस्य येक
र्तृकर्मणीत न षष्ठीप्रतिषेधो यथा स्यात् कटं कृत्वेत्यादौ अव्ययस्य कर्तृकर्मणोः षष्ठीनिषेधो मा भूदुच्चैः कटानां स्रष्टेति॰॥

ति वाच्ये॰ एतद्भाष्यसामान्येन कारकान्वययोग्यक्रियाधातुवाच्यैव न तु तद्धितादिवाच्येति निर्णयेनादोषात्॰ एवं च देवदत्तेन शत्योभ्यत्रास्त्रिकोप
मित्यादयो ऽप्रयोगा एव॰ अत एव हिरुगादियोगेन द्वितीयादयः॰ न चाधिकारवारीकृणेनेत्यनापत्तिरत्र प्रकृत्यादित्वाद् इतो वा ततीयासले नादो
षादिति पंचमे निरूपयिष्यामः॥

Dr. BHAU DAJI MEMORIAL डाक्टर भाऊदाजीस्मारक

भाष्ये कृतोऽव्ययस्य येइति । अकृतोऽव्ययस्य प्रयोगे यस्मिंश्चित्क्रियानिरूपिते ये कर्तृकर्मणी इत्यर्थः । तत्रस्यापि अव्ययप्रयोगेनेत्येवार्थः । त
दंतकर्मकर्तृत्वादिति । कृदंतकर्तृत्वकर्मत्वमेवैतयोर्नत्वव्ययकर्तृत्वकर्मत्वमेतयोरित्यर्थः । तदुपपादयति । अन्यथेति । संदेहे तत्पुरुषस्ये

प्रतिषेध इति । नलोकाव्ययेति सूत्रेऽव्ययग्रहणेन कर्तृकर्मणी विशेष्येते अव्ययस्य ये कर्तृकर्मणी तयोः षष्ठी न भवतीति । न च कृदं
तादव्ययादन्यस्याव्ययस्य कर्तृकर्मणी संभवत इति सामर्थ्यलभ्यं तत्रापि कृद्ग्रहणमित्यर्थः । कृत इति । स्रष्टेत्यस्य । नाव्ययस्येति । नोच्चैः
शब्दस्येत्यर्थः । तस्याक्रियावाचित्वात् । न देशः । आह । अधिकरणमिति । उच्चैः स्थाने स्थितानां कटानां स्रष्टेत्यर्थः । कृतोपेइति । एकस्येव कृ
तोन तु भिन्नयोः कृतोरित्यर्थः । कृद्ग्रहणे द्विक्रियमाणे शब्दप्रतिपादितत्वादन्यपदार्थस्योभयथा प्राप्ताविति बहुव्रीहिर्लभ्यते । अन्य
थान्तरंगत्वात्तत्पुरुषः स्यात् । अपेति । कृतौ लोके त्वस्याविवक्षा जातिविवक्षा वा तत्पुरुषं च मत्वा चोदयति । कृत्यन्यपदार्थे बहुव्री
हिराश्रीयत इति परिहारः । तेनाश्चर्यो गवां दोहोऽगोपालकेनेत्यादावेव नियमः प्रवर्तते । पद्मवद्भुतरत्ने बहुग्रहणं कर्तव्यं ॥॥ राम॰

वन्याय्यत्वे कृत्यपदोपादाने तु अन्यपदार्थस्य स्पष्टत्वाद्बहुव्रीहिरेवेति भावः । भाष्ये प्रतिषेधशब्दो नियमशास्त्राणां निषेधे पर्यवसा ५६
नमभिप्रेत्येत्याहुः । एकस्यैव विवक्षामिति । उद्देश्यांशे निमित्तगतत्वादिति भावः ॥ ॥

८७४

भाष्ये कृतोयेइति । कृदंतशक्तिग्रहसहकारेणोपस्थितायाः क्रियाया येत्यर्थः । तद्धितस्येति । तद्धितांतशक्तिग्रहसहकारेणैवोपस्थितक्रियाया येइत्य
र्थः । एतद्वाक्यमन्नाभावे हेतुमाह । तद्धितीयेति । कटापेक्षत्वादिति । कृत इत्यस्य विशेष्यतया कटसापेक्षत्वादित्यर्थः । अन्यथा क्रियायाः कार
कांशे नित्यसापेक्षतया असंगतिः स्पष्टैवेति बोध्यं । नित्यसापेक्षस्यापि क्वचिदेव समासो न सर्वत्रेत्याशयमन्ये । भाष्ये यो सौ कृतकटयोरिति । यः

अथवा व्याख्यानाद्बहुव्रीहिराश्रयिष्यत इत्याशंकामाह । अथवेति । कृतपूर्वीति । कृतं पूर्वमनेनेति सुप्सुपेति समासः । पूर्वा
दिनिः सपूर्वाच्चेतीनि प्रत्ययः । कर्तात्र तद्धितेनोक्त इति नतः षष्ठीप्रसंगाभावः । कटात्तु कर्मणः षष्ठी माभूदित्येवमर्थं कृ
द्ग्रहणं । नत्वेति । कृतपूर्वी कटमित्यनेनेत्यर्थः । द्वितीयमेति । नत्वाभ्यामात्तोतदपवादः षष्ठ्यपि न प्राप्नोति । इहाप्य
नभिहिताधिकारात् । सापेक्षमिति । कृतः पूर्वं कटोनेनेति विवक्षायां कटापेक्षत्वात्तद्धितेन न भाव्यमित्यर्थः । योसावि
ति । कृतः कटोनेनेति वाक्ये कृतकटयोः सामानाधिकरण्यं । अस्मिंश्चार्थविशेषेण भाव्यं वृत्त्या तस्याः सामान्यविषयत्वात् ।

कृतकटयोः सामानाधिकरण्यरूपः संबंधो वाक्ये दृष्टः स उत्पन्ने प्रत्यये इष्टे प्रत्यये इनौ निवर्तते निवृत्त इति बुद्धिविषयो भवतीति भावः । विष
यकृतेशब्देन वृत्ति सत्वात्तत्रान्यार्थदर्शनात् तद्धितार्थैकदेशीभूतस्य कृतस्य कटेन संबंधाभावादिति भावः ॥ ॥

कै॰गि॰०२०३ ननु विशेषातिरिक्तसामान्यसद्भावे प्रमाणाभावात् क्वचिद्धात्वर्थफलाश्रयः केनाभिहित इति ज्ञानकाले तदर्थफलेऽन्वितस्य कटस्यानभिहिततया वक्तु
मशक्यत्वाच्च कर्मसामान्ये इत्यसंगतमत आह· भावे इति· अविवक्षितकर्मतमा अकर्मकत्वं फलांशे प्रागाश्रयविशेषान्वयाविवक्षैवात्र कर्माविवक्षेत्याहुः· कृतं पूर्वमनेनेति· अर्थप्रदर्शनमात्रमेतत् न त्वयं प्रयोगः साधुः प्रत्ययोत्पत्त्यनंतरं भाष्ये सामानाधिकरण्यान्वयस्योक्तेर्वाक्ये कृतकटयोः सामानाधिकरण्येन प्रयोगस्यैव साधुत्वात्· कर्मत्वमिति· अत्रानभिहितं कटस्य कर्मत्वमित्यर्थः· विशेषकर्मेति· कृतः कटोऽनेनेत्य

तस्मात्कर्मसामान्ये भावे वा क्त उत्पद्यते· तत्र कृतं पूर्वमनेनेत्यस्मिन्नर्थे कृतपूर्वीशब्दो वर्तते तेन न पूर्वे कृतवा
नित्यर्थः संपद्यते· तत्र करोति नान्यक्रियापेक्षं अस्ति कटस्य कर्मत्वं· तथा हि हरिः· विशेषकर्मसंबंधेन भुंक्ते
पिकृतादिभिः· विशेषनिरपेक्षो न्यः कृतशब्दः प्रवर्तते·· अकर्मकत्वे सत्येवं भावे क्तोऽभिधायिनि॥

स्यामवस्थायां कृतशब्देन विशेषकर्मकत्वे दीसंबंधेन भुंक्तेऽपि अनुभूतेऽपि तस्यामवस्थायां असामर्थ्येन वृत्तिविरहाद्विशेषनिरपेक्षो राम
भाववचनोऽन्य एव कृतशब्दः प्रवर्तते वृत्तिं लभत इत्यर्थः· तदेवोपपादयन् अविवक्षितकर्मतमैया भावे क्त इत्याह· अकर्मकत्व इति· एवं· ५७
विशेषनिरपेक्षत्वे विशेषरहितसामान्यस्याभावादित्यर्थः· अत्र क्तान्तं भावाभिधायि तदिति क्वचित्पाठः स पुक्ततरः· स प्राप्यंते पाठे भावाभि
धायिनि सति समासे तद्धितोत्पत्तिरिति शेषः·

८७५

एवं सति तद्धितोत्पत्तौ यथाऽसामर्थ्यं न भवति तथा दर्शयति· ततः क्रियावतेति· कर्मणां कटादीनां क्रियावत्त्वत्र्यर्थकेनिनातदंतोपस्थाप्यक्रिय
या योगो भवतीत्यर्थः· तत्रोपपत्तिमाह· अविग्रहेति· विशिष्यप्राधान्येन ग्रहो ग्रहणं तद्रहितप्राधान्येन गृह्यमाणापीत्यर्थः· गुणभूतक्रियया
पि कारकाणां संबंधदर्शनादिति भावः· तदुक्तं भाष्ये· अस्ति च करोतेः कटेन सामर्थ्यमिति· सामान्येन तदा वृत्तिरिति· अविवक्षितकर्मतया धात्व
र्थमात्रवृत्तिना भावक्तान्तेनेत्यर्थः· विशेषार्थिनेति· कर्मविशेषजिज्ञासानिवर्तकयत्नवतेत्यर्थः· एषा च विवक्षा प्रयोगानुसारात्क्वचिदेव तेने

ततः क्रियावता कर्त्रा योगो भवति कर्मणां· अविग्रहागतादिस्थामभाया
मादिकर्मभिः· क्रियासंबध्यते तद्वत्कृतपूर्व्यादिषु स्थिता इति॥ ॥श्रीः

घटं क्रियते घटं कृतमित्यादिना पादनीयं· छन्दः ग्रहणे कृते तु न दोषः कर्मणः कृदंतमात्रोपस्थाप्यक्रियान्वयाभावात्· सत्त्वास्योक्तरीत्यान क्वापि
पृथक्प्रयोग इति तन्मात्रस्य शक्तिग्रहाभावात्· अत एव तंडुलानां पाचकपुत्रः पाचकतरः इत्यादौ न दोषः निषेधस्त्रेपिलादिसाहचर्यान्निष्ठांशेऽपि न
धार्थ इति न निषेधप्रवृत्तिः· कटे कृतवत्सु त्रे इत्यादौ चानिषेधप्रवृत्तिरत एव भाष्यकरोतेः कटेन सामर्थ्यमित्युक्तं न तु कृतशब्दस्य कटेनेत्युक्तं·
मे॰ एवं च सकर्मकधातावीदृशविवक्षायाभावे क्तप्रत्यय ईदृशसमासविषय एव नान्यत्रेति भाष्यस्वरसाल्लभ्यते· अनेन देशाभिप्रायादोऽनुगत्यर्थाकर्म
कोऽतभावे क्त इति बोध्यं·

कै०वि०२०३ एतच्च विशेषापेक्षायामिति। अत्रैव प्रधान्याभावेन तृतीयादिविधाविति विशेषापेक्षायामित्यर्थः। विरोधाभावे हेतुरेकशब्दवाच्यत्व

कर्तृभूतपूर्वमात्रादिति। करोतीति कृदिति कर्त्राभिधीयते। तत्र कर्तरि पुनः षष्ठीविधानाद्ग्रहणं तेपि भवति। एवं तु तद्धित
भिद्वित्तिर्न कृतास्यात्। भेदिकेति भिदेर्ण्यन्तात्सर्यादिपुल्वुच्। अत्र प्रयोजककर्त्ताएव धर्मस्य प्राधान्यात्प्रधानं तत्र प्रधानाप्र
धानसन्निधौ प्रधानादेव षष्ठी स्यान्नाप्रधानात्। कृद्ग्रहणं तु भवति। ×प्रयोज्यकर्त्ता तु प्रकृत्यर्थस्य प्राधान्यादप्रधानं×अ
थ कर्तृभूतपूर्वादिति कथमुच्यते। न हि प्रयोजकसन्निधौ प्रयोज्यस्य कर्तृत्वमपैति। गत्यादिसूत्रेन ममात्कर्मत्वाभावात्
कर्तृत्वस्यैवावस्थानात्। एवं तर्हि प्राधान्यस्यात्र पूर्वत्वं विवक्षितं। प्रधानचरात्कर्तुरित्यर्थः। एतच्चविशेषापेक्षायां
प्रयोजनमुक्तं यदा तु न तीयावत्कर्तृमात्रे षष्ठी स्यात्र्यामितेतदाभिन्नशब्दवाच्ययोः प्रधानाप्रधानयोः कर्त्रोरेकवा
च्यतायामभावाद्विरोधाभावात् षष्ठी सिध्यतीति नेदं कृद्ग्रहणस्य प्रयोजनं। तद्धितनिवृत्तिस्तु प्रयोजनमेव॥ ॥॰ रामः ५८

भावः तदुपपादकं भिन्नशब्दवाच्ययोरित्यादि इति बोध्यम्॥ ॥६५॥ ॥ ८७६

उभयप्राप्तौ॥ ॥नियमेनानेनेति। नियमत्र आस्त्रारणां निषेधेत्वासर्यादन्यथानुवादवैयर्थ्यापत्तिरिति भावः स्त्रीप्रत्यय एवेति भाष्ये अकाकारयोर्भेदिकाचिकीर्षि
तिकृतिरिति च स्त्रीप्रत्यय एवोदाहरणादानादिति तदाशयः अपरेत्विति नोदाहरणमादरणीयमिति तद्भावः॥ ॥६६॥ ॥क्तस्य च वर्त॥ ॥नपुंसके भावक्ति

उभयप्राप्तौ कर्मणि॥ ॥षष्ठ्याः प्रतिषेधइति। नियमेनानेन कर्तुः षष्ठी प्रतिषिध्यत इत्यपि प्रेत्येतदुक्तं। भेदिकेति। पर्या
यादेवुच्। शेषे विभाषेति। अकाकारव्यतिरिक्तं स्त्रीप्रत्ययएव नान्यत्रेति केचिदाहुः अपरे तु प्रत्ययमात्रेऽकाका
रवर्जिते विकल्पमिच्छंति। शब्दानामनुशासनमाचार्यस्याचार्येणेतिवा॥ ॥क्तस्य च वर्तमाने॥ ॥छात्रस्य हसितमि
ति। हासोहसितं नपुंसके भावे क्तः तत्र छात्रस्य कर्तृत्वान्नतीयाप्रसंगे षष्ठीविधानार्थं वचनं। शेषश्च कइति। कर्तृत्वेन त्वा
न्नास्ति शेषत्वमिति प्रश्नः कर्मादीनामिति। सदपि छात्रस्य कर्तृत्वमविवक्षया पाक्रियते। संबंधित्वमात्रं त्वत्र विवक्षितं छा
त्रस्य संबंधि हसितमित्यर्थः
इदं वार्त्तिकं नपुंसके भावइति लक्षणप्रतिपदोक्तपरिभाषया कालोदासीन नपुंसके भावे क्त इति सूत्रविहितक्तयोग एव तेन भूते भावे क्तेन योगे
त्ती येनेति वार्त्तिकमतं यद्यपि शेषत्वविवक्षया पिसिद्धं तथापि कर्तृत्वप्रकारकबोधपक्षार्थमिदमिति वार्त्तिकाशयः। भाष्यकारस्तु शाप एवार्थे
साधुत्वमंगीकृत्य प्रत्याचख्यौ।

कै०वि०२०३ साध्ये पदे च मिति· एवं शेषत्वविवक्षया षष्ठ्यंगीकारे· अधिकरणवाचिनश्चेत्यत्रेति· एतत्सूत्रोदाहरणविषयीभूतगत्यर्थे इत्यर्थः· तत्र हि क्तोधिकरणे च ध्रौव्यगति इति विशेषविधाना न्नपुंसके भावे क्त इत्यस्य प्रवृत्तिरेवेति वार्त्तिकमते वार्त्तिकेन षष्ठी न प्राप्नोति शेषत्वविवक्षायाश्च भावविषये भावएवेति वार्त्तिकमते नैश्वर्येण प्रत्याख्यानमते च शेषे षष्ठी स्यादिति चातुः शब्दैरित्यर्थः· तदेवाह· तत्र शेषेति

उत्तरत्रेति· अधिकरणवाचिनश्चेत्यत्र· इदमिति· अत्राधिकरणे क्तः तेनाभिहितमधिकरणमिति इदं शब्दात्प्रथमा कृता· अहिशब्दात्त्वधिकरणवाचिनश्चेति षष्ठी· इहाहिना सुप्तमिति· अत्र भावे क्तः· इहाहिः सुप्त इति अत्र कर्त्तरि क्तः· इहाहेः सुप्तमिति· भावएव क्तः· तत्र शेषविवक्षायां षष्ठी स्यादिति चोद्यं उच्यते एवेति परिहारः· ग्रामस्य पार्श्व इति· सप्तमी प्रयोगेण नायमधिकरणे क्तः कृतः· किं तर्हि भाव इति दर्शयति·

कर्माविवक्षयाऽकर्मकत्वे इमानि चत्वारि रूपाणि· सकर्मकत्वे तु अहिना सुप्तो ग्राम इति पंचममपि बोध्यमिति केचित्· सप्तमी प्रयोगेणेति· इहेति सप्तमी प्रयोगेणैवेदं दर्शितं इह पदार्थस्येव चेदं विवरणं भाष्य इति बोध्यं· किं तर्हि भाव इति· इदमिहाहिः सुप्त इत्युदाहरणे कर्त्तरि त्वस्योपलक्षणं॥ ॥६७॥ ॥६८॥ राम ५९

८७१

नलोकाव्यय॥ ॥अपनीयेति· सल्लिङ्ग्रहणेन तस्य फलाभावादित्यर्थः· लग्रहणेनैव सत्कानचू कसूनां सिद्धत्वात् किं सल्लिङ्ग्रहणेनेत्यत आह· किकिनौ चेति· लत्वस्य लादेशयोग इत्येवार्थः· लयोग इति तु नशक्यं· आदेशे लत्वस्याविधित्वेन स्थानिवत्त्वायोगात्· लिङ्कार्यातिदेशादि

नलोक॥ ॥लादेश इति· लग्रहणमपनीय सल्लिङ्ग्रहणं कर्त्तव्यं· तत्र सद्ग्रहणेन शतृशानचौ गृह्येते लिङ्ग्रहणेन कानच्क्वसू लिङ्संज्ञाविधानात् किकिनौ च· लग्रहणे तु किकिनोरलादेशत्वादग्रहणप्रसंगः· अथ तावितेि· लिङ्वदिति देशाल्लादेशतुल्यावित्यर्थो विवक्षितः परस्तु पयोक्तमभिप्रायमप्रतिपद्य लादेशत्वमेवानयोरभिप्रतिपन्नमिति मत्वाह· वा छंदस्यादिति· वक्ष्यामीति· व्याख्यास्यामीत्यर्थः· परस्य पूर्वोक्तातिदेशः कर्त्तव्यत्वेनानेन नोक्षित इति मत्वाह· सत्यमिति· विशेषातिदेशे च सामान्यातिदेशः प्रवर्त्तत एव विशेषस्य सामान्याव्यभिचारात्· तेन लमात्रनिबंधनः षष्ठी प्रतिषेधः किकिनोः प्रवर्त्तते· तदत्र लिङ्संज्ञा किकिनोर्विधीयत इति मत्वा वार्त्तिकारंभः· क्वापीति देशाश्रयेणात्र व्याख्यानेति· द्वित्वविधानेनैव सिद्धौ तद्वदतिदेशात् लिङादेशतुल्यावित्यर्थ इति भावः· व्याख्यास्यामीति· संज्ञां न व्याख्यास्यामि किं त्वतिदेशं व्याख्यास्यामि इत्यर्थः· ननु लिङ्वदतिदेशे पि कथं लमात्राश्रय षष्ठी निषेधः तत आह· विशेषेति· संज्ञा प्रकरणाभावादिति पत्नेदं स्फुटं॥ ॥राम॥

कै०नि०२०३ भाष्ये उकारेति । कारप्रयोगेण वर्णग्रहणमिति ध्वनितं तत्फलमाह । उकारांतेति । शब्दरूपं विशेष्यमादाय तदंतविधिः सच्च प्रत्यय एव साहचर्यादिति भावः । तेन कन्यामलंकरिष्णुरित्यादि सिद्धं । प्रत्ययाप्रत्यययोरिति तु वर्णग्रहणेन प्रवर्त्तत इति बोध्यं । एतेषां चेति ।

उकारप्रयोग इति । उकारांतप्रत्ययप्रयोग इत्यर्थः । उप्रत्ययोपि चांतवद्भावाद् गृह्यते । उकारोपीति । उश्चो ऋश्चेति द्वयोर्द्वंद्वः पूर्वो क्षिप्यते । ततोऽन्येषां । अन्यथा लवुकेति स्यात् । लप्रयोगे नेति । एतेषां चालादेशत्वात् ॥ ॥

भूरुषयोः शानजित्यादीनामित्यर्थः । भाष्ये प्रतिषेधार्थमिति । षष्ठ्याः सिद्धत्वेन प्रतिषेधमात्रफलकं वार्त्तिकमिति भावः । तदेव विध्यर्थमिति । नित्यं प्रतिषेधे प्राप्ते पक्षे षष्ठीविध्यर्थमित्यर्थः ॥ ॥६९॥ राम० ६०

८७८

अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ॥ स्वरितत्वेति । यथासंख्यसूत्रे स्वरितेनेत्यनुवृत्तेरिति भावः । भविष्यदधिकारेति । इदं च तुमुन्ण्वु

अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ॥ यथासंख्यापवादार्थं वचनं । अकस्येति । स्वरितत्वाप्रतिज्ञानाद्यथासंख्याभावव्याख्यानं चेदमित्याहुः । अकस्य त्वाधमर्ण्ये नास्ति विधानमिति भविष्यदधिकारविहितस्यैव तस्य ग्रहणं । शतं दायीति । आवश्यकाधमर्ण्ययोर्णिनिरिति णिनिः । ग्रामं गमीति । भविष्यति गम्यादय इति वचनाद्भविष्यति गमेरिनिः । गत्यर्थकर्मणीत्यत्र च चतुर्थी वैषेव पक्षे द्वितीयायां सिद्धायां द्वितीयाग्रहणमपवादविषयेपि विधानार्थं । ग्रामं गंतेति । यत्केचिदुक्तं तद्भाष्यकारस्य नाभिमतमिति ग्रामं गमीत्युदाहरणोपपत्तिः

लादिसूत्रभाष्ये स्पष्टं । भविष्यदर्थकस्यापि ग्रहणमिति पक्षांतरमपि तत्र स्पष्टं ॥ ॥७०॥

DR. BHAU DAJI MEMORIAL

कै०गि०२०३ कृत्यानां॥ ॥भाष्ये भावकर्मणोरिति॰ तत्र भावे कर्मकाद्विधानेन कर्मणोऽभाव एव कर्मणि तु सकर्मकाद्विधानेपि न स्यादिधानमेवेति भावः॰
न च कर्तव्य इत्यकर्मकादप्यविवक्षितकर्मतया भावे तव्ये पश्चात्कर्मसंनिधाने भावेपि संभव इति वाच्यं॰ भाष्यप्रामाण्येन कृत्यविषये तथावि
वक्षाया अभावादित्याहुः॰ भव्यादीनामिति॰ तत्र हि कर्तरि कृत्यः॰ गेयो माणवकः साम्नामित्यत्र कर्मणि चिकल्पाभावोपि सत्यर्थः॰ तन्नि च इत्यर्थमपीति॰

कृत्यानां कर्तरि वा॥ ॥नेहापीति॰ कालज्ञान न प्रयोगादिहाप्यनभिधानमित्यर्थः॰ कष्टव्येति॰ कृषेर्द्विकर्मक
त्वात्प्रधानकर्मणः कृत्येनाभिधानेनाप्रधानकर्मण इति तल्लिङ्गत्यर्थमपि कर्तग्रहणं कस्मान्न भवतीति भावः॥

कृत्यानां प्रयोगे कर्तर्येव षष्ठी केनेत्यत्र कर्मणि सा च वेति कस्मान्न व्याख्यायत इत्यर्थः॰ यद्यप्येवं व्याख्याने गेयो माणवकः साम्नामिति न सिध्यति तथा
प्युभयप्राप्ताविति स्वनुवर्त्य तत्र दोषाभाव इति भावः॰ अत्र पक्षे विधिसंभवे नियमानुपपत्तिमनुभयप्राप्तिविषये भवतः॰ कटः॰ कर्तव्यो भवताक राम० ६१
र्तेग्रह इत्यादाद्यत्यादाद्यसिद्धिं च मन्नमिति ध्याय भाष्ये उक्तं एवं तर्हीति॰

८७६

कै०वि०२०३ कर्तृकर्मणोर्द्वयोरपीति॰ विकल्पस्त्वनुभयप्राप्तिविषयः॰ आकृष्टव्या ग्रामं शाखा देवदत्तेनेत्यस्यैवेत्येरित्याशयः॰ व्यविस्त्वरसोप्येनमेव॰ भाष्ये ग्राम
मात्कृष्टव्यस्यस्य देवदत्तेनेति शेषः॰ उभयप्राप्ताविस्यस्य संबंधाज्ञानेन वा तन्मात्रमुदाहृतं देवदत्तस्य देवदत्तेन वा कर्तव्यमिति कर्तरि वेत्यस्योदा
हरणं॰ इहापि तर्हि प्राप्नोतीति निषेध इति शेषः॰ ननु चोभयप्राप्तिरिति॰ उभयप्राप्ताविति त्वसूत्र इति भावः॰ बहुव्रीहिरत्युत्तरं॰ पर्यायेणेति॰ कर्त्त
वेर

एवं तर्हीति॰ कृत्यानामित्येतावत्सूत्रं क्रियते तत्रचोभयप्राप्ताविति नेति च वर्तते॰ तेन कर्तृकर्मणोर्द्वयोरप्यु
भयप्राप्तौ कृत्ये न षष्ठी प्रतिषिध्यते॰ उभयप्राप्तिरेवेति॰ पर्यायेणेति मन्यते॰ उभयप्राप्तिर्नामेति॰ बहुव्रीहि
समासाश्रयणाद्यत्र कृत्ये युगपदुभयोः प्राप्तिस्तत्रैव षष्ठी निषिध्यत इत्यर्थः॥ ॥इत्युपाध्यायजैयट
पुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीये पादे तृतीयमाह्निकं॥ ॥३॥ ॥❁॥ ॥❁

रिभव्यादीनां विकल्पेन विधानादित्यर्थः॰ बहुव्रीहीति॰ कदाचित्कर्तरि कदाचित्कर्मणि कृत्य सत्त्वेन कृत्यप्रत्ययभेदादेकत्र कृत्ये युगपदुभयप्राप्ति राम० ६२
र्नास्तीति भावः॰ अनेन भाष्येण यत्रोभयोः प्रयोगस्तत्रैवोभयप्राप्तिरिति सूचितं॥ ॥७१॥ ॥७२॥ ॥७३॥ ॥❁॥ इति शिवभट्टसुत
सतीगर्भजनागेशभट्टकृते भाष्यप्रदीपोद्योते द्वितीयाध्यायस्य तृतीये पादे तृतीयमाह्निकं॥ ॥३॥ ॥पादश्च तृतीयः समाप्तः॥ ५३३॥ ❁॥

८८०

कै.वि.२.२
६२

इतिद्वितीयाध्यायस्यतृतीयःपादःसमाप्तः॥

८८

अथद्वितीयाध्यायस्यचतुर्थपादप्रारंभः

कै०वि०२०४

श्रीगणेशाय नमः॥ ॥द्विगुरेकवचनं॥ ॥तद्धितार्थेत्यत्र विहितस्य सर्वस्य द्विगुत्वात्समाहारद्विगोरेव ग्रहणे मानाभावः तस्मात्र ग्रहणे
पि समाहारशब्दस्य कर्मसाधनत्वे बहुवचनप्राप्तेर्वक्ष्यमाणमद्वीस्याभावसाधनत्वेपि तस्मात्तेः प्रश्नानुपपत्तिरत आह इहेति कर्मसाधनस्य

श्रीगणेशाय नमः॥ ॥द्विगु॥ ॥किमर्थमिति इह समाहारद्विगोरेव ग्रहणमिष्यते समाहरणं समाहारः स चैक एवेति सि
द्धमेकवचनमिति प्रश्नः अस्याधिकरणमिति समाह्रियत इति समाहार इति यदा कर्मणि घञ् तदानेकस्यार्थस्य समाह्रियमाण
स्य वाचको द्विगुरित्येकत्वाभावादप्राप्तमेकवचनं विधीयत इत्यर्थः अधिकरणशब्देन द्रव्यमुच्यते यत्संख्येद्रव्याभिधाने तत्संख्या
श्रयं वचनमुत्पद्यत इत्यर्थः पंचपूलीशब्देन पंचपूलाः समाह्रियमाणा उच्यन्ते ततो बहुवचनप्रसंग एकवचनविधाने संख्यासामानाधिकर
ण्याच्चेति अनेन कर्मसाधनत्वे समाहारशब्दस्य दर्शयति भावसाधनेऽद्वैयधिकरण्ये पंचानां पूलानां समाहार इति संख्याशब्देनात्र संख्यावा
चीशब्द उच्यते

येहणं तु तत्रैव भाष्ये निराकृतं द्रव्यमिति गुणादीनामाधारत्वादित्यर्थः एकद्रव्यवाचकत्वरूपसामानाधिकरण्यस्य शब्दधर्मत्वादाह संख्याशब्दे रा०मं०
नेति उच्यत इति अत एव द्विगुपदेन सामानाधिकरण्यं पारिभाषिके ग्रहणे हि द्विगाविति पंचमी स्यादिति भावः वचनमिति च सामान्येन पुंसके बोध्यं १

८८९

द्विग्वर्थस्येति एवं चानुप्रयोगेपि सिद्धिरिति भावः षष्ठीसमासे अर्थानुपपत्तिमाशंक्याह एकशेषविषय इति एकशेषे चेति तु भा

संख्यया वद्व्यर्थेयेति एकत्वनिरासपरमेतत् तेन द्व्यर्थोपि गृह्यते संख्या द्विग्रामीति तत्रानुप्रयोगस्येति द्विगुः समास ए
कवचनं प्रत्ययं प्रतिपद्यत इति पारिभाषिकैकवचनाश्रयेण दोषोपन्यासः उच्यते वचनमिति कृत्यल्युटो बहुलमिति कर्म
णि ल्युट् एकस्यार्थस्येति वाच्यवाचकसंबंधे षष्ठी एकस्यार्थस्य वाचको द्विगुः समास उच्चार्यत इत्यर्थः तत्र सामर्थ्याद
यमतिदेशः संपद्यते यो ह्यनेकस्यार्थस्य वाचकः स कथमेकस्य वाचकः तस्मादेकत्वाश्रयकार्यप्राप्तये द्विग्वर्थस्यैकव
द्भावो विधीयते ततश्च तस्मिन्नर्थे प्रयुज्यमानस्याद्विगोरप्येकवचनं सिध्यति एकशेषप्रतिषेध इति एकशेषविषय ए
कवद्भावउपचारादेकशेषशब्देनोक्तः पंचपूल्य इति अत्रैकशेषकृतेपि द्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्तः प्रतिषिध्यते।

ष्येविषयसप्तमी भाष्यस्वारस्यात्तु विषयसप्तम्यं तेन सुप्सुपेति समास इति लभ्यते॥ ॥छ॥

कै·वि·२·४ भाष्ये नैतद्द्विगोरिति· द्विग्वर्थस्येत्यर्थः· समुदायस्येति· उद्भूतावयवभेदस्येत्यर्थः· यद्यपि शिष्यमाणं लुप्यमानार्थाभिधायीति आश्रयणादपि द्विग्वर्थ ए
व तथापि न दोष इत्याह· बहिरंगत्वाच्चेति· बहुवचनसमभिव्याहारेणैवास्य प्रतीत्या आन्तसंस्कारानिवृत्तिरित्याशयः मन्ये· पंचकपालशब्द

कु०

नवेति· प्रथमस्य द्विग्वर्थस्यानेकत्वेऽपि उक्तस्यानेनैव द्वावः कृत· ततः एकशेषे कृते द्विग्वर्थसमुदायस्य द्विग्वर्थत्वाद्बहि
रंगत्वाच्च प्राथमकल्पिकेऽन्तरंगे द्विग्वर्थे चरितार्थत्वाच्चैकवद्भावो न प्राप्नोतीत्यर्थः· पंचकपालाविति· संस्कृतार्थविहित
त्वाण्णाद्विगोर्लुगनपत्य इति लुक्· किंपुनरिति· यदि तावदेकस्मिन्संस्कृते प्रत्ययमुत्पाद्य लुकि कृते एकशेषः क्रियते तदापि
चपूल्य इत्यनेन पंचकपालाविति समाधानं· अथ प्रथममेव पंचसु कपालेषु संस्कृतादित्यत्र बहुत्वसंख्यायुक्ताभ्यर्थविव
क्षायां तेनदोषां समाह्रियमाणत्वात्समाहाररूपनास्तीति क्रियमाणेऽपि समाहारग्रहणे निवृत्तिर्न सिध्यतीत्यर्थः॥ ॥

स्य प्रत्येकं समुदाये वा परिसमाप्तौ तद्धितार्थे द्विगुत्वानपायात्किं विचारेणेत्यत आह· यदि तावदिति समानमिति· अयमेव पुरस्तादेव चोदितं परिहृते राम०
त्येति भाष्यार्थः· समाह्रियमाणत्वादिति· समुदायरूपत्वादित्यर्थः· समुदायसमाहारो च्चपर्यायावितिभावः· निवृत्तिर्न सिध्यतीति· समाहारानुपादेनेकत्व २
विधानादप्यतन्नसिध्यतीति भाष्याक्षरार्थः

८८२

प्रत्येकमेव समाप्तिरित्यत्र विनिगमकमाह· न हीति· एवं च न वा समाहारैकत्वादिति निःफलं· किंच समासे संख्याविशेषानवगतेः समुदाय बहु
वचनोपपत्तिरपि नेति भाष्याशयः· तिरोहितेति· लक्ष्यानुरोधादिति भावः· अत्र पक्षे द्व्यानयनं तु नांतरीयकत्वाद्द्व्यासक्तोऽभेदन्यायेन वा अवश्य

एवं तर्हीति· न हि द्वयोर्बहूनां वा पुरोडाशानां पंचसु कपालेषु संस्कारः क्रियते अपि तु प्रत्येकमिति भावः· अपरआहेति· न वा
समाहारैकत्वादित्येतद्वार्तिकं सूत्रप्रत्याख्यानार्थमित्येतदुच्यते· अयं भावः· तिरोहितावयवभेदः समूहरूपः समाहारो द्वि
ग्वर्थस्तस्यैकत्वाद्द्वन्द्व इव पृथगादिवत्सिद्धमेकवचनमिति नार्थः सूत्रेण तस्मिंश्चासति समाहारग्रहणं न कर्तव्यं क्रियमाणे तु सू
त्रे समाहारग्रहणं तद्धितार्थद्विगुव्यावृत्त्यर्थं कर्तव्यमेव· तेन समाहार एव्यपदिष्टस्य द्विगोर्ग्रहणं भवति॥ ॥ ॥

चभावसाधन एव समाहारशब्दस्तत्राश्रयणीयः· अन्यथा पंचखट्वीत्यादावनुपसर्जनत्वाद्ध्रस्वो न स्यात्· एवं च न्यायसिद्धार्थानुवादकमेवेदं सूत्रमि
तिबोध्यं· समुदाये शब्दसमाप्तौ पंचगवः पटाइत्यादौ न तद्धितार्थेऽपि समाहारसंभवात्कथं तेनापि तद्व्यावृत्तिरत आह· समाहार एव्यपदिष्टस्येति· प्रतिप
दोक्तपरिभाषया तद्धितार्थद्विगोऽग्रहणत्वाभावादिति भावः·

कै०वि० २०४

पंचपूल्यादि इत्यनेनेदं तुल्यमित्याह। यदा बहूनामिति। असमास इति। वस्तुतः समासेऽन्तर्वर्तिविभक्त्यर्थसंख्यानवगमेन सर्वत्र समादेकशेषेऽणे
व बहुवचनादीति भाष्याशयः अत एव वैवन्हीत्यादि पाठे हन्ते चेत्यन्ते भाष्यसंगच्छते अन्यथा तदसंगतिमित्यन्ये। उत्तरपदद्विगुस्तु न समाहारग्रहणे
क०१

यस्तु तद्धितार्थेन त्यन्न भवति तेन पंचभिर्गोभिः क्रीताः पंचगवः पटा इत्यादौ द्विग्वर्थस्यैव द्वन्द्वाभा
वः। यदा बहूनां पटानां पंचगुत्वं न तु प्रत्येकं तदैकशेषस्यापमविषयः तदेव मन्यमानेन भाष्यकारेण
सू०३२ पूर्वव्याख्यानेऽसमास्वसतां प्रत्याख्यानत्वेन वार्तिकं व्याख्यातं। उत्तरपदे तु यो द्विगुस्तदर्थस्यार्थान्तरे
गुणभावादस्वान्त्यात्स्वपि प्रातिपदिकत्वेततः प्रत्ययानुत्पादादेकवद्भावातिदेशः प्रयोजनाभावान्न प्रवर्तते।

स्याव्यावर्त्य इत्याह। उत्तरपदे त्विति। सत्स्वपि प्रातिपदिकत्वे इति। तत्वे सत्स्वपि स्वगतसंख्याद्यभावान्न ततः प्रत्यय इति भावः। पंचगवप्रियइ
त्यादौ प्रत्ययान्तत्वात्प्रशस्तार्थवे त्वाभावाच्च न प्रातिपदिकत्वमित्यपि नास्यचितं॥ ॥१॥ ॥ ॥ [illegible]

रा०म०
३
८८३

द्वंद्वश्च प्रा॥ ॥पूर्वपक्षेपि प्रत्येकमंगशब्दसंबंधे युक्तिमाह। नहीति। एवं च पूर्वपक्षात्सिद्धान्ते को विशेष इत्यत आह। तस्मादन्यथेति। अंगान्यपि
त्येवं रूपबहुवचनान्तस्य सतः प्रत्येकं समाप्तिरित्यर्थः। पूर्वपक्षे प्राण्यंगस्य तु योगस्य सादि वचनव्यत्यव्यतिकरः शंकितः सिद्धान्ते तु प्राण्यंगानि

द्वंद्वश्च प्राणि॥ ॥तत्र वेतिरपदग्रहणमिति। यदंगवाचि पूर्वपदं तदंगवाच्येवमुत्तरपदं भवति तथा सत्येकवद्भावो ना
न्यथेत्यर्थः। व्यतिरेके माभूदिति। पाणिमार्दंगिकाश्वारोहा इत्यादावेकवद्भावो माभूदित्यर्थः। प्रत्येकमिति। बहुवचनान्तोंऽगशब्दः
प्रत्येकमभिसंबध्यत इति भावः। पूर्वपक्षेपि प्रत्येकमेवांगशब्दस्य संबंधः स त्वन्यथा प्राण्यंगत्वं योगसेनांगवाचिनां द्वंद्व एकव
दिति। नहि प्राणितूर्यसेनानामेकमंगं भवतीति सामर्थ्यादेव प्रत्येकपरिसमाप्तिरंगशब्दस्य सिद्धा तस्मादन्यथा प्रत्येकं परिसमा
प्तिर्बहुवचनान्तस्य सतः प्रतिपाद्यते।
तामित्यादि बहुवचनान्तलक्ष्यसंस्कारकत्वाभावस्तत्र फलाभावात् प्राण्यंगानां प्राण्यंगैरेकवद्भाव इति विशेष इति भावः। केवलप्रातिपदिकस्य पदान्त
रेणान्वयायोगाद्विभक्त्यन्तस्यैवान्वयो वाच्यस्तथा च श्रुतप्रमाणविभक्त्यर्थाविभक्त्यन्तरं कल्पने गौरवाद्बहुवचनान्तस्यैवांगशब्दस्यान्वय इति तात्पर्यं।

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्

BHAU DAJI MEMORIAL

कै॰वि॰२०४ वाक्यत्रयमिति। बहुवचनमंतोंगशब्दघटितमित्यर्थः। अत्र तूर्यांगशब्देन मार्दङ्गिकाः पाणविका इति मृदंगशंखवीणतराणावाद्युत्पत्याचेतरमिति सूत्रे भाष्यप्र
योगात्। तस्मादहर्चयांङ्ग सेनांगशब्देन रथारूढानामेव ग्रहणं संग्रामं हस्त्यश्वरथपदातीमिति येन विधिरिति सूत्रस्थभाष्यस्वरसात्फल
सेनेत्यत्र तु सेनाशब्देन हस्तिरथादयएवेत्याहुः॥ ॥२॥ ॥अनुवादे च॥ ॥प्रतिपत्ताश्रोता। अद्यतन्याभिन्नत्वप्राप्तानीति लुङः संज्ञा॥ ॥

तेनोऽस्माद्ग्रहणकवाक्याल्लुक्स्यसंस्कारकं वाक्यं यमुपलब्धवतद्ग्रहीतव्यतिकरो न भवति॥ ॥अनुवादे॥ ॥यदा प्रतिपत्ता प्रमा
णांतरावगतमप्यर्थं कार्यान्तरार्थं प्रयोक्ता प्रतिपादयते तदानुवादो भवति॥ ॥विशिष्टलिंगः॥ ॥जनपदविशेषो ग्रामः। ग्रामे
नाध्येयमभक्ष्यो ग्राम्यकुक्कुट इत्यादौ ग्रामग्रहणेन नगरस्यापि ग्रहणदर्शनादुच्यते। अग्रामा इत्यत्रेति। ग्रामनगरोभयावय
वे ग्रामसंबंध्येव प्रतिषेधो वक्तव्यः। शौर्पं नगरं केतवता ग्रामः। जाम्बवं नगरं शालूकिनी ग्रामः॥ ॥ ॥ ॥

॥३॥ ॥४॥ ॥५॥ ॥६॥ ॥विशिष्ट॥ ॥जनपदविशेषइति। जनपदस्य स्थानविशेषइत्यर्थः। ग्रामप्रतिषेधइति। ग्रामग्रहणेन नगरांतर्ग्र
हणेनेत्यर्थः। भाष्ये उभयतश्चेति। यो ग्रामाणां प्रतिषेधः स उभयतः ग्रामसर्वावयवकस्य ग्रामान्यतरावयवकस्य चेत्यर्थः। नगरसर्वावयवके च
नगराणामिति प्रतिषेध इति भावः। तदाह ग्रामनगरेत्यादि॥ ॥७॥ रा॰ ४

८८४

क्षुद्रजं॥ ॥अर्हार्थ इति। अनेन क्षुद्रशब्दे रगपिशाहार्थः। तेन जंतुशब्दस्य कर्मधारय इति ध्वनितं। भाष्ये स्वशोणितं नास्तीति। जलौकःप्रभृतीनां।

क्षुद्रजंतवः॥ ॥स्मृतीनां विरुद्धार्थानां दर्शनात्प्रश्नः के क्षुद्रजंतव इति। सोऽनव्याद् इति। अर्हार्थे कृत्यः। ये स्पृश्यमाना अपि न
म्रियंते जलौकाप्रभृतयः ये तु म्रियंते ते पापानि मितत्वात्र क्षोदार्हाः। नकुलपर्यंता इति। एतदेव दर्शनमत्र आपिलयाद्दृश्य
ते। अत एवैतस्य भाष्ये उपन्यासः॥ ॥येषां च॥ ॥यदन्यदिति। चकारेण पक्षेण परो विकल्पो बाध्यते तेनाश्वमहिषं काको
लूकमिति नित्यएकवद्भावो भवति॥ ॥शूद्राणां॥ ॥निरवसिता बहिष्कृताउच्यंते तत्रावधिप्रश्नः कुत इति। प्रागाद
र्शादिति। आदर्शो हयः पर्वतविशेषः। दक्षिणेनेति। एनबंतः एनपा द्वितीया प्रागादिभ्यः प्रथमांतेभ्यो देशवृत्तिभ्यः प्रत्य
यो विहितः एतत्पर्वतचतुष्टयमध्य आर्यावर्तो देश इत्यर्थः। यस्येति। एतेषामार्यावर्ते द्वावप्येत्यादिति भावः। ग्रामे
इति। एते चार्यनिवसंतीति भावः। तत्र यामिः प्रसिद्धः घोषाणे महिष्यादिनिवासः संवाहोवलीकृप्रधानः॥ ॥

॥८॥ ॥येषां च॥ ॥यदन्येति। पुनर्विधानार्थेनेत्यर्थः॥ ॥९॥ ॥शूद्रा॥ ॥प्रत्ययइति। द्विवृशब्दस्य इत्यादिना स्तानितस्य च मनुष्येति भावः।

डौंडोइति॰ श्मशाननिकटे येवसंतिमृतवस्त्रचितिकाष्ठादिसंग्राहकाश्चंडालसदृशास्तेडोंबाइत्युच्यंते॰ तस्माच्छूद्रोयज्ञेनवक्लृप्तइतिश्रुतेः
शूद्राणांयज्ञकर्मणोऽवहिष्कृतत्वंविरुद्धमित्यतआह॰ शूद्राणामिति॰ पूर्वोक्तश्रुतिस्त्वग्निहोत्रादिविषयेतिभावः॰तक्षादीनामिति॰तेषांसं

संस्पर्शादितिनिवासविशेषादित्यर्थः॥ मृतपाःडोंबाइत्याद्युः॥ यज्ञादिति॰ शूद्राणांपंचयज्ञानुष्ठानेधिकारोस्तीतिभा
वः॰ तक्षायस्कारमिति॰ तक्षादीनांयज्ञेधिकाराभावादितिभावः॥ संस्कारेणेति॰ यः संस्कारः स्मृतिकारैर्द्व्यशुद्धौपठि
तः तेनैवनत्वधिकेनेत्यर्थः॥ ॥गवाश्वप्रभृतीनिच॥ ॥यथोच्चारितमिति॰ गणेयादृशाः कृतावड्ःपठिताः द्व
न्द्वाः तादृशानामेवेदंकार्यमेकवद्भावलक्षणंभवतीत्यर्थः यदात्ववङ्नास्तिविकल्पितत्वात्तदापशुद्वन्द्ववि
भाषाभवति॰ गोश्वंगोश्वाइति॰ एतेनगणपाठरूपंविवक्षितमित्युक्तंभवति॥ ॥ ॥ ॥

तिलोमत्वादितिभावः॰ शूद्रशब्दोत्रसूत्रेत्रैवर्णिकेतरपरइतिबोध्यं॰ स्मृतिकारैरिति॰ भस्मनाशुध्यतेकांस्यमित्यादि॥ ॥गवा॥ ॥भाष्येयथोच्चा राम॰ ५
रितद्वन्द्ववृत्तमिति॰ द्वन्द्वप्रयुक्तमिदंकार्यंगणेयथोच्चारितशब्दविषयमित्यर्थः॰ तत्फलितमाह॰ गणेइति॰ यथोच्चारितमित्यस्यफलमाह॰ पदाविति॥ ॥११॥

८८५

विभाषावृक्ष॥ ॥द्वन्द्वप्रकृतिवर्त्तिपदानियेषांबहुत्वेत्रिप्रभृतित्वेवतिष्ठेवस्यादतआह॰ बदरबइति॰ पदार्थास्तादृशपदार्थप्रतिपादकाःश
ब्दाः तदर्थानांबहुत्वागमकश्चैकवद्भावएवयद्वाबदरत्वेनैवानेकेषांभानंएकवद्भावबलादितिनैकार्थाभावविरोधः॰ एतत्सूत्रानुपात्तफल
द्वन्द्वस्यैहोपादानेबहुप्रकृतित्वानियमापेक्षाह॰ जातिरिति॰ नचजातिप्राधान्यएवजातिरित्यस्यप्राप्तिः तत्रवैचनबद्ववनंतस्याएकत्वात्
अतएवक्षीरोदकेसंयुक्तइत्यंतादिवच्चेतिसूत्रस्थभाष्यप्रयोगः संगच्छते॰ जात्याख्यायामितिसूत्रंचभगवताप्रत्याख्यातमितिवाच्यं॰ जाति

विभा॥ ॥बहुप्रकृतिरिति॰ बहवोबहुत्वसंख्यायुक्तावर्तिपदार्थाः प्रकृतयः कारणानियस्यसबहुप्रकृतिः॰ बदरामलकमिति॰ जातिरप्रा
णिनामितिनित्यएकवद्भावः॰ केचित्तुबदरामलकानीत्यपिपठंति॰ तत्रैवंव्याचक्षतेनित्यएकवद्भावेप्राप्तेविकल्पोनेनवचनेनक्रियते॰

प्राधान्येएवजातौव्यक्तिद्वारकपरंपरयासंख्यान्वयेनतत्संभवात्॰ तदेवंजातिप्राधान्येव्यक्तिद्वारकपरंपरयासंख्यान्वयेबदरामलकमित्येवपा
ठांतरेआद्यव्याख्यायांबदरामलकानीत्यपिव्यक्तिप्राधान्येतुबदरामलकेइत्येवव्यक्तिप्राधान्यमतेद्वित्वविवक्षायांबदरामेकेलबदरामलक
मित्युभयमितिलभ्यतेइतिबोध्यं॰ व्याचक्षतइति॰ अन्यत्रस्यैरूपात्सामर्थ्याद्विकल्पोबहुप्रकृतित्वंचानेनविधीयतइतितदाशयः॰ अतएववा
र्तिकव्याख्यानभाष्येविभाषेत्युक्तं॰

कै०वि०२०४ अन्येत्विति॰ वार्तिकव्याख्यानभाष्ये विकल्पो न वाच्यनिकः किंतु विभाषावृक्षेति सूत्रप्राप्तिविषयानुवादकः॰ तस्मादेषां य एकवद्भाव इति यश्च विभाषा एकवद्भवतीति सर्वोपि बहुप्रकृतिरेवेति वाच्यमिति वार्तिकव्याख्यानभाष्यार्थः॰ एवमेव पूर्वकाशिकाद्यपि भाष्यं व्याख्येयं॰ अत एवाग्रे बहुप्रकृतिरेव तत्र यथा स्यादित्येव प्रयोजनमुक्तं न तु फलक्षुद्रजंत्वंशे विकल्पोपि प्रयोजनत्वेनोक्त इति तदाशयः॰ अत्राद्यव्याख्यैव युक्ता॰ भाष्यकारेण फलक्षुद्रजंतोर्विभाषाप्रकरणे पाठः कर्तव्य इत्युच्यते॰ तेन वार्तिकप्रयोजनकथनं भाष्यविरोधः॰ यथोत्तरं मुनीनां प्रामाण्यमित्येव युक्तमि

अन्ये तु बदरामलकानीत्येवं प्राप्ते जातिलक्षणो नित्य एकवद्भावो बहुप्रकृतेर्भवतीति प्रदर्शयितुमित्याहुः॰ हस्त्यश्वमिति॰ सेनांगत्वेपि परत्वात्पशुलक्षणो विकल्पो भवति॰ किंतु नेति॰ अस्मिन्प्रदेशे पठितत्वात्किमेतत्सूत्रविहित एवैकवद्भावो नियतविषयो व्यवस्थाप्यते अथ प्रकरणविहित इति प्रश्नः॰ येषां सूत्रांतरेण नेनचप्राप्तिर्वनस्पत्यादीनां तद्विषय एव संशयो न त्वन्यतरप्राप्तिविषयः॰

त्याहुः॰ सेनांगत्वेपीति॰ इदं चिंत्यं॰ तत्र सेनांगशब्देन हस्त्यश्वादीनामेव ग्रहणात्॰ अत्र तु सेनाशब्देन हस्त्यश्वादीनां ग्रहणं भाष्यप्रामाण्यात्॰ अत एव संग्रामं हस्त्यश्वरथपदातिभिरिति भाष्यप्रयोगः संगच्छते॰ बहुप्रकृतित्वाभावान्नैकवदिति तु न युक्तं॰ बहुभिरेव तैः संग्रामस्य निष्पाद्यत्वात्॰ वनस्पतिशब्देन वार्तिके वृक्षग्रहणं॰ एतत्सूत्रानुपात्तानामपि पाठात्॰ प्रकरणविषयत्वनिश्चयेन संदेहानुपपत्तिरत आह॰ येषामिति॰ एतत्सूत्रोपात्त राम

विषय एव संदेह इति भावः॰

८८६

भाष्ये नित्योयं ह्येकवद्भावः प्राप्नोतीति॰ अस्य नियमेन वारणेपि नित्यः प्राप्नोतीत्यर्थः॰ अविशेषेणेति॰ एषोक्तवचनं द्वंद्वविषयं पक्षे द्वंद्वे च प्राप्नोति न द्वंद्वप्रकृतेरेवेत्यर्थ इति भावः॰ एतेन बदरामलकेत्यत्र जातिरित्यस्याप्रवृत्तावपि चार्थे इति विभाषा स्यादित्यपास्तं॰ पशुत्वेनैव सिद्धेश्ववडवग्रहणं न कार्यमित्याशयेन वार्तिकमाह॰ पशुत्वादिति नोक्तेति॰ पूर्वविप्रतिषेधादश्ववडवेत्यग्रहणमेवान्याय्यमित्याशयः॰ नपुंसकत्वस्य

यथानदीप इति॰ व्यापित्वात्प्रकरणे पैत्सोयं विषयनियम इत्यर्थः॰ अश्ववडवयोरिति॰ पशुत्वाद्विभाषैकवद्भावः॰ तत्रैकवद्भावपक्षे नपुंसकत्वमपि प्राप्नोति॰ पूर्ववदश्ववडवाविति तदेशात्पुंस्त्वमपि॰ तत्र परत्वात्पुंस्त्वे प्राप्ते पूर्वविप्रतिषेध उच्यते॰ प्रतिपदविधानादिति॰ नात्र पशुग्रहणेनैकवद्भावो विधीयते किं तर्ह्यश्ववडवग्रहणेन तत्र प्रतिपदविधानात्तन्नपुंसकमित्येतद्भवति॰ तच्छब्देन ह्येकवद्भावभाजं परामृश्य नपुंसकत्वं विधीयते॰ ततश्च यथैकवद्भावोत्र प्रतिपदं विधीयते तथा नपुंसकत्वमिति भावः॥

प्रतिपदविधित्वं समर्थयते॰ तच्छब्देनेति॰ भाष्ये ज्ञास्यामीत्यंतर्भावितण्यर्थं ज्ञापयिष्यामीत्यर्थः॰ इह नित्य इति॰ विनिगमनाविरहाल्लाघवाद्गवादीनामेव समाहारस्तेषां समाहार एवेत्येवं विधेयमिति नियम इति भावः॰ अन्यथा एतत्प्रयोजनखंडनपरभाष्ये एषामेव समाहार इति नियमस्येव लाभादेतादृशप्रयोगे इतरेतरयोगाव्यावृत्त्यादृश्यैतस्य नत्ययंतेनित्यो विधिरित्यादिकैयटासंगतिः स्यात्॰ भाष्यमपि विशिष्टप्रयोजनखंडनपरं॥

कै०वि०२०४

भाष्ये यदयमिति· एवं चैकवद्भावप्रकरणमनर्थकमिति भावः· सर्वशब्दोऽसंकुचद्वृत्तिरित्यभिमानः एवं चान्यतरनियमस्य तत्प्राप्त्यनिरासेऽन्यत
र एवस्थितइत्याशयेनाह· प्राण्यंगादीनामिति· सर्वो द्वंद्व इत्यत्र सर्वशब्द एतत्प्रकरणस्थसूत्रानुपात्तविषय इति भावः· लिंगमशिष्यमिति·
शास्त्रोक्तलिंगानुशासनस्य व्यभिचारदर्शनादिति भावः· भाष्ये उत्तरत्र व्यमिति· नित्यैकवद्भावस्य व्यभिचारार्थमित्यर्थः· स च क्वचिदेकवद्भावाभा

समाहारैकत्वादिति· तिरोहितावयवभेदो हि समाहारः स च वनपृथ्वादिवदेक इत्यर्थः· इहानित्य इति· द्वंद्वश्चेत्यारम्भसामर्थ्याद्योगा
त्प्रागनित्यो विधिः अनेन तु योगद्वयेन विभाषेत्यर्थः· यदयमिति· यद्येतत्प्रकरणोपात्तानामेवैकवद्भावः स्यात्तदा तिष्यपुन
र्वसुशब्दयोरत्रापठितत्वादेकवद्भावस्याभावात्तन्निवृत्त्यमेव बहुवचनग्रहणमनर्थकं स्यादित्यर्थः· पूर्वत्रेति· प्राण्यंगादीनांस
माहारएवेत्येवमर्थमित्यर्थः· उत्तरत्रेति· केचिज्जातिरप्राणिनामिति प्राप्तविभाषा। मृगादीनां तु व्यतिकरनिरासार्थं॥ ॥राम

वेन क्वचिन्नित्यत्वाभावेन एवं च मृगादीनां व्यतिकरे इतरेतरयोग एव उत्तरसूत्रविषयेऽधिकरणवाचिनामितरेतरयोग एवेति ध्वनितं तदुपप राम
त्तिस्तु यो विभाषा एकवचनो द्वंद्वः स मृगाणां मृगैरेव द्वंद्वोऽन्यत्र विशेष्यमुत्तैकवचनं नेति वचनव्यक्त्याऽन्यत्र द्वंद्वस्यैव निषेधे इतरेतरयोग एवे ७
ति फलितत्वात्· एवं विप्रतिषिद्धं चेत्यत्रापि य एकवचनो विभाषा द्वंद्वः स यदि विरुद्धार्थानां चेद् द्रव्यवाचिनामेवेति वचनव्यक्त्या द्रव्यवाचिनामित
रेतरयोग एव फलति॥ १२ १३ १४ १५॥ ॥

८८७

विभाषास॥ ॥समाहारविषये उपदंशं पाणिपादमित्येव इतरेतरे तु उपदंशः पाणिपादाद्युस्येवेष्यते विपरीतमभिप्रायेणोक्तमित्याशयेन
प्रश्न इत्याह· अनुप्रयोग इति· भाष्ये नैतदस्तीति· सूत्रेण द्वंद्वस्यैकवद्भावविधानेपि अनुप्रयोगानियमः स्तद्वस्थ एवेति नेदं सूत्रप्रयो
जनमित्यर्थः· प्रश्ने उदाहरणशब्दः प्रयोजनपर एवेति भावः· नन्वर्थस्येति· एवं च समाहारद्वंद्वपक्षेऽव्ययीभावस्य बहुव्रीहेर्वानुप्रयोगे
पि द्वंद्वार्थस्यैकत्वादुपदंशमित्येव भविष्यतीति भावः· अव्ययत्वादिति· अव्ययत्वेनासंख्यत्वादित्यर्थः· सत्यपिवेति· भाव्ययीभावात्त

विभाषासमीपे॥ ॥अनुप्रयोगे दोषदर्शनात्प्रश्नः· किमुदाहरणमिति· कः प्रसंग इति· नन्वर्थस्यैकत्वादनुप्रयोगस्या
पि सेत्स्यति· नैतदस्ति· यदितावदव्ययीभाव एवानुप्रयुज्यते तदा तस्याव्ययत्वाद्बहुत्वाभावाद्बहुवचनं न स्यात् सत्यपिवा
तस्मिन्नेभावेद्धे उपदंशा इति न स्यात्· अथ बहुव्रीहिरेवानुप्रयुज्यते तदोपदंशस्य पाणिपादस्येति षष्ठ्या स्यादुपदंशमिति चेष्यते·

तीयासप्तम्योरित्यारंभादसंख्यत्वमव्ययीभावातिरिक्ताव्ययविषयमिति भावः· अर्थेति· अर्थस्यैकत्वान्नित्यबहुवचनांतस्याप्युप
दंशशब्दस्यैकवचनांतत्वसंपत्तावपि पाणिपादस्येति षष्ठ्यंतसमभिव्याहारे उपदंशस्येति अम्भायमनापत्त्या षष्ठी भूयेतेति भावः· व
स्तुतो नियमे मानाभावेनाभयत्राप्युभयानुप्रयोगः स्यात्· तथा चेतरेतरयोगे उपदंशं पाणिपादाद्युस्यापि स्यादिति भाष्यार्थः॥ ॥राम

कै॰वि॰२०४ एकवचनस्यचिति॰ तावतैवनाव्ययीभावादित्वाद्युपपन्नेः नसंख्यासंबंधज्ञापकमितिभावः॰ पंचमीत्ततीयासप्तमीग्रहणंतुस्वप्रा
र्थमेव पूर्वाचार्यानुरोधात्तौद्यानदनुरोधफलेचतेषांप्रमादबोधनेक्वचित्स्वकृतेःप्रामाण्यबोधनंक्वचित्तुइतिबोध्यं॰ नच्चअप्यार्थेसंख्या

एतदेवमनसिकृत्वाह॰ एवंतर्हीति॰ अव्ययीभावोऽव्ययंनिभक्तीतिविहितः बहुव्रीहिस्तुसं
ख्ययाव्ययेति॰ नद्यदिति॰ अव्ययीभावस्याव्ययत्वादसंख्यत्वादेकवचनस्यनूत्सर्गत्वादिति
भावः॰ एकार्थइति॰ अभेदैकत्वाश्रयादित्यादुम्यदेति॰ बहुव्रीहेः समीपप्रधानत्वाद्वहुर्थत्वमितिभावः

याअभावादेकार्थइत्यनुपपन्नमतआह॰ अभेदैकत्वेति॰ तथाचभेदसहचरितद्वित्वाद्यभावरूपमैकार्थ्यंसमीपप्रधानाव्ययीभाव
स्येत्यर्थः॰ एतेनसमासेविशेष्यांशेपि अंतर्वर्तिसंख्याया अभानेसूचितं॰ बहुवचनादित्वेकशेषणेतिबोध्यं॥ ॥१६॥ ॥१७॥ ॥१८

रा॰म॰
८

८८८

Dr. BHAU DAJI MEMORIAL
